(क) २. + हामिलरासुलूगोलस्य दक्षिणजानु बहिस्थास्ति तद्दक्षिणतटे नितांतं सन्नमस्ति तत्समीपे +
३. संज्ञकस्य for (संज्ञस्य) (ख) ४. गतैवास्ति for (गतौ वास्ति)
५. 'नक्षत्रा' लुप्त ६. दक्षिणा for (दक्षिण)
७. यद्दक्षिण for (तारायां)
११. ईनान् for (इनान्) (ख) १२. तत्रापि for (तत्तत्रापि) (ख)
१३. सूक्ष्ममस्ति for (सूक्ष्मस्ति)
१४. एतत्त्रयं for (एतत्रयं) (ख) १५ तटे for (पटे)
१६. तत्तटादन्तर्गतमस्ति for (तत् तदादन्तर्गतमस्ति) (ख)
१७. अर्द्धांशांतरेण for (अर्द्धांशातरेण) १८. तवमैन्संज्ञकस्य for (तवामैन्संज्ञकस्य)

(ख) १. तत्समीपे for (अथोत्तरतटे)
८. 'दक्षिण—मस्ति' लुप्त
९. 'तस्य—यच्च' लुप्त १०. मुंसिकुल् for (मुंस्सिकुल्)

अथ तदग्रतटोपरि मुम्सि कुन्[1] ईनान् दक्षिण पादस्थं यत्तारात्रयं तत्पृष्ठो[2]या[3] तारा[4] सा[5] यज्जधार[6] यष्टिस्थ नक्षत्र द्वयं तत् पृष्टस्थतारा तच्च यच्च[7] जधार[8]-करस्थ तारा चतुष्टयं तन्मध्ये यदुत्तरस्थताराद्वयं चैतानि तदग्र तटस्थानि सन्ति। यन्नक्षत्रं भुम्[9] सिकुल् इनान्[10] दक्षिण हस्ताध[11] स्थितमस्ति। यच्च तवामेन्[12] संज्ञक पृष्टपादस्थं एतद्वयं तस्या[13] पश्चिमतटान्तर्गततंतं[14] कौशांतरेणास्ति ततः कुक्कुर[15] द्वयान्तर्गतमस्ति। तत्र अग्रिमकुक्कुर नक्षत्राणि पूर्वागतानि[16] द्वितीयस्य तदा संनानि सन्ति। तस्मात्किंचिदभ्रखण्डमिव पृथक्[17] भूत्वा कुक्कुर कर्णे पतितं यच्च तारकात्रयं तत्पृष्टे ग्रीवायां चैतानि तत्स्पर्शरहितानि सन्ति। यच्च शिरेर्वस्थ[18] नक्षत्रं तत्केवलमेव पतितं यच्च पूर्व तटात् सार्द्धांश द्वयप्रमाणेनांतः पतितं तच्चैस्थले[19] सूक्ष्मं जातं ततोपि नावगतमस्ति। नावपार्श्वे[20] चर्म्माकार स्थले यानि नक्षत्राणि

---

(क) १. कुल् इनान् for (कुन् ईनान्)
२-३-४-५. लुप्त ७. 'यच्च' लोप
९. मुम् for (भुम्) (ख)
१०. 'इ' लुप्त ११. हस्ताधः for (हस्ताध)
१२. तमेन् for (तवामेन्) १३. तस्यै for (तस्या)
१४. गंतंकांशांतरेणास्ति for (गंततंकौशांतरेणास्ति)
१५. कुक्कुट for (कुक्कुर)
१६. पूर्वगतानि for (पूर्वागतानि) (ख)
१७. प्रयग्भुत्वा for (पृथक्भूत्वा)
१८. शिरोधस्य for (शिरेर्धस्य) १९. तत्स्थले for (स्थले)
२०. नात्रपार्श्वे for (नावपार्श्वे)

(ख) १. कुल् for (कुन्)
२. तत्पृष्ट्रे for (तत्पृष्ठो) ६. यज्जह्वार (यज्जधार)
९. जह्वार (जधार)
१३. तस्य for (तस्या)
१७. प्रयग्भूत्वा for (पृथक्भूत्वा) १८. शिरोर्धस्थं for (शिरेर्धस्थ)

सन्ति । तदग्रे दिक्कं[१] नक्षं[२] नक्षत्रं तस्य पूर्वतटमस्ति[३] । यच्च नक्षत्रं चर्म्माकारस्थलमध्यपतितं ये च तारे एतत्समीपे स्तः । या च प्रकाशतारा नाव[४] प्रान्तां[५] विस्तीर्ण[६]-स्थलगतास्ति[७] । तत्तारात्रयं यन्नावमूलकाष्टागतमस्ति[८] । तन्मध्यतारा चैतानि यमदिक्त[९] आसन्नानि[१०] सन्ति । ये च तारे नाव चालन्[११] यष्टिस्थले स्तः । तन्मध्ये योत्तरतारा सा पूर्व[१२] तले पतितास्ति[१३] । या च प्रकाशतारा नावप्रान्तेस्ति[१४] । सा[१५] पूर्वतटात्[१६] एकांश प्रमाणेनांतः[१७] पतितास्ति । या[१८] च प्रकाशतारा चर्माकारप्रदेशासंन्नास्ति[१९] । सा चैकांशप्रमाणेन वहिः पतितास्ति । ये च तारे नावोपरि वस्त्रवेष्टितस्तम्भे[२०] स्तः । तन्मध्ये या दक्षिणतारास्ति सैंतत्तटलग्नास्ति[२१] । ये च प्रकाशतारे नाव[२२]धार[२३]-पट्टिकोपरि स्तः । ते तदग्रतटादन्तः[२४] अंशद्वयप्रमाणेन स्तः । पुनरस्मा[२५] वर्द्धितो[२६] भूत्वा

---

(क) १. दिक for (दिक्कं)
२. 'नक्षं' लुप्त (ख)
३. तटस्थमस्ति for (तटमस्ति)
४. यष्टि for (नाव)
५. प्रान्तस्थ for (प्रान्तां)
६. लगत for (विस्तीर्णं)
७. मस्ति for (गतास्नि)
८. भ for त
९. एकद्दिक्त for (यमदिक्त)
१०. आसन्नानि for (आसंन्नानि)
११. चालन for (चालन्)
१९. सन्नास्ति for (संनास्ति)
२१. सा for (सैं)
२२. नावा for (नाव) (ख)
२३. धारयष्टिशो परिस्तः for (धारपट्टिकोपरिस्तः)
२६. पुनरस्माद्वर्द्धितो for (पुनरस्मावर्द्धितो)

(ख) ३. पूर्वतटस्थमस्ति for (पूर्वतटमस्ति)
५. प्रान्ते for (प्रान्तां)
८. काष्ठगतमस्ति for (काष्टागतमस्ति)
९. पश्चिमदिक्त for (यमदिक्त)
११. चालून for (चालन्)
१२. पूर्वतटात् for (पूर्वतले)
१३. + एकांश प्रमाणेनांतः +
१४. 'नावप्रांतेस्ति' लुप्त
१५. + चर्माकार प्रदेशासन्नास्ति +
१६. साचैकांश for (सा पूर्वतटात् सकांश)
१७. प्रमाणेन बहिः for (प्रमाणेनांतः)
१८. "या च – पतितास्ति" लुप्त
२०. वेष्टिनस्तम्भे for (वेष्टितस्तम्भे)
२४. तेन for (तेत)
२५. पुनरस्मात् प्रदेशात् for (पुनरस्मा)
२६. वर्धित भूत्वा for (वर्धितो भूत्वा)

कंलूरस[1] संज्ञस्य पादगतवृत्तो परिगतमस्ति एवं नावोपरि सूक्ष्मस्ति[2]। चर्माकार प्रदेशे सघनमस्ति।

अथ यत्र द्विगुणित वृत्तात् अग्रगत[3] वृत्तं द्वितीयवृत्तात् अग्रगतवृत्त[4] द्वितीय-वृत्तात् अग्निशकटीस्थलात् पृथग्[5] भूतमस्ति। ततः वृश्चिक पुछगतखण्डत्रय पतितमस्ति। एतत् खण्डत्रयमध्ये पश्चिमखण्ड[6] एकांश प्रमाणेन पृष्टे पतितं यन्न-क्षत्रं चतुर्थखण्डेस्ति। तत्वृत्तद्वयमध्यगतमस्ति। ततश्चलित्वा वृत्तखण्डाकारमिव पूर्वदिशि गतमस्ति। तदग्रप्रान्ते होवासंज्ञकस्य दक्षिणजानुस्थतारा पतितास्ति। तत्पश्चिम तटे तस्य दक्षिण जंघास्थ नक्षत्रं पतितं।

अथ तत् पश्चिमतटे होवा संज्ञकस्य दक्षिणवाहुसंधिस्थ तारास्ति। तत्पूर्वतटे अस्य दक्षिणहस्ततलस्थतारा द्वयमध्ये तदग्रतारा पतितास्ति। तदग्रे[7] अवकाशितमस्ति[8]। तत्रैव सर्प्पपुछस्थताराद्वयमस्ति। एतद्वृत्तं नितान्तं सूक्ष्मस्ति[9]। परं च यद्विश्चिक[10][11] खण्डत्रयगतं[12] खण्ड तत् किंचित् सघनमस्ति। एवं अवकाशित-स्थलादग्रे पुनः वर्तितं[13] तत्रैव होवासंज्ञकस्य दक्षिणस्कन्धस्यताराचतुष्टयमस्ति।

अथ तत् पूर्व तट संलग्नप्रकाशतारा नसर्त्ता पर पुच्छाध[14] स्थितास्ति[15]। द्वितीय तटे पूर्वतारा चतुष्टये[16] मध्ये या दूरता[17] समास्ति[18]। पुनरस्मात्संकुचितो[19] भूत्वा

(क) १. कंतूरस संज्ञस्य for (कलूरस संज्ञस्य)
२. सूक्ष्ममस्ति for (सूक्ष्मस्ति)
६. + खण्डत्रयपतितमस्ति एतत् खण्डत्रयमध्ये पश्चिम +
७. तददग्रे for (तदग्रे) ८. अवहाशित for (अवकाशित)
९. सूक्ष्ममस्ति for (सूक्ष्मस्तिं) (ख) १०. यत् वृश्चिक for (यद्विश्चिक)
११. + खण्डत्र + १२. त्रयं for (त्रय)
१३. प्रवर्तितं for (वर्त्तितं)
१४. पुछाधः for (पुच्छाध) १६. चतुष्टय for (चतुष्टये)
१७. तारा for (रता) १८. सास्ति for (समास्ति)
(ख) ३. अग्रतगतवृत्तं for (अग्रगतवृत्तं) ४. 'अग्रगत—वृत्तात्' लुप्त
५. प्रथग् for (पृथग्)
१०. यद्वृश्चिखण्डत्रयगते for (यद्विश्चिकखण्डत्रयगतं)
१५. 'द्वितीय—समास्ति लुप्त' १९. मंकुचितं for (संकुचितो)

सूक्ष्मो भूत्वा[1] च कुक्कुटचंचुतः[2] वस्थलो[3] विस्तीर्ण सघनश्चास्ति । तत्रैव कुक्कुट-ग्रीवास्ति । पुनस्तस्मात्स्यैकं सूक्ष्म[4] खण्डं उत्तरदिशि कुक्कुटस्य[5] वक्ष[6] प्रदेशे[7] दिशि दक्षिण बाहुदिशि च तद्दक्षिणपादस्थतारकाद्वय दिशि च गतमस्ति । तस्मात् चलितं[8] भूत्वा विस्तीर्णस्थे[9] समाप्ति गतम्[10] । अस्मिन् स्थले पूर्वोक्त ताराः सन्ति ।

इति द्वितीय प्रकरणं समाप्तम्

---

(क) १. यच्च for (च)

२. + कुक्कुटचंचुपर्यंतं गतः तत्र समाप्त इव भाति पुनः +

३. स्थले for (स्थलो)

४. सूक्ष्मं for (सूक्ष्म) (ख) (ख)

५. कुक्कुटस्थ for (कुक्कुटस्य)

६. वृक्षः for (वक्ष)

७. प्रदेश for (प्रदेशे)

८. चलितो for (चलितं)

९. स्थले for (स्थे) (ख)

१०. गतः for (गतम्)

(ख) ३. वक्षस्थलो for (वस्थलो)

५. 'कुक्कुटस्य + बाहुदिशि' लुप्त

—०O०—

## अथ तृतीय प्रकरणम्

तत्र गोलरचना निरूप्यते । तत्रैकं गोलं करणीयं तत् रात्रौ यथा काशस्य नीलता भवति । तादृशं रंगेन रंजितं कार्यं तस्योपरि तादृशं चिन्हद्वयं कार्यं ये सन्मुखं व्यासान्ते[1] स्तः । ते च कदम्ब संज्ञो[2] भवतः । तच्चिन्हद्वयांतस्त्रिज्यो[3] व्यासार्द्धेन वृत्तं कार्यं क्रान्तिवृत्तं भवति । पुनरन्यत्रिज्या[4] वृत्तं कार्यं यत्कदम्बद्वयगतं भवति । अस्य क्रान्तिवृत्तस्य यत्र सम्पातस्तस्मात् षष्टयधिकशतत्रय विभागा[5] समानांतराः कार्याः पश्चात् धातुमयं वृत्तद्वयं सम विस्तारपालि पिंडांकं[6] कार्यं एकं तथा कार्यं यथा गोलसंलग्नमिव भ्रमति । द्वितीयं तथा कार्यं यथैतद्वृत्तोर्ध्व[7]-पालिसंलग्नं भ्रमति ।

अथ वृत्तद्वयस्याप्यूर्द्ध पालिसंगलग्नं[8] रेखाया[9] वृत्ताकारसूत्रं[10] कार्यं पुनः प्रत्येकमण्डलस्य[11] भागद्वयं कार्यं । पुनः प्रत्येकं विभागे भार्द्धांशा [12]१८ अंकयाः[13] पुनर्लघुवृत्तं अयनवृत्तस्थाने कल्पनीयं ।

अथ वृत्तार्द्ध रेखावत्र[14] प्रदेशे लघुकीलद्वयं निखात्वा कदम्बस्थले प्रातव्यं[15] पुनः कदम्बस्थानात् परमक्रान्त्यंतरेण वहिः कीलद्वयं निखात्वा प्रोत्तव्यं[16] एतत्कीलद्वयं ध्रुवस्थानसंज्ञं बोध्यं पूर्वं च लघुवृत्त स्थापनार्थं यत् कीलद्वयं निखातं तत् श्लथं[17] कार्यं[18] यथा भ्राम्यमाणं[19] गोः[20] समंतात् भ्रमति[21] । पुनः गोले

(क) १. व्यासन्तरिते for (व्यासान्ते स्तः) २. संज्ञे for (संज्ञो)
३. त्रिज्या for (त्रिज्यो) (ख) ४. त्रिज्या for (त्रिज्या)
५. विभागाः for (विभागा) ६. पिण्डकं for (पिण्डांकं) (ख)
९. 'ग' लुप्त, (ख) १०. वृत्ताकार for (वृत्ताकार) (ख)
११. प्रत्येक for (प्रत्येकं) (ख)
१२. संख्या लुप्त १३. अंक्याः for (अंकयाः) (ख)
१४. वच्छिन्न for (वत्र) (ख) १५. प्रोतव्यं for (प्रातव्यं) (ख)
१७. श्लेथं for (श्लथं) १८. कार्ये for (कार्यं)
१९. अनुस्वार लुप्त २०. गोल for (गोः) (ख)
२१. भ्रमतिः for (भ्रमति)

(ख) १. व्यासान्तरिते for (व्यासांते स्तः)
७. यथैतद्वृत्तोर्द्धपालि for (यथैतद्वृत्तोर्ध्वपालि)
९. रेखया for (रेखाया) १६. प्रोतव्यं for (प्रोत्तव्यं)

यत्कृतं कदम्ब[1] वृत्त[2] तदुपरि यथा लुब्धस्तथा प्रकाशितनक्षत्र[3] लघु वृत्त शरचिन्ह कृत स्थान[4] स्पर्शेन गोलोपरि कृतकदम्बवृत्ते स्थापनीयं पुनः लुब्धनक्षात्[5] सर्वेषां[6] नक्षत्राणामन्तराणि ज्ञात्वा लघुवृत्त[7] तत्तन्नक्षत्रशरांकित[8] स्थापयित्वा तदनुसारेण नक्षत्रस्थापनं करणीयं।

अथ नक्षत्राणां स्वस्ववर्ण[9]समरंगेन वर्णांकनं कर्त्तव्यं। पुनर्नक्षत्राणामष्टचत्वारिंशन् मूर्त्तयः सूक्ष्मरेखाभिः कार्याः। पुनरणु तारकाभि वृत्ताकारं[10] यन्नक्षत्र[11] पुंज[12] पुंजभुक्त[13] तत्पूर्वोक्त[14] प्रकारेण स्थापनीयं[15]।

अथ यद् द्वितीयं वृहद्वृत्तं कल्पितं तत्[16] ध्रुवस्थानकीलकयोः प्रोतं कृत्वा याम्योत्तरवृत्तस्थाने धार्यं[17] तथा धार्यं यथा लघुवृत्तसहित गोल एतदन्तः[18] संलग्न उचव[19] भ्रमति। परं च वृहद्वृत्ते यत्प्रदेशमवधी कृत्य विभागाः कृताः, तत्प्रदेशमव[20] प्रोक्तव्यं[21] पुनः यस्मिन् समव[22]लुब्धकस्य कर्कस्य च यदन्तरं तदन्तरेण कदम्ब प्रोत[23] लघुवृत्तं[24]

(क) २. + चिह्नं +
३. + तत् +
४. 'स्थान' लुप्त
५. लब्धक for (लुब्ध) (ख)
६. नक्षत्रात् for (नक्षात्) (ख)
७. वृत्तं for (वृत्त) (ख)
८. शरांकितं for (शरांकित) (ख)
९. वर्णा for (वर्ण)
१०. वृत्ताकारं for (वृत्ताकारं)
११. यन्नक्षत्र for (यन्नक्षत्रं)
१२. 'पुंज' लुप्त (ख)
१३. मुक्त for (भुक्त) (ख)
१४. अनुस्वार लुप्त (ख)
१५. 'यं' लुप्त
१७. 'धार्यं' लुप्त (ख)
१८. दन्तवृत्त for (दन्तः संलग्न)
१९. मेव for (उचव)
२०. एव for (मव) (ख)
२१. प्रोतव्यं for (प्रोक्तव्यं) (ख)
२२. समये for (समव) (ख)
२३. प्रोतं for (प्रोत) (ख)
२४. + तत् +

(ख) १. वृत्तं for (वृत्त)
१६. त for (तत्)
२०. इव for (उचव)

स्थापनीयं पुन[1] याम्योत्तर वृत्ते[2] अन्यत्[3] क्षितिजाकारवृत्तं[4] स्थापनीयं तथा धार्यं यथा वृत्तद्वयस्यार्द्धो वक्षित्र[5] प्रदेशे सम्पातो भतति। पुनस्तथा[6] गोलयन्त्रं[7] धार्यं यथा-भीष्टाक्षासानुसारेण[8] सा[9] क्षितिजादुपरि ध्रुवस्थानं[10] भवति । इदं गोलयन्त्रं[11][12] आ-काशानुकारमेव जातं यतः सर्वाणि नक्षत्राणि यत्र[13] स्वस्वस्थानस्थितानि[14][15] सन्ति। नाडीवृत्तस्य क्रान्तिवृत्तस्य च गतिरस्ति।

अथात्रास्माभि[16] यन्नाडिकावृत्तं[17] न कृतं तदत्र हानिर्नास्ति। यतः ध्रुव-द्वयस्य मध्यावस्छिन्न[18] प्रदेशो[19] यत्र प्रदेशो यत्र याम्योत्तरवृत्ते लगति तदेव संपात-स्थलं बोध्यं तस्माच्च परक्रांन्त्यंतरेण यः प्रदेशः याम्योत्तरप्रदेशे लगति तदेव कर्कमछरस्थानं[20] एवं यस्य नक्षत्रस्य याम्योत्तर वृत्ते संपातः तस्य तत्स्थानान्तरे क्रान्तिर्ज्ञेया।

इति तृतीय प्रकरणं समाप्तम्

---

(क) १. + रेतत् +
२. वृत्तं for (वृत्ते)
३. अन्य for (अन्यत्)
४. वृत्ते for (वृत्तं)
५. वच्छिन्न for (वक्षित्र) (ख)
६. पुनर्याम्योत्तर वृत्तं for (पुनस्तथागोल)
७. तथा for (यन्त्रं)
८. क्षांशानुसारेण for (क्षासानुसारेण)
९. 'सा' लुप्त
१०. दक्षिणोतरतः भ्रमयित्वा स्थिरो for (ध्रुव स्थानं भवति)
११. गोलं for (गोल) (ख)
१२ 'यन्त्र' लुप्त
१३-१४. 'यन्त्र' 'स्व' लुप्त
१५. स्थानि for (स्थितानि)
१६. अथ चात्रास्माभि for (अथात्रास्माभि)
१७. यंन्नाडिका for (यन्नाडिका)
१८. मध्यवच्छिन्न for (मध्यावस्छिन्न)
२०. मकर for (मछर)

(ख) १. पुनस्तत् for (पुन)
१३. नक्षत्राण्यत्र for (नक्षत्राणि यत्र)
१८. मध्यावच्छिन्न for (मध्यावस्छिन्न)
१९. 'प्रदेशो' लुप्त

## अथ चतुर्थ प्रकरणम्

अथ नक्षत्राणां परस्परां[१] तवशेन या संस्था भवति सा निरूप्यते। तत्र नक्षत्राणामेव यदन्तरं तद्वशेन या संस्था सा स्थिरैवास्ति यथा पूर्वोक्ता। या च संस्था सूर्यादिग्रहवशेन क्रांतिवृत्तांशेन[२] क्षितिजेन च सात्र निरूप्यते। यन्नक्षत्रं ग्रहयुक्ता[३] भवति, वा षड्राश्यन्तरे भवति, वा राशित्रयांतरे भवति वा राशिचतुष्टयान्तरे भवति वा राशि[४]द्वयांतरे भवति। तदा ईदृश्यः[५] संस्था[६] भवन्ति। तत्र ग्रहयुक्तमित्यत्र कदंबवृत्तैकगतत्वं निरूपितं। एवं षड्राश्यंतरे च एतावान्विशेषः षड्राश्यन्ते[७] कदवांतरे[८] पतति। राशित्रयांतरे तद्गतकदंबवृत्तद्वयं[९] सम्पातात्समकोणो भवति। राशिचतुष्टयांतरे कदंबवृत्तद्वयसम्पातात् अधिककोणः समकोणात्तृ[१०]तीयांशप्रमाणेनाधिको भवति। राशिद्वयांतरे कदंबद्वयसम्पातजनितकोणः समकोणातृतीयांश[११]प्रमाणेनाधिको भवति[१२]। राशि[१३]द्वयान्तरे कदंब[१४]द्वयसम्पात[१५]जनितकोणः सम[१६]कोणातृतीयांश[१७]प्रमाणेन न्यूनो भवति। एतादृशी संस्था सार्व[१८]नक्षत्रेषु ग्रहेष्वप्यस्ति[१९]। एका[२०]न्या संस्था भवति, सा च ग्रह[२१]परमशरांतवर्त्तिनां[२२] नक्षत्राणामेव भवति। नान्येषां तत्र ग्रहेण[२३] तन्नक्षत्रं[२४] छादितं[२५] भवति।

---

(क) १. परंपरान्तर वशेन for (परस्परांतवशेन) २. +क्रांतिवृत्तांशेन+
३. ग्रहयुक्त for (ग्रहयुक्ता) (ख) ६. संस्थाः for (संस्था)
७. षड्राश्यन्तरे for (षड्राश्यन्ते) (ख) ८. कदंवमन्तरे for (कदवांतरे)
९. दूय for (द्वयं) (ख)
१२. तृतीयांस for (तृतीयांश) ११-१२-१३-१४-१५-१६-१७. लुप्त
१८. सर्व नक्षत्रेषु for (सार्व नक्षत्रेषु) (ख) १९. गृहेष्वप्यस्ति for (ग्रहेष्वप्यस्ति)
२०. +पुनः+ २२. वंतिनां for (वर्त्तिनां) (ख)
२३. 'ण' लुप्त २४ तन्नक्षत्र for (तन्नक्षत्रं)
२५. गृहेणा for (ग्रहेण)

(ख) १. परस्परांतरवशेन for (परस्परांतवशेन) (ख)
४. +त्रयांतरे भवति वा राशिचतुष्टयांतरे भवति वा राशि+
५. इदृश्यः for (ईदृश्यः) (ख)
११. "प्रमाणेन—तृतीयांश" लुप्त २१. ग्रहस्य for (ग्रह)

अथ सूर्यचन्द्राभ्यां नक्षत्रस्यैता[1]दृश्यं[2] भवति, क्वचित्सूर्यतेजो पुं[3]जांछन्न नत्वा दृश्यं[4] भवति। पुन: सूर्येण[5] छादितं भवति । ततश्चलिते[6] दर्शनमायाति एवं चन्द्रमसाधि[7] ।

अथ या संस्था क्षितिजवशेन भवति सा निरूप्यते[8] । तत्र पूर्वक्षितिजे यन्नक्षत्रं भवति, तदुदितमित्युच्यते । पश्चिमक्षितिजे यन्नक्षत्र[9] भवति[10], तदस्तं[11] गतमित्युच्यते। एवं याम्योत्तरवृत्ते क्षितिजादुपरि भवति। अधोभागे च एवं चतुर्विधा संस्था निरक्षदेशे सर्वेषां नक्षत्राणां भवति। यत्र ध्रुवचिह्नं खमध्ये भवति । तत्र कस्यापि नक्षत्रस्योदयास्तौ न स्तः । परं च याम्योत्तरवृत्ते भ्रमणे[12]न[13] वारद्वयं[14] उपरितने अधोभागे वा जायति[15] । एतद्वयं[16] क्षितिजव्यतिरिक्तान्यक्षितिजेषु येषां नक्षत्राणामुदयास्तै:[17] भवतः[18], तेषां चतुर्थापि[19] संस्था भवति। येषामुदयास्तौ भवतः[20], तेषां[21] चतुर्थापि[22] संस्था[23] भवति[24]। येषामुदयास्तौ[25] न स्तः, अपि च उदया[26] एव वा ऽस्तमनमेव भवति, तेषां मध्यान्हद्वयमेव भवति ।

---

(क) १. तादृशी for (तादृश्यं) (ख)
२. +संस्था+
३. पुंजाछन्नत्वा for (पुंजांछन्ननत्वा) (ख)
४. दृदृश्यं for (दृश्यं)
५. सूर्येणा for (सूर्येण) (ख)
६. ततश्चलित्वा for (ततश्चलिते)
७. चन्द्रमसापि for (चन्द्रमसाधि) (ख)
८. निरूप्येते for (निरूप्यते)
९-१०. लुप्त
११. 'तत्' लुप्त
१२. +प्रत्येक+
१३. 'न' लुप्त
१५. भ्रमति for (जायति)
१६. अनुस्वार लुप्त, (ख)
१७. मुदयास्तौ for (मुदयास्तै:)
१९. चतुर्थापि for (चतुर्थापि)
२०-२१-२२-२३-२४-२५. लुप्त
२६. उदयमेव for (उदया एव)

(ख) १४. त्रयं for (द्वयं)
१. भवति for (जायति)
१८. "भवतः —मुदयास्तौ" अन्त तक लुप्त
२६. उदय एव for (उदया एव)

अथ नक्षत्राणां अस्तात् अस्तपर्यंतं उदयादुदयपर्यन्तं मध्यान्हात् मध्यान्ह-पर्यंतं[1] समानः[2] कालो[3] भवति । यन्नक्षत्रं याम्योत्तरवृत्ते भवति, वा[4] अधोभागे[5] भवति,[6] तमुदयादस्तपर्यंतं[7] अस्तादुदयपर्यंतं च निरक्षे समः[8] कालो भवति । अथवा नाडी-वृत्ते[9] समानकालो भवति, साक्षादेशे[10] उदयास्तपर्यन्तं[11] नक्षत्राणां[12] कालो[13] समानो[14] न न भवति । कुतः[15] अहोरात्रचापानां न्यूनाधिकयत्वात्[16] एवं अधोभागकालोपि[17][18]। एवमेव[19][20] येषां ग्रहाणां[21] बोध्यः[22] साक्षदेशे दृश्यध्रुवदिक्कनक्षत्राणां उपरितनकालः अधोदेशकालादधिको भवति । एतद्वैलोम्येन[23] द्वितीयध्रुवदिक्कनक्षत्राणां भवति, प्रत्येकग्रहस्य[24] उदयान्मध्यपर्यन्तं मध्यादस्तपर्यंतं[25] कालः[26] सः[27][28] अस्तान्मध्यकाल-[29]

---

(क) १. +सर्वेषां+ २. समान for (समानः)
३. कालमेव for (कालो) ४-५-६. लुप्त
७. तस्य उदयात् अस्त पर्यंतं for (तमुदयादस्तपर्यंतं) (ख)
८. विसर्ग लुप्त १०. साक्षदशे for (साक्षादेशे)
११. उदयादस्त (पर्यंतं) for (उदयास्त पर्यंतं)
१२. +अस्तादुदय+ १३ कालः for (कालो) (ख)
१५. 'कुतः' लुप्त
१६. न्यूनाधिक्यत्वात् for (न्यूनाधिकयत्वात्)
१७-१८-१९-२०-२१. लुप्त
२२. +एक नक्षत्रस्यापि कालद्वयं समानं न भवति । अहोरात्रस्य उपरि यच्चापं यश्चाधस्तयोरसाम्यात् एवमेवान्येषां ग्रहाणां भवति । प्रत्येक ग्रहस्य उदया-न्मध्य+
२५. +च समान+ २६. काल for (कालः)
२७. 'सः' लुप्त २८. +एव भवति एवं+
२९. 'काल' लुप्त (ख)

(ख) ८. समानः for (समान) ६. साक्षदेशे for (साक्षादेशे)
१४. 'न' लुप्त १९-२०. एवमेवान्येषां for (एवमेव येषां)
२१. गृहाणां for (ग्रहाणां)
२३. एतद्वैलोम्येन for (एतद्वौलोम्येन) १४. गृहस्य for (ग्रहस्य)
२५-२६-२७, च समानकाल एव भवति for (कालः सः)
२८. +एवं+

पर्यंतमध्यादुदयपर्यंतं यः[1] कालः श्चेतौ[2] क्रमेण[3] समानौ न भवतः, परं च निरक्ष-क्षितिजे समानौ स्तः। अत एव निरक्षस्थले ये[4] नक्षत्रसमानकालमेव[5] याम्योत्तर-वृत्ते सहैव गच्छतमे[6] समानकालमेवोदयास्तौ करिष्यतः। तावत् यावदेष्टां[7] गतौ[8] महदन्तरं[9] पतति, यद्दृष्टां[10] गतावान्तरं[11] बहु भवति, यानि नक्षत्राणि युगपत्मध्यान्हवृत्त-[12]गतानि भवन्ति[13]। तान्यपि समकालं तदा नैवोदयं प्राप्नुवन्ति। अपि च केषांचिन्न-क्षत्राणामिदं भवति, न तु सर्वेषां।

अथ येषां भवति, तानि अयनवृत्तादुदयांशांतरप्रमाणेन तानि चलित्वा द्वितीयायना तावरं[14] तरितानि यदा भविष्यन्ति। तदा तानि सहैव मध्यान्हवृत्त-गतानि[15] भवन्ति[16]।

अथैतद्विचारार्थं अवजं[17] आयन वृत्तार्द्धं[18] कार्यं अदहजं नाडिकामण्डलार्द्धं[19] कार्यं व चिह्नं ध्रुवस्थानं कार्यं, भ चिह्नं च कदंब स्थानं वचिह्नं ध्रुववृत्तस्यान्यच्च[20] वद-

(क) १. +समान कालो भवति। अथ उदयान्मध्यपर्यंतं मध्यादस्तपर्यंतं कालः सः अस्ता-न्मध्यकालपर्यंतं मध्यादुदयपर्यंतं+ (ख)

५. नक्षत्रे for (नक्षत्र) (ख) ६. गच्छतः ते for (गच्छतमे) (ख)

७. यावदेषां for (यावदेष्टां) (ख) ८. गमतौ for (गतौ)

९. +न+(ख) १०. यद्दृष्ट for (यद्दृष्टां)

११. गतवन्तरं for (गतावांतरं) (ख)

१२. युगपन्मध्यान्ह for (युगपत्मध्यान्ह) (ख)

१३. +नक्षत्राणि+

१४. तावदन्तरितानि for (तावरन्तरितानि) (ख)

१७. अथवज for (अवजं) १८. वृत्तार्द्धं for (वृत्तार्द्धं)

१९. मण्डलार्द्धं for (मण्डलार्द्धं)

२०. +तचिन्हं च नक्षत्रद्वयं ध्रुववृत्तस्य वहचापे कल्पितं+ (ख)

(ख) २. श्चैतौ for (श्चेतौ) ३. क्रमेण for (क्रमेण)

४. यो for (ये) १०. यदेतेषां for (यद्दृष्टां)

१५. गतार्द्धं for (गतानि) १६. "भवन्ति—विचारार्थं" लुप्त

१७. "अवजं—वृत्तार्द्धं" लुप्त

चापं कार्यं । पुनः अवदकोणो जवहकोणतुल्यः कार्यः । पुनर्भ[1]वमभकाले च द्वे कदंब-वृत्ते काय । तत्र ववभ[2]कोणज्या[3] कवम[4]कोणज्या च समाने स्तः । एवं च[5] वम[6]त्रिभुजे प्रथमकोणज्या ववभकोणज्ययोर्न्निष्पत्तिः वम[7]चापज्या वम[8]चापज्ययोर्न्निष्पत्ति-तुल्यास्ति । मकव[9]त्रिभुजे द्वितीयकोणज्या वकभ कोणज्ययोर्न्निष्पत्ति[10] वभतुल्यमक[11]-चापज्या वभ[12]चापज्ययोर्निष्पत्तितुल्यास्ति । तत्र ववमवकभ[13]कोणद्वयस्य[14] ज्ये समाने स्तः । तस्मात् एतौ कोणावपि समानौ कलवमे च समाने मकमवयोः[15] समानत्वात्[16] मलनममत[17] कोणद्वयं समानमस्ति । तस्मात्कलनत्रिभुजे[18] पभूतत्रिभुजे लनभुज-मतभुजौ समानौ स्तः । यदि नभचापं[19] द्वयोर्योज्यते, तदा लभ[20]चापं कवरूपं नत-चापस्य समानमस्ति । यदि वनक्षत्रं वकचापं[21] तुल्यं गच्छति, तदा त नक्षत्रं[22] तनचाप-तुल्यं गच्छति द्वयमपि युगपदेव ध्रुववृत्तस्य वः[23] दचापे आगमिष्यतः । तस्मात् तयोः

---

(क) १. +पुनर्वचिन्हं तचिन्ह च द्वितीयगत्या वकचापे तलचापे चलितं+

२. ब for (व)

३. 'ज्या' लुप्त

४. कवभ for (कवम)

५. 'च' लुप्त

६. वभ for (वम) (ग)

७. वभ for (वम)

८. वभ for (वम) (ख)

९ भवक for (मकव)

१०. निष्पत्तिः for (न्निष्पत्ति)

११. भकभ for (मक)

१३. ववभवकभ for (ववमवकभ) (ख)

१४. +ज्याव+

१५. भकभवयोः for (मकमवयोः) (ख)

१६. +भलभमयोरपि समत्वात्+

१७. भलनभमत for (मलनममल)

१८. त्रिभुज्येवमत for (त्रिभुजेपभूत)

१९. नमचापं for (नभचापं) (ख)

२०. नम for (लभ)

२१. चाप for (चापं)

२२. तत् नक्षत्र for (त नक्षत्रं) (ख)

२३. व for (वः) (ख)

(ख) ५-६. बवभ for (चवम)

२. भकव for (मकव)

१२. बभच्छाप for (वभचाप)

१८. वमत for (पभूत)


२०. लम for (नभ) (ख)

साद्धं मेवोदयास्तौ [1]भविष्यतः । यथा [2]वहः ध्रुवचापे साद्धं[3]मेवोदितौ साद्धमेवास्तं [4]गतौ भवतः इक्ष्मेवास्माकमिष्टं ।

अथ निरक्षदेशादन्यत्र [5]साक्षादेशे दृश्यध्रुव दिश्यैकध्रुव वृत्तगते नक्षत्रे[6] ये [7]भवतः, [8]तयोर्मध्ये [9]ध्रुवासन्नं [10]नक्षत्रं प्रथमम[11]मुदितं भवति, [12]रहस्थं [13]च [14]तदनन्तर [15]उदेति । [16]अदृश्यमान-[17]ध्रुवदिशि [18]एतस्मात् [19]विपरीतं [20]भवति[21]। नक्षत्राणां सूर्येण सह नव प्रकाराः भवन्ति । नक्षत्रं प्रातरुदेति [22]अयं [23]प्रकार यदा नक्षत्रं सूर्य[24]विहितं भवति । अयं प्रकारस्त्रिविधः । नक्षत्रं सूर्योदयात् पश्चा[25]दुदेति वा सूर्येण सहैवोदेति, अनयोः प्रकारयोः नक्षत्रं दृ[26]ग्गोचरं न भवति । यदा नक्षत्रं सूर्योदयात् पूर्वं उदेति तदा नक्षत्रं दृ[27]ग्गोचरं भवति ।

---

(क) १. भवतः for (भविष्यतः) (ख) २. बह for (वहः) (ख)
३. सार्द्ध for (साद्ध) (ख) ४. गतौ for (गतो) (ख)
५. साक्षदेशे for (साक्षादेशे) (ख) ६-७. लुप्त
८. तन्मध्ये for (तयोर्मध्ये) ९. अनुस्वार लुप्त
१०. नक्षत्रस्य for (नक्षत्र) ११. मुदयो for (मुदितं)
१२-१३-१४-१५-१६-१७-१८-१९-२०, लुप्त
२१. +ध्रुवात् दूरस्थस्य पश्चाद्भवति एतेषामस्त विलोमेन भवति । अथ याः संस्थाः नक्षत्राणां क्षितिजानुसारेण च तास्त्रिधा उदय अस्तमध्य संज्ञाः भवन्ति+
२२. अयमेव for (अयं) २३. प्रकारः for (प्रकार) (ख)
२४. सन्निहितं for (विहितं) (ख)
२५. +पूर्वं उदेति तदा नक्षत्रं दृग्गोचरन्न भवति+
२६. 'ग्' लुप्त
२७. दृग्गोचर for (दृग्गोचरं)



(ख) ११. ममुदितं for (मुदितं)
१२. दूरस्थं for (रहस्थं)
१५. मुदेति for (उदेति)

### अथ द्वितीय प्रकारः

तत्रापि प्र[१]कारत्रयं सूर्योदये य[२]न्नक्षत्रं [३]याम्योत्तरं [४]भवति[५] वा सूर्योदयानन्तरं [६]वा पूर्वं[७]। अत्र सूर्योदयात्पूर्वं याम्योत्[८]तरस्य नक्षत्रं दृग्गोचरं भवति नान्यत्।

### अथ तृतीय प्रकारः

तथैव सूर्योदयेस्तमायाति सूर्योदयानन्तरमस्तमायाति सूर्योदयात् पूर्वं वा[९]। अ[१०]त्र सूर्योदयात् पूर्वमस्[११]तंगतं दृग्गोचरं भ[१२]वति।[१३]

### अथ चतुर्थ प्रकारः

यदा नक्षत्रसूर्यौ उप[१४]रि खण्डे भवतः वा अधः खण्डे भवतः वा सूर्यः अधः खण्डे नक्ष[१५]त्रं उपरि खण्डे वा नक्षत्रं अधः खण्डे भवति, सूर्यः उपरिखण्डे भवति। तदा तृतीय प्रकारे दृश्यं भवति।

### अथ ष[१६]ष्ट प्रकारः

सू[१७]र्यः याम्योत्तरस्थो भवति। त[१८]त्र य[१९]दि नक्षत्रस्य अस्तो भवति, त[२०]त्र सूर्यः अधः खण्डे चेत् दृश्यं भवति, उपरिखण्डे चेत् दृश्यं न भवति।

---

(क) १. 'र' लुप्त
२. 'यन्' लुप्त
३. याम्योत्तरे for (याम्योत्तरं)
५. 'वा' लुप्त
६. च for (वा)
७. पश्चात् for (पूर्वं)
८. याम्योत्तरस्थं for (याम्योत्तरस्य) (ख)
९. +सार्द्धं वा पश्चात्+
१०. तत्र for (अत्र)
११. मस्तं for (मस्त) (ख)
१२. +नान्यत्+
१३. +यदा सूर्यो याम्योत्तर वृत्तस्य अधोभागे भवति तदा उदितं नक्षत्रं दृश्यं भवति ऊर्ध्वविभागे भवति, चेत् दृश्यं न भवति। अथ पंचमप्रकारः+
१४. +याम्योत्तर वृत्तस्य+
१५. अनुस्वार लुप्त
१६. 'ष्ट' लुप्त
१७. +यदा+
१८. तदा for (तत्र)
१९. 'यदि' लुप्त
२०. 'तत्र' लुप्त

(ख) ४. +वृत्तस्थं+
७. पूर्वं for (पूर्वं)
१३. +यदा सूर्यो याम्योत्तर वृत्तस्थो अधोभागे भवति। तदा उदितं नक्षत्रं दृश्यं भविष्यति। ऊर्ध्वविभागे भवति, चेत् दृश्यं न भवति। अथ पंचमप्रकारः+

अथ सप्तम प्रकारः

सूर्यास्तसमये[1] यदि[2] नक्षत्रोदयः तत्र[3] सूर्यास्तानन्तरमुदितं दृश्यं भवति, अस्तसमये अस्तात् पूर्वं[4] उदितं दृश्यं न भवति। अष्टम प्रकारे सूर्यास्त समये याम्योत्तरस्थं भवति। सूर्यास्तानन्तरं याम्योत्तरस्थं भवति, चेत्[5] दृश्यं न[6] भवति। नवम प्रकारे सूर्यास्तसमये नक्षत्रस्तो[7] भवति। सूर्यास्तानन्तरमस्तं गतं भवति, चेत् दृश्यं भवति नान्यथा।

इति चतुर्थप्रकरणम्।

---

(क) १. 'स' लुप्त
२. 'यदि' लुप्त
३. 'तत्र' लुप्त
४. पूर्वं वा for (पूर्वं उदितं)
५. 'त्' लुप्त (ख)
६. 'न' लुप्त
७. नक्षत्रस्यास्तो for (नक्षत्रस्तो)

—:o:—

## अथ [1]पंचम प्रकरण

[2]यन्नक्षत्र सूर्यसहितं उदेति अथवा याम्योत्तरस्थं भवति । [3]चा अस्तंगतं भवति । तस्य विचारः क्रियते । यदा नक्षत्र उदितं भवति, तदा [4]क्षितिजेस्थ-क्रान्तिवृत्तप्रदेशज्ञानेन उदयो ज्ञायते । एवं याम्योत्तर[5]वृत्तस्य क्रान्ति- वृत्त प्रदेश-ज्ञानेन याम्योत्तरस्थं ज्ञायते । [6]तदा तत्र यः क्रान्तिवृत्तप्रदेशो लग्नः [7]तत् ज्ञानार्थं प्रथमक्षेत्रं अवजद[8]मायनवृत्तं कल्पितं, अहजं नाडीवृत्तार्द्धं कल्पितं, भचिन्हं ध्रुवः वहदं क्रान्ति[9]वृत्तार्द्धं वचिन्हं कदंबः वकलं नक्षत्रविंवोपरिगतं करं कदंव वृत्तं तचिन्हं नक्षत्र विंवंभमनं नक्षत्रगतं ध्रुव[10]वृत्तं [11]कचिन्हं [12]ध्रुवक तकचापं शरः इदं द्वयं ज्ञातमस्ति । [13]तनचापं स्पष्ट क्रांतिरस्ति [14]भचिन्हं [15]आयनं [16]दृकर्म संस्कृतो भवति । [17]न चिह्नं [18]आयुन दृक्कर्म संस्कृतस्य [19]विषुवांशाः भवन्ति । इदमपि ज्ञातं भवि-[20]ष्यति । अत्रोपपत्तिः अवनत क्षेत्रे व [21]अत्रा [22]यज्या मम्र चापज्ययोन्नि[23]ष्पत्तिः तयो-


---

(क) १. 'म' लुप्त
२. 'यन्' लुप्त
३. वा for (चा) (ख)
४. क्षितिजस्थ for (क्षितिजेस्थ) (ख)
५. वृत्तस्थ for (वृत्तस्य)
६. +एवं अस्तक्षितिजलग्नं क्रांतिवृत्तप्रदेशज्ञानेन अस्तो ज्ञायते तत्प्रदेशज्ञानं ध्रुवकशरयोर्ज्ञानेन भवति नक्षत्रं यदा याम्योत्तरस्थं भवति+ (ख)
७. यद् for (तत्)
८. म for (मा)
९. वृत्तार्द्धं for (वृत्तार्द्धं) (ख)
१०. गतं for (वृत्तं)
११. अनुस्वार लुप्त
१२. ध्रुवकः for (ध्रुवक) (ख)
१४. म for (भ) (ख)
१५. अयन for (आयन)
१६. दृक्कर्म for (दृकर्म)
१७. म for (न)
१८. अयन for (आयन)
१९. +स्थानं नचिन्हं तस्य+
२०. भवति for (भविष्यति)
२१. अचापज्या for (अत्रायज्या) (ख)
२२. भ for (म)
२३. निष्पत्तिः for (न्निष्पत्तिः) (ख)

(ख) १. पंचमं for (पंचम)
१३. तनु for (तन)
१५. आयन for (आयनं)

न्निष्पत्योर्घातरूपास्ति । तयोः कयोः वलचापज्या[1] तलचाप[2] ज्ययोर्या[3] निष्पत्तिः[4] तन-चापज्या नभचापज्योर्या[5] निष्पत्तिः[6]। एतयोर्घातरूपा[7] सास्ति । यदि प्रथमनिष्पत्तिः घातात्शोध्यते[8] तदा द्वितीयनिष्पत्तिरवशिष्यते । तस्मात् ननचापं[9] ज्ञातं[10][11][12]। एतत् ज्ञानार्थं लकचापं नक्षत्रध्रुवकस्यान्यक्रांतिः ज्ञानायोपायः[13]। तत्र हक्चाप[14] नक्षत्र-ध्रुवकं विषुवांशं[15] प्रकल्प्य निरक्षविषुवांशसारिण्यां लग्नवत् चापं कार्यं। तत् हलचापं भविष्यति[16]। पुनरनुपातः[17] त्रिज्यया पर क्रान्तिज्या लभ्यते । तदा हलज्यया[18] किमिति[19] तच्चापं कलचापं प्रकारांतरं हकलत्रिभुजे लकोण कोटिज्या हकभुज-[20] कोटिज्ययोर्न्निष्पत्तिः[21] हकोण[22][23] त्रिज्ययोर्न्निष्पत्तितुल्यास्ति । तस्मात्[24] लकोण-ज्ञानं भविष्यति । पुनर्हकोणकोटिज्या लकभुजकोटिज्ययोर्न्निष्पत्तिः[25][26] लकोणज्या

(क) १. +या+
२. लत for (तल)
३. 'र्या' लुप्त
४. निष्पत्ति: for (निष्पत्तिः)
५. ज्ययो for (ज्योर्या)
६. निष्पत्ति: for (निष्पत्तिः)
७. र्घातरूपा for (र्धातरूपा) (ख)
८. घातनिष्पत्तेः for (घातात्शेध्यते)
९. अनुस्वार लुप्त
१०. ज्ञानं for (ज्ञातं)
११. +भवति+(ख)
१३. +तद्+(ख)
१४. +रूप+ (ख)
१५. विषुवांशं for (विषुवांश)
१६. भवष्यति for (भविष्यति)
१७. रनुपातः for (रनुपातः) (ख)
१८. +चाप+(ख)
१९. 'ति' लुप्त
२०. हाक for (हक)
२१. विसर्ग लुप्त (ख)
२२. हं कोण for (हकोण) (ख)
२३. +ज्या+
२५. ज्यायोर्न्निष्पत्ति: for (ज्ययोर्न्निष्पत्तिः)
२६. न्निष्पत्ति for (न्निष्पत्ति) (ख)



(ख) १२. एतद् ज्ञानार्थं for (एतत् ज्ञानार्थं)
२४. तस्माल्ल कोण for (तस्मात् लकोण)
२६. न्निष्पत्तिः for (न्निष्पत्तिः)

त्रिज्ययोर्न्निष्पत्ति तुल्यास्ति । अस्माल्लकज्ञानं[1] भविष्यति । पुनः, प्रकारांतरं हकचापज्यालकं[2] चापछाययोर्न्निष्पत्तिः त्रिज्या हकोणछाययो न्निष्पत्तितुल्यास्ति[3]।

अथ तनचापज्ञानार्थमुपायांतरं लवचापं[4] सचिह्नं[5] कदंबपर्यन्तं वर्द्धनीयं तद्वा[6] तलनत्रिभुजे[7] लकोणो[8] समानौ स्तः । नकोण अकोणौ[9] च समकोणौ[10] स्तः । तस्मात् तन चापज्यातलचापज्ययोर्न्निष्पत्तिः तथास्ति,[11] यथा असचापज्या सलचापज्ययो न्निष्पत्तिरस्ति[12]। तस्मात्तनचापमपि ज्ञातं भविष्यति । पुनरपि प्रकारांतरं हलक-त्रिभुजे हकोणस्य कोटिज्या त्रिज्ययोर्न्निष्पत्तिः हलचाप[13] कोटिछाया[14] हकचाप कोटि-छाययोर्न्निष्पत्ति तुल्यास्ति । तस्मात्तू हल[15] चापमपि ज्ञातं भविष्यति । पुनर्हल-चापकोटिछाया लकचापकोटिछाययो र्न्निष्पत्तिः लकोण कोटिज्या त्रिज्ययो-न्निष्पत्ति[16] तुल्यास्ति । अस्मात् लकोणज्ञानं भविष्यति । पुनर्लंलत[17]त्रिभुजे तल[18]-कोटिज्या त्रिज्ययोर्न्निष्पत्तिः लकोण कोटिछाया[19] तकोण छाययो[20]र्न्निष्पत्ति तुल्या-स्ति । तस्मात्त कोणज्ञानं भविष्यति । पुनर्न्[21]तंलन[22] त्रिभुजे तकोणज्या नलचापज्ययो

---

(क) १. +चाप+(ख)
२. अनुस्वार लुप्त
४. तल for (लव) (ख)
५. अनुस्वार लुप्त (ख)
६. तदा for (तद्वा) (ख)
७. +लसअत्रिभुजे+(ख)
८. ल कोणौ for (ल कोणो) (ख)
९-१०. लुप्त
११. 'स्ति' 'यथा' लुप्त
१२. निष्पत्ति for (न्निष्पत्ति) (ख)
१३. चापस्य for (चाप)
१४. +च+
१५. तस्मात् for तस्मात्तृ)
१६. निष्पत्ति for (न्निष्पत्ति) (ख)
१७. तंलन for (लंलत) (ख)
१८. तलन for (तलकोटि)
१९. 'या' लुप्तं
२०. छायया for (छाययो)
२१. पुनः for (पुन)
२२. तंलन त्रिभुजे for (पुनर्न्तंलन त्रिभुजे) (ख)

न्निष्पत्तिः त्रिज्यातलचापज्ययो न्निष्पत्ति[1] तुल्यास्ति । पुनर्त्त[2] कोणछाया[3] लन-चापयो[4] छाययोर्न्निष्पत्तिः त्रिज्या तनचापज्ययो र्न्निष्पत्ति वंक्ष्यमाण[5] निष्पत्योर्घात[6]-रूपास्ति[7]। वक्ष्यमाण[8] नि-तुल्यास्ति[9]। तस्मात्तन चापज्ञानं भविष्यति । पुनः अवनत-क्षेत्रे[10] मवचापज्या[11] चअचापज्ययो[12][13]र्न्निष्पत्ति वंक्ष्यमाणनिष्पत्योर्घातरूपास्ति[14]। वक्ष्य-माणनिष्पत्तिर्यथा[15][16] एकामतचापज्या[17] तनचापज्ययो र्न्निष्पत्तिः द्वितीया लतचापज्या[18] लअचापज्ययो र्न्निष्पत्तिः[19]।

अथ यदि प्रथमनिष्पत्ति घातनिष्पत्तेः[20] शोध्यते। तदावशिष्टा[21] द्वितीय-निष्पत्तिः तनिष्पत्तेः[22][23] शोध्यते तदा वशिष्टा[24] द्वितीय[25] निष्पत्तिः[26] स्यात्। तस्मात् लनचाप ज्ञानं भविष्यति।

*पुनः अन चापात् वभचाप[27] ज्ञानं भविष्यति। इदं कर्क स्थानात् मकरस्थाना-द्दाद्रक्कर्म[28] संस्कृतस्यांतरजातं[29]। पुनः प्रकारांतरं तलनत्रिभुजे लनकोटिज्यातलकोटि-

---

(क) २. पुनः तलन त्रिभुजे for (पुनर्त्त)    ३. तकोण for (त्तंकोण)
४. 'यो' लुप्त (ख)
५-६-७-८-९ लुप्त    ११. भव for (मव) (ख)
१३. ज्या अनयो for (ज्ययो)    १४. वंक्षमाण for (वंक्ष्यमाण) (ख)
१५. निष्पत्ती for (निप्पत्ति)    १६. यथा for (र्यथा)
१८. लन for (लत) (ख)    १९. न्निष्पत्तिः for (न्निष्पत्तिः)
२०. +यदि+    २२-२३-२४-२५-२६. लुप्त
*इदं मार्जिने लिखितमस्ति ।
२७. वम for (वभ) (ख)    २८. दृक्कर्म for (द्रक्कर्म)
२९. संस्कृतस्यान्तरं for (संस्कृतस्यान्तर) (ख)

(ख) १. न्निष्पत्ति for (न्निष्पत्ति)
८. 'वंक्ष्यमाण—वक्ष्यमाणनि" लुप्त    १०. क्षेत्रो for (क्षेत्रे)
१२. व for (च)    १७. भत for (मत)
२१. "तदावशिष्टा - शोध्यते" लुप्त

ज्ययो र्न्निष्पत्तिः[1] त्रिज्या तनकोटिज्ययो र्न्निष्पत्तितुल्यास्ति[2]। तस्मात् लनचाप-ज्ञानं भविष्यति। पुनः प्रकारांतरं तलत[3] त्रिभुजे लसग्र त्रिभुजे लनचापज्या नतचाप छाययो र्न्निष्पतिः[4] लग्रचापज्या ग्रसचाप छाययो र्न्निष्पत्तितुल्यास्ति।

## ग्रथ द्वितीय क्षेत्रम्

तत्र आक्षज दृक्कर्म संस्कृतांशज्ञानं, तत्र ग्रवजद[5] याम्योत्तरवृत्तं कार्यं। ग्रहृजं नाडी मंडलार्द्धं कल्पनीयं। भचिन्हं ध्रुवस्थानं वहदं क्षितिजार्द्धं कल्पनीयं। चिन्हं[6] नक्षत्रस्थानं[7] भवतं[8] नक्षत्रगतं ध्रुववृत्तं कल्पनीयं[9]। तस्मात् अहभवक्षेत्रे मवचापज्या[10] व ग्र चापज्ययोर्न्निष्पत्तिः[11] वक्ष्यमाणनिष्पत्योर्घातिरूपास्ति[12]। ते यथा एकाभवषापज्या तवचापज्ययोर्न्निष्पत्तिः[13]। द्वितीया[14] तत्रापज्या[15] हृग्र चापज्ययो-[16]र्न्निष्पत्तिः। तस्मात् हृ[17] चाप ज्ञानं भविष्यति। पुनस्तहतुल्यं तक चापं द्वितीयदिशि प्रकल्प्यं[18]। तस्मात्तचिन्हं नाडीवृत्तस्य स चांशोस्ति, यो नक्षत्रेण सार्द्धं[19] याम्योत्तर-वृत्तगतो भविष्यति। स च ज्ञातोस्ति। हृ चिन्हं नाडीवृत्तस्य स चांशोस्ति, यः नक्ष-

---


(क) १. न्निष्पत्तिः for (न्निष्पत्तिः) (ख)
३. तलन for (तलत) (ख)
४. न्निष्पत्तिः for (न्निष्पत्तिः)
५. ग्रवजाद for (ग्रवजद)
६. +व+(ख)
७. नक्षत्रोदय for (नक्षत्र स्थानं)
८. क्षितिज स्थानं क्षितिज स्थानं+
९. कल्पनियं for (कल्पनीयं)
१२. वक्षमाण for (वक्ष्यमाण)
१३. विसर्ग लुप्त (ख)
१४. द्वितीया for (द्वितीया) (ख)
१५. तहृ चापज्या for (तत्रापज्या)
१७. + त + (ख)
१८. प्रकल्पां for (प्रकल्प्यं)
१९. नक्षत्रसार्द्धं for (नक्षत्रेण सार्द्धं)

(ख) २. न्निष्पत्ति for (न्निष्पति)
१०. भव for (मव)
११. न्निष्पत्तिः for (न्निष्पत्तिः)
१६. चाप ज्यो न्निष्पत्तिः for (चापज्ययोर्न्निष्पत्तिः)

त्रेण साद्धं पूर्वक्षितिजसंलग्नो भविष्यति[1]। क[2] त्रिन्हं नाडीवृत्तस्य स चांशोस्ति। ये[3] तेनैव नक्षत्रेण साद्धं पश्चिमक्षितिजसंसक्तो भविष्यति[4]। अस्योपपत्तिः नक्षत्रस्य उदयसमये दिगंश कोटिः अस्तसमये दिगंशकोटिः[5] अनयोः साम्यं भवति।

अथ नक्षत्रस्य अहोरात्र[6] गत्यनुसारेण प्रथमदिनार्द्धचापं तम[7] अकोणरूर्ध[8] हतचापोन[9] नवत्यंश[10]तुल्यं[11] यत अचापं एकं[12] चापं भवति। एवमेव द्वितीय दिनार्द्धं चापं[13] तत्कोणतुल्य तच्चापतुल्यमेवान्यच्चापं भवति। तस्मात् दिनचापं भार्द्धांशा-न्यूनं[14] भवति। द्विगुण[15] हतचाप[16]तुल्यहकचापप्रमाणेन तस्य दिनचापं भार्द्धांशा-न्यूनं[17] भविष्यति। यदि स्पष्टक्रांति दक्षिण[18]दिक्काभ[19] विवद्युत्तर[20] दिक्का स्पष्टक्रान्ति-र्भवति। तस्य दिनचापं भार्द्धांशेभ्यः तदंतरप्रमाणेनाधिकं भवति[21]। यदि नाडि[22]-

(क) १. भविष्यति for (भविष्यति)
२. + चि +
३. यस्तेनैव for (ये तेनैव)
४. + अनयोर्ज्ञानं तचापेन भविष्यति +
५. विसर्ग लुप्त
६. रात्र for (रात्र) (ख)
७. तम for (तम) (ख)
८. रूर्ध for (रूर्ध) (ख)
९. हतचाप तुल्यं for (हतचापोन)
१०. नवत्यंशेभ्यो for (नवत्यंश)
११. न्यूनं for (तुल्यं)
१२. + तद्रूपं +
१३. चापे for (चापं)
१४. न्यूनं for (न्यून)
१५. + हतचाप +
१६. 'हतचाप' लुप्त
१७. न्यूनं for (न्यूनं) (ख)
१८. दक्षिण for (दक्षिण) (ख)
१९. भवति for (भवि)
२०. यद्युत्तर for (वद्युत्तर)
२१. + अथ +
२२. नाडी for नाडि (ख)




(ख) ३. यः for (ये)
१६. 'चापतुल्य—तस्य दिन' लुप्त

वृत्तस्य तेषां[1] ज्ञाता भवन्ति । ये नक्षत्रेण[2] सार्द्धं[3] पूर्वक्षितिजे याम्योत्तरवृत्ते पश्चिमक्षितिजे च गच्छंति । तेभ्यः तादृशा एव क्रान्तिवृत्तांशा विषुवांशसारणीतः[4] वा स्वोदयांशसारणीतो[5] ज्ञाता[6] भविष्यन्ति । एतद् ज्ञानेन येषु कालेषु सूर्येण सार्द्धं येंशाः पूर्वक्षितिजयाम्योत्तर वृत्त ग्रस्त क्षितिजगता[7] भवन्ति । तत्कालज्ञानमपि भविष्यति ।

इति पंचमप्रकरणं समाप्तम्

---

(क) १. तेंशा for (तेषां) (ख)
२. येन क्षेत्रेण for (ये नक्षत्रेण)
३. सार्द्धे for (सार्द्धं)
४. विसर्ग लुप्त
५. स्वोद यांश for (स्वोदयांश) (ख)
६. ज्ञाता: for (ज्ञाता)
७. गता: for (गता)

—०O०—

### अथ षष्ट प्रकरणम्

त[1]त्र नक्षत्राणामुदयास्तज्ञानं नि[2]रूप्यते। तत्र नक्षत्राणां ध्रुवकज्ञानेन शरज्ञानेन च नक्षत्रोदयास्तज्ञानं न भवति। यथा आप[3]नदृक्कर्म संस्कृतज्ञानं न[4] भ[5]वति, य[6]था आक्ष[7]ददृक्कर्म संस्कृतज्ञानं शर[8]ज्ञाने[9]न भव[10]ति। यतः एतेषां नक्षत्राणामुदयास्तौ नक्षत्रप्रमाणानां विलक्षणत्वात् शररूपाणामपि विलक्षणत्वात् क्षितिजक्रान्तिवृत्त[11] संपातं कोणानामपि विलक्षणत्वात् एकरूपौ न भवतः।


### अथ तृतीय क्षेत्रम्

तत्रास्य विचारो निरूप्यते। अवजद याम्योत्तरवृत्त कल्पनीयं। अहजं क्रान्तिवृत्तार्द्ध[12] वहदं क्षितिजार्द्धं व चिन्हं खमध्यः यन्नक्षत्रं प[13]रं न्यूनाधिक प्रमाणमस्ति। तयोर्महत्प्रमाणं हचिन्हात् यावदंतरेण क्षितिजे उदेति। तावतैवांतरेण न्यूनप्रमाणमपि उदेति। तत्र[14] सूर्यश्च ह[15]जचापतुल्यः क्षितिजादधस्ताद्भवेत्। तदा वृहत् प्रमाणं नक्षत्रं दृश्यं भविष्यति। लघु प्रमाणनक्षत्रस्योदयस्तु ह[16]जचापात् अधिकांत[17]रेण सूर्यो भविष्यति, चेत्[18] भवति, कुतः अधिकांतरस्थे सूर्ये[19] क्षितिजोपरि प्रभायाः अल्पत्वात् यदि एकप्रमाणं नक्षत्रद्वयं ह चिन्हाद[20]का रूपांतरे न भवति। तत्र महदं-

---

(क) २. लुप्त
३. अयन for (आपन) (ख)
४-५-६. लुप्त (ख)
८-९. लुप्त
१०. + ध्रुवकशराभ्यां च +
११. अनुस्वार लुप्त (ख)
१२. वृत्तार्द्धे for (वृत्तार्द्ध)
१३. परस्परं for (परं)
१४, 'तत्र' लुप्त
१५. हभ for (हज)
१६. हभ for (हज)
१७. अधिकारान्तरेण for (अधिकान्तरेण)
१८. + तदा +
२०. देकरूपांतरे for (देकारूपांतरे) (ख)

(ख) १. अत्र for (तत्र)
७. आक्ष for (आक्षद)
१०. संपात for (संपातं)
१२. वृत्तार्द्ध for (वृत्तार्द्ध)
१९. सूर्य for (सूर्ये)



तरं कं नक्षत्रं हज चापतुल्यांतरस्थे रवौ क्षितिजाधस्थिते दृश्यं भविष्यति। अल्पांतरमृक्षं क्षितिजाधः हभ[2] चापाऽधिके रवौ दृश्यं भवेत्।

अथ ये द्वे नक्षत्रे एकप्रमाणके हचिन्हात् क्षितिजे एकरूपांतरे भवतः। तत्र एकस्य उदये दहभ कोणोधिको भवति। सूर्यश्च हभचापतुल्यः अधोभागे भवति। तन्नक्षत्रं चे दृश्यते तदा द्वितीय नक्षत्रं, तदा दृश्यते यदा हम[3]चापाधिकांतरेण रविरधस्थो भवति। अस्योपपत्तिः यदि वभकं दृ[4]ग्वृत्तं चापं सूर्य[5]गतं कल्प्यते[6]। अस्य वृत्तस्य मत[7]चापतुल्यं रविश्चेदधो भागे कल्प्यते। एतदंतरेण[8] यद्येकं[9] नक्षत्रं दृश्यते। पुनः[10] यन्नक्षत्रं एतत् नक्षत्र[11] प्रमाणतुल्यं भवति। सूर्यस्योदयस्थानात् तन्नक्षत्रांतं[12]रतुल्यं[13] भवति। तन्नक्षत्रं यदा सूर्यो मत[14]चापतुल्यांतरेण अधस्यो[15] भवति। तदा दृश्यते, इदं च प्रकटमेवास्ति। हमत[16] त्रिभुजे मत[17]चापं किंचित्प्रमाणमस्ति। तत्र यथाह यथा[18] कोणोस्मि[19], त्रिभुजेऽधिको भविष्यति[20]। तथा हम[21] चापं च[22] न्यूनं भवति।

---

(क) १. महदन्तरेकं for (महदन्तरकं) २. हभं for (हभ)
३. हभ for (हम) (ख)
४. अनुस्वार लुप्त, (ख) ६. कल्पते for (कल्प्यते)
७. भत for (मत) ८. एतदन्तरतुल्यांतरेण for (एतदन्तरेण)
९. अन्यदेकं for (यद्येकं) १०. तदा for (पुनः)
१२. अनुस्वार लुप्त १३. + चेद् +
१४. भत for (मत) (ख) १५. अधस्थो for (अधस्यो) (ख)
१६. हभत for (हमत) (ख) १७. भत for (मत)
१८. 'यथा' लुप्त १९. स्मिन्त्रि for (स्मित्रि)
२१. हभ for (हम) (ख) २२. 'च' लुप्त

(ख) २. हभ for (हम)
५. सूर्यगतिः for (सूर्यगतं) ८. 'एतदन्तरेण—दृश्यते' लुप्त
११. एतन्नक्षत्र for (एतत् नक्षत्र) १८. यथा यथाह for (यथाहयथा)
१९. कोणोस्मिन् त्रिभुजे for (कोणोस्मि त्रिभुजे)
२०. भवति for (भविष्यति)


अत एव प्रत्येकनक्षत्रोदयज्ञानार्थं सूर्यस्यांतरं क्षितिजात् क्रांतिवृत्ते वेधे पेक्षितं[1] भवति। अस्मात् सूर्यस्य क्षितिजा[2] दृग्वृक्षेत्रं रनिष्कासनीयं[3]।

## अथ चतुर्थं क्षेत्रम्

तत्रास्य ज्ञानं निरूप्यते। पूर्वोक्तमेव[4] क्षेत्रं कार्यं। तत्र सूर्यः क्रांतिवृत्ते क्षितिजात् हमचापतुल्यं[5] अधो भागेस्ति। तस्मिन् काले एक नक्षत्रस्य उदयो वेधेन ज्ञातः। तस्मात् ववह[6]क्षेत्रे[7] दशमोन्नतांशरूप अवचाप[8]ज्ययोर्न्निष्पत्ति[9] एतयोर्न्निष्पत्यो-र्घतोस्ति[10]। ते यथा दशमलग्न[11] लग्नांतरूप[12] अहचापज्या[13] हमचापज्ययोर्न्निष्पत्तिः[14] पुनर्मत[15]चापज्या तवचापज्ययोर्न्निष्पत्तिः[16], द्वितीया[17]। तस्मात् मत[18]चापमपि ज्ञातं भविष्यति[19]। हअ[20] चापज्या[21] अव चापज्ययोर्न्निष्पत्तितुल्यास्ति, पुनः प्रकारांतरं हम[22]-कोटिछायामत[23]कोटिछायायोर्न्निष्पत्तिः, भकोणकोटिज्या त्रिज्ययोर्न्निष्पत्ति-तुल्यास्ति। तत्र भकोण ज्ञानं द्वितीयाध्याये अस्माभिः कथितं। यदि मत[24]चापं ज्ञातं,

---

(क) १. पेक्षितो for (पेक्षितं)
२. दृग्वृत्तेतरं for (दृग्वृक्षेत्र) (ख)
३. निष्काशनीयम् for (निष्कासनीयं)
४. + र्वो +
५. हृभ for (हृम)
६.. ववभह for (ववह्) (ख)
७. क्षेत्रे for (क्षेत्र) (ख)
८. + ज्याववचाप +
९. निष्पत्तिः for (न्निष्पत्ति)
१०. र्घतोस्ति for (र्घतोस्ति) (ख)
११. 'लग्न' लुप्त
१२. लग्नांतर for(लग्नांत) (ख)
१३. हृभ for (हृम)
१४. विसर्ग लुप्त, + रेका +
१५. भत for (पुनर्मत)
१६. विसर्ग लुप्त
१७. द्वितीया for (द्वितीया)
१८. भत for (मत) (ख)
१९. + अथ प्रकारांतरं + (ख)
२०. हृभ for (हृअ) (ख)
२१. + भतचापज्ययो र्न्निष्पत्तिः हृअ चापज्या + (ख)
२२. हृभ for (हृम) (ख)
२३. भत for (मत)
२४. भत for (मत) (ख)



(ख) १. वेधेनापेक्षितं for (वेधेपेक्षितं)
१५. पुनर्भत for (पुनर्मत)

तदा हमचापमपि[1] सर्वत्र विदितं भविष्यति[2]। या[3] च[4] वचापज्या व अ चापज्ययोर्न्निष्पत्तिः वतचापज्या तमचापज्ययो[5]न्निष्पत्ति[6] [7]महचापज्या[8] ह अ चापज्ययो[9] न्निष्पत्ति[10]। एवं[11] तच्चापं[12] कथितप्रकारद्वयेनापि ज्ञातं भविष्यति[13]। अनेनैव प्रकारेणास्तचापानां ज्ञानं[14] कार्यं अर्द्धक्षितिजं पश्चिमक्षितिजं कल्पनीयं। पुनः कथित प्रकारेणैव[15] ज्ञानं भवति।

अथ च अस्तोदयज्ञानं कठिनतरमस्ति यतः आकाशोदरवर्त्ति[16] वायुरेकरूपो[17] क्वचित्[18] स्वधो[19] भवति।

अथ च द्रक्षकानामपि[20] दृष्टे[21] क्वचित् तिमिरादि दोष जनित[22]।[23]
राजाधिराज प्रभुतोषणार्थे सम्राट जगन्नाथ कृते सुशिल्पे ॥
सिद्धान्तसारे खलु कौस्तुभेस्मिन्नध्याय आगाद्विरति गजाख्यः।

[24](इतिः अष्टमोऽध्यायः समाप्तः)

(क) १. हभ for (हम) (ख) — २. 'ति' लुप्त
३. यतः for (या) — ४. बव for (चव) (ख)
५. + र्या + — ६. निष्पत्तिः for (न्निष्पत्ति)
७. + या च + — ८. भह for (मह) (ख)
९. + र्या +
१०. + स्तयोर्घातरूपास्ति तस्मात् भह चापं विदितं भविष्यति +
१२. एतच्चापं for (तच्चापं) (ख) — १३. 'ति' लुप्त
१४. मज्ञानं for (ज्ञानं) — १५. + तत् +
१६. वर्ती for (वर्त्ति) — १७. + न भवति + (ख)
१८. सघनः for (स्वधो) — १९. क्वचित् सेरालः for (भवति)
२०. प्रत्येकजनानामपि for (द्रक्षकानामपि)
२१. दृष्टेः for (दृष्टे) — २२. जनितत्वे for (जनित)
२३. + दृश्यत्वशक्तिर्नास्ति + — २४. यह अन्तिम पंक्ति लुप्त है। (ख)
(ख) ६ न्निष्पत्ति for (निष्पत्ति) — १०. न्निष्पत्ति for (न्निष्पत्ति)
११. + घातरूपास्ति। तस्मात् भह चापं विदितं भविष्यति +
१८. स्वच्छो for (स्वधो) — २०. प्रेक्षकानामपि for (द्रक्षकानामपि)

इति अष्टमोध्यायः।

—:o:—

# नवमोध्यायः

नवमोध्यायः प्रारभ्यते

तत्रैकादश प्रकरणानि[1] दश क्षेत्राणि सन्ति। तत्र प्रथमप्रकरणे ग्रहाणां कक्षा संस्थिति निरूप्यते[2]। तत्र पूर्वाचार्यैरित्यवधारिते[3] षट् कक्षाः[4] नक्षत्र कक्षातः अधस्तात् चन्द्रकक्षातश्चोपरिस्था[5] सन्ति। एवं नक्षत्र[6] कक्षास्तोधस्तात्[7] शनि-कक्षास्ति, ततः[8] गुरूकक्षास्ति। ततोपि भौमकक्षास्ति। एत् कक्षात्रयं शेषग्रहकक्षो-परिस्थमस्ति। पूर्वाचार्ये शुक्रबुधकक्षे सूर्यकक्षातः अधोभागे स्तः इत्युक्तं आधुनिकैः शुक्रबुधकक्षे सूर्यकक्षातः[9] उपरिस्थे कथिते यतस्तै[10] बुध[11]शुक्राभ्यामाछादितो[12] रविः कदापि न[13] दृष्टः[14]।

अथ यत्तदैतत्पूर्वै[15]निरूपितं तपत्तः[16] प्रसमावास्यं[17] चन्द्रो[18] रविनां[19] छादयति[20], तद्वन्न[21] विरोध[22] तदुक्तं[23] त[24] एव[25] अस्माकमपि निश्चयो न जातः। अनयोर्दृग्लम्वनमपि तादृशं

(क) २. न्निरूप्यते for (निरूप्यते) (ख)
३. धारितं for (धारिते) (ख)
४. कला for (कक्षाः)
६. 'त्र' लुप्त
७. 'स्' लुप्त
९. कातः for (कक्षातः)
११. बुंध for (बुध)
१२. छादिता for (छादितो)
१३. +भवति+
१४. लुप्त
१५. यदे तत् for (यत्तदैतत्)
१६-१७-१८-१९-२०-२१-२२-२३-२४. लुप्तम्
१८. +तत्र रमणीयं यतः एतौ रवेरवस्थावेव भवतः सूर्याछादकौ न भवतः यथा प्रत्येका मायां चन्द्रः सूर्याछादको न भवति+

(ख) १. करणानि for (प्रकरणानि)
५. परिस्थाः for (परिस्था)
७. कक्षातोधस्तात् for (कक्षास्तोधस्तात्)
८. ततो for (ततः)
१०. तैः for (तै)
१५. यदैतत्पूर्वं for (यत्तदैतत्पूर्वै)
१६. तद्युक्तंयतः for (तपत्तः)
१७. प्रत्यमावास्यं for (प्रसमावास्यं)
१९. रविनाछादयति for (रविनां छादयति)
२३. 'तदुक्तं' लुप्त

न ज्ञातं, योना[१] प्रतीतिर्[२]भवति। अस्मात् पूर्वे यदुक्तं[३] तदेव प्रमाणीकृतं, यतोस्यां संस्थायां रविः मध्ये[४] भवति।

अथ ये सूर्यात् षड्राश्यंतरिता[५] भवन्ति। भौमगुरूशनयः एक दिक्का भवन्ति। ये च सूर्यात्[६] षड्राश्यंतरिता[७] न भवन्ति[८]। शुक्रादशस्तेप्येक[९] दिक्का[१०] भवन्ति[११][१२][१३]।

अथैवं वत्[१४]लभपूसादनं[१५] दरं[१६] अवूअलि[१७] विनशी[१८]संज्ञकेन स्वग्रन्थे लिखितं मया सूर्यबिंबे शुक्रबिंबं तथा दृष्टं, यथा शरीरे तिल[१९]चिन्हं भवति। पुनः साले हविन् महस्मदवग्[२०]दादि संज्ञकेन स्वकृतं[२१] भिजस्त्री[२२] ग्रन्थे इति लिखितम्। अचां[२३] इआन् संज्ञकेन वग्दाद पुरे।

अथ च महस्मदविने[२४] अवीवकर[२५] संज्ञकेन फरसीनदेशे सूर्यबिब मध्ये शुक्र[२६]-

---

(क) १. येन for (योना) (ख)
२. प्रतिति for (प्रतीति)
३. यदुक्तं for (यदुक्तं) (ख)
४. मध्येन for (मध्ये)
५. तरिताः for (तरिता)
६. 'त्' लुप्त
७. तरितौ for (तरिता)
८. भवतः for (भवन्ति)
९-१०-११-१२. लुप्त
१३. +तौ बुधशुक्रौ यतः प्रशस्तौ एक दिक्कौ भवतः+
१४. 'भ' लुप्त
१५. मूसादानं for (पूसादनं)
१६. तरं for (दरं)
१७. अली for (अलि)
१८. विनशीना for (विनशी)
१९. भ for (तिल)
२०. वग्दादीदी for (वग्दादि)
२१. अनुस्वार लुप्त
२२. मिजस्त्री for (भिजस्त्री)
२३. अबांइमूरान् for (अचांइआन्)
२४. महम्मदविन for (महस्मदविने)
२६. शुक्रो for (शुक्र)

वारद्वयं दृष्टः, यतस्तत्कालद्वये[१] विंशद्वये विंशद्वर्षादुपरि त्रिंशद्वर्षमध्ये वारद्वयं जातं । प्रथम दर्शने शुक्रो नीचोच्चवृत्ते[२] उच्चस्थितो[३] आसीत् । द्वितीये च नीचोच्च वृत्तस्य नीचे आसीत्[४] । तस्मात्[५] ज्ञानं[६] सर्वथा शुक्र[७] सूर्यादधो भागेस्ति ।

इति प्रथमप्रकरणम् ।

---

(क) १. +पि+ (ख)

२. +मध्ये वारद्वयं जातः प्रथम दर्शने शुक्रो नीचोच्च वृत्ते +

३. स्थित for (स्थितो)

४. 'त्' लुप्त

५. 'त्' लुप्त

६. ज्ञातं for (ज्ञानं) (ख)

७. शुक्रः for (शुक्र) (ख)

—०O०—

## अथ द्वितीय प्रकरणम्

अथैतेषां[1] ग्रहाणां सर्वप्रकारेण गतिलाभः कठिनतरोस्ति। याः गतयः वेधेन ज्ञाता न भवन्ति। तद्वशात् किंचिदंतरं[2] पतति। अत[3] एव अल्पकालवेधेन स्थूला गतिरायाति। अतः पूर्वं ये वेधाः संति। ते स्वल्पकालांतरा[4] संति। तस्मान्मया तेषां प्रमाणं न कृतं। एतेषां[5] स्माभि[6]द्विधोपध्वाः[7] तयोश्च[8] समान[9] न संति[10]। तयोर्मध्ये एका[11] सूर्यानुसारेण, द्वितीया[12] च क्रांतिवृत्तानुसारेण, एतदंतरद्वयमपि[13] मिथः संसक्तमेवास्ति। अनयोः पृथक्करणं कठिनतरमस्ति। पूर्वाचार्याणां वेधः[14] प्रकाराः निरंतराः न जाताः। अवर्खसोपि भयोक्त[15] प्रकारेषु निपुणः[16] स्थितः। सूर्यचन्द्रयोः ये प्रकाराः प्राप्ताः, कतिचित्त न लिखिताः संति। शेष[17] पंच ताराणी[18] प्रकाराः सम्यग्रोवगताः[19]। मया। तदुक्त प्रकारेषु विश्वासो न धृतः। अवर्खसोक्तप्रकारेषु[20] तथा अन्याचार्योक्तप्रकारेषु एषु[21] विश्वासः[22] स्थितः[23], ते लिखिताः॥

इति द्वितीय प्रकरणम्।

---

(क) १. एषां for (अथैतेषां)
२. किंचिदनंतरं for (किंचिदन्तरं)
४. कालांतरिताः for (कालांतरा)
६. अन्तरं for (स्माभि)
७. द्विधोपलब्धं for (द्विधोपध्वाः)
८. भंगणाः for (तयोश्च)
९. + प्रमाणानि च +
१०. समानानि संति for (समाननसन्ति)
११. एकमंतरं for (एका)
१२. द्वितीयं for (द्वितीया)
१३. 'ए' लुप्त
१४. विसर्ग लुप्त (ख)
१५. मयोक्त for (भयोक्त)
१६. निपुणाः for (निपुणः)
१७. शेषेषु for (शेष)
१८. ताराणां for (ताराणी) (ख)
१९. सम्यगवगताः for (सम्यग्रोवगताः)
२०. + तत्र येषु वेधेषु +
२१. 'एषु' लुप्त
२३. विसर्ग लुप्त

(ख) १. अथ तेषां for (अथैतेषां)
३. त एव for (अतएव)
४. कालांतराः for (कालांतरा)
५. तेषां for (एतेषां)
६. गत्यंतरमस्माभि for (स्माभि)
७. द्विधोपलब्धं for (द्विधोपध्वाः)
८. तयोः प्रमाणं for (तयोश्च)
१०. समानंन for (समान न सन्ति)
१७. शेषु for (शेष)
२२. + वेधेषु +

## अथ तृतीय प्रकरणम्[1]

अत्र[2] पंच तीराणां गतिर्विचार्यते। पंचग्रहेषु अंतरं द्विविधमस्ति। एतेषां गति-प्रकारद्वयेनोपलब्धाः[3] एकागति[4] [5] सूर्यं वशादुपलब्धमित्यर्थः। द्वितीय प्रकारः क्रांति-वृत्तवशाद्भवति। उदयास्ता[6]धिकानां[7] चापानि कालाश्च न्यूनाधिकाप्ता[8] उदया-स्तादिकं यया गत्या भवति[9]। सा शीघ्रकेन्द्रगतिरित्युच्यते। यथा गत्या द्वितीय प्रकारो भवति। सा मंदकेन्द्रगतिरित्युच्यते। क्रांतिवृत्तस्याभीष्टचिन्हात् पुनरभीष्टचिन्ह-[10]पर्यंतमध्यमगतिरित्युच्यते। मंगलबृहस्पतिशनैश्चरैः[11] युक्तो[12] रविर्भूत्वा पुनः पृथक् भूत्वा यदा गच्छति, तदांतरमुत्पादयति। षड्राशिपर्यन्तं[13] पुनरासन्नो भवति। एवं पुनर्यदा योगो भवति, तदा शीघ्रं[14] केन्द्रस्यैको भगणो भवति। एवं प्रथमं यस्मिन् योगो जातस्तस्मिन्नेव पुनर्भवति[15]। किंचिदग्रे भवति। तस्मात् ज्ञातं शीघ्रं केंद्रस्यैकभगण-भोगकाले सूर्यं[16] एकभगणात् किंचित[17] चापाधिकमधिकं चलितः। तच्चापतुल्यैव[18] ग्रहस्य मध्यमगतिः। यतस्तच्चापतुल्यमेव ग्रहश्चलितः। तस्मात्[19] ज्ञातं एतेषां शीघ्र-केंद्रगतिमध्यमगत्योर्योग तुल्यार्कस्य मध्यमा गतिः।

---

(क) १. कप्ररणम् for (प्रकरणम्) २. + यं +
३. विसर्ग लुप्त ४. गतिः for (गति) (ख)
५. + सूर्यवशादुपलब्धा एतेषां उदयास्तौ वक्रमार्गादिकं। अथ च मन्दशीघ्रगामित्वमित्यादि + (ख)
६. उद्ययास्ता for (उदयास्ता)
७. दिकानां for (धिकानां) (ख) ८. ऽधिकाः प्राप्ताः for (धिकाप्ता)
१०. पर्यंतं for (पर्यंत) (ख) ११. विसर्गलुप्त
१२. युं क्तो for (युक्तो) १३. यड्राशिपर्यंतं for (षड्राशिपर्यंतं)
१४. शीघ्र for (शघ्रं) (ख) १५. पुनर्न भवति for (पुनर्भवति)
१६. सूर्यः for (सूर्यं) १७. किंचिच् for (किंचित) (ख)

(ख) २. तत्र for (अत्र) ३. द्वयेणोपलब्धा for (द्वयेनोपलब्धाः)
८. न्यूनाधिकाः प्राप्ताः for (न्यूनाधिकाप्ता)
९. 'भवति – यथागत्या' लुप्त १०. शनिश्चरैः for (शनैश्चरैः)
१८. 'तच्चाप — गतिः यतस्' लुप्त १९. तस्माद् for (तस्मात्)

अथ बुधशुक्रौ सूर्यादग्रपृष्टगतौ भवतः। परं च षड्राशिपर्यंतमनयोरग्र-गत[1]स्त्वं पृष्टगतत्वं[2] भवति। तस्मात् ज्ञातमेनयो[3] मध्यमगतिः[4] सूर्यमध्यमगति तुल्यास्ति।

अथ यावता कालेन शून्यादिनां[5] भगणपूर्ति भवति[6]। तत्कालनिरूपणं यथा व[7]रपसेनकथितं मया च दृष्टं तथा निरूप्यते। तथा शनेः सप्त पंचाशत[8] ५७ शीघ्र-[9]केंद्रभगणाः एकोनषष्टिः[10] सौरवर्षैः[11] एकदिवसेन[12] पंचचत्वारिंश[13] घटिकाभिश्च ५६।१।४५ भवति[14]। एवं एतावद्भिर्दिने[15] भगणद्वयं[16] एको[17] शस्त्रयश्चत्वारिंशत्कलाश्च २।१।४३ मध्यमास्य[18]गति[19]।

अथ गुरोः[20] पंचषष्टिभगणाः एकसप्तति सौरवर्षे[21] षट्कलोचन[22] पंचदिनै-र्भवति[23]। एवं एतावता कालेनास्य मध्यमगतिः चतुरंशं पंचाशत् कलोनां[24] षड्भ-

---

(क) १. 'स्' लुप्त (ख) — २. + न + (ख)
३. मेतयो for (मेनयो) — ४. मंध्यम for (मध्यम)
५. शन्यादीनां for (शून्यादिनां (ख) — ६. भंवति for (भवति) (ख)
७. वर्ष for (वरप) — ८. 'त' लुप्त
९. छीघ्र for (शीघ्र)
११. विसर्गलुप्त — १२. नैकदिवसेन for (एकदिवसेन)
१३. चत्वारिंशद्घटिकाभिश्च for (चत्वारिंश घटिकाभिश्च) (ख)
१५. दिनै for (दिने) (ख) — १६. भंगण (भगण) (ख)
१७. एकोंश for (एकोश) (ख) — १९. + यांता +
२०. + शीघ्रं केन्द्रस्य + — २१. वर्षैः for (वर्षे)
२२. षट्कलोनपंचदिनै ५।४५ रूनैर्भवति for (षट्कलोचन पंचदिनैर्भवति)
२४. कलोना for (कलोनां) (ख)

(ख) ८. पंचाशत् for (पंचाशत) — १०. विसर्ग लुप्त
१४. भवन्ति for (भवति) — १८. मध्यमस्य for (मध्यमास्य)
१९. + जाता +
२२-२३. वर्षैर्षट्कलोन for (वर्षे षट्कलोचन)
२३. भंवन्ति for (भंवति)

गणा[१] भवंति। भौमस्य सप्तत्रिशत् ३७ शीघ्रकेंद्रभगणाः एकोनाशीतिवर्षैः ७९ त्रिदिनै ३ [२]त्रयोदशक[३]घटिभिर्भवन्ति। एवमस्यै तावता कालेन मध्यमगते द्विचत्वा[४]रिंश ४२ द्भगणाः अंश त्रयं ३ षड्[५]कलाश्च भवति[६]।

अथ शुक्र शीघ्र केंद्रस्य पंचभगणाः ५ अष्टवर्षै ८ द्विन[७] द्वयाष्टादश कलोनै-२।१८ भवंति[८]।

अथास्य मध्यमगतिः सूर्यमध्यमगतितुल्यास्तस्य[९] अंशद्वयं[१०] पंचदश कलोनाः अष्टौ भगणाः भवन्ति। बुधस्य शरवेदेन्दु १४५तुल्याः शीघ्रकेंद्रभगणाः षट्चत्वारिंशद्वर्षै ४६ रेक दिनेन १ घटिकाद्वयेन[११] भवन्ति।

अथास्य मध्यमगति[१२]गणाः षट्चत्वारिंशन्मिता[१३] एकाशांश्च[१४] ४६।१ तावता कालेन भवति[१५]।

अथ पूर्वाध्यायोक्त[१६]सौरदिनैर्यावदेतत् कालवर्षाणि गुण्यन्ते शीघ्र[१७] केंद्र-भगणानां[१८] मंशाश्च क्रियन्ते। तावदेते[१९] भवन्ति। तत्रादौ शनैः दिनानि २१५५१ घटी १८ शीघ्रकेंद्र भगणांशाः २०।५२०[२०] गुरोः[२१] दिनानि २५९२७ क[२२] ३६ शीघ्रकेंद्रांशाः[२३]

---

(क) १. षड्गणा for (षड्भगणा)
२. स्त्रयोदश १३ for (त्रयोदशक)
३. घंडीर्भवति for (घटिभिर्भवन्ति)
४. द्विचत्वारिंशः for (द्विचत्वारिंश) (ख)
५. षट्कलाश्च for (षड्कलाश्च)
६. भवन्ति for (भवति)
७. दिनैः for (द्विन)
८. भंवति for (भंवन्ति)
९. 'स्' लुप्त
११. + २ +
१२. + भ +
१४. एकांशश्च for (एकाशांश्च)
१५. भवन्ति for (भवति)
१७. लुप्त
१८. अनुस्वार लुप्त
१९. तावदेताः for (ताव देते)
२१. गुराः for (गुरो)
२३. केन्द्रांशाः for (शीघ्रकेन्द्रांशाः)

(ख) ३. घटीभि for (घटिभि)
७. दिनद्वयाष्टादश for (द्विनद्वयाष्टादश)
१०. द्वय for (द्वयं)
१३. + : +
१६. पूर्वाचार्योक्त for (पूर्वाध्यायोक्त)
१७. शीघ्र for (शीघ्रं)
२०. २०५२० for (२०।५२०)
२२. घटयः for (क)

२३४०० भौमस्य दिनानि २८८५७ घटी ५२ शीघ्र केंद्रांशा[1] १३३२० शुक्रस्य[2] २९१९ घ ४२ शीघ्रकेंद्राशाः[3] १८०० बुधस्य[4] द्वि दि. १६८०२ घ. २४ शीघ्रकेद्रांशाः[5] ५२३००[6]।

अथैषां प्रत्येक स्व[7] स्व गुणं[8] स्व स्व[9] कार्या[10] स्व[11] शीघ्रकेंद्र भगणांशः[12] भुक्त[13] स्व स्वैक दिनजा केंद्रगतिर्जायते। पुनर्दिन गतिश्चतुर्शितिभक्ता एक होरा गतिर्भवति।

अथ दिनगते र्मासगतिवर्षगती भवतः ॥

अथ शनिगुरूभौमानां प्रत्येक शीघ्रकेंद्रगतिः सूर्यगतेः शोधिता[14]वशिष्टा तत्तद्ग्रहगतिर्भवति। ततोपि होरामासवर्षगतयाः[15] प्रकल्पाः[16] बुध शुक्रयोर्मध्यमगतिः सूर्यगतितुल्यैवास्तीति।

इति तृतीय प्रकरणं समाप्तम्

---

(क) ३. केन्द्रांशाः for (केद्राशाः) | ४. 'स्य' लुप्त
६. ५२२०० for (५२३००)
७. ८-९-१०- लुप्त | ११. + कालदिनैः +
१२. भगणांशाः for (भगणांश.) | १३. भक्ताः for (भुक्त)
१४. + ऽ + | १५. गतयः for (गतया) (ख)
१६. विसर्ग लुप्त

(ख) १. केन्द्रांशाः for (केन्द्राशाः) | २. × दि —
५. केन्द्रां for (केद्रांशाः)
८-९. दिनैस्स्वस्व कार्या for (गुणैस्वस्व कार्या)
११. स्वद for (स्व) | १२. भगणांशाः कार्याः for (भगणांशः)
१३. तदा शीघ्र for (भुक्त)

—०O०—

## अथ चतुर्थ प्रकरणम्

तत्रैतेषां मध्यगतिशीघ्रकेंद्रगत्योः सारणी निरूप्यते । तत्र यथा सूर्य चन्द्रयोर्गतिः कोष्टकेषु धृता तथैवेतेषां क्रियते सारणी कोष्टकाश्चै[1] ।

अथ शन्यादीनामध्यमानयनसारणी[2] ।।[3]

इति चतुर्थ प्रकरणं समाप्तम् ।

---

(क) १. श्चंते for (श्चै) (ख) २. भौमादीनां for (शन्यादीना)
३. + निरूप्यते +

(ख) २. शन्यादीनां for (शन्यादीना)

—:०:—

## अथ पंचम[1] प्रकरणम्

तत्रैतेषां पंचग्रहाणां[2] फलज्ञानार्थं येषां वस्तूनामपेक्षा भवति। ते[3] च निरूप्यंते। ताः समाना[4] गतयः[5] वेधना[6] न्यूनाधिकतात्[7]प्रतिवृत्ते[8] वशाद्भवति[9]। वा नीचोच्च वृत्तेन[10] अथ चैतेषु पंच ग्रहेषु अस्माभिः प्रकारद्वयेन चारो दृष्टः एकः क्रांति वृत्तांशानुसारेण द्वितीयश्च सूर्यानुसारेण।

अथ नवरत[11]वेधेन इदं ज्ञातं। द्वितीयप्रकारानुसारेण अधिकगतेर्मध्यगतिपर्यन्तं यः कालः सः मध्यगतेर्मध्यम[12]न्यूनगतिपर्यन्तकालादधिकोस्ति। एतत्प्रतिवृत्तानुसारेण[13] संभवयति[14]। यतस्तत्र अधिकगतेर्मध्य[15]पर्यन्तं कालः मध्यगतेन्यूनगतिपर्यन्तका[16]लान्यूनोऽस्ति। यथा तृतीयाध्यायस्य तृतीयप्रकरणे कथितं नीचोच्चवृत्तानुसारेण चैतत्संभवति। परं च नीचोच्चवृत्तस्य गति[17] पश्चिमतः पूर्वं[18] चन्द्रनीचोच्चवृत्तगतिद्वै[19]लोम्येन तस्मादस्माभिर्न्नी[20]चोच्च वृत्तगतिरेवोरीकृता।

---

(क) २. ग्रहाणं for (ग्रहाणां)    ३. तानि for (ते च)
४. समानगतयः for (समानागतयः)    ५. + याभि +
६. वेंधजान्यूना धिकगतयः for (वेधनान्यूनाधिकता)
७. + उत्पन्ना भवन्ति ताः +    ८. प्रतिवृत्तवशाद्भवन्ति for (त्प्रतिवृत्ते)
१०. वृत्तवशेन for (वृत्तेन) (ख)    ११. अथा ऽनव० for (अथनवरत)
१२. 'मंध्यम' लुप्त (ख)    १३. + न + (ख)
१४. संभवति for (संभवयति) (ख)    १५. मंध्य for (मध्य) (ख)
१७. गतिः for (गति) (ख)    १८. + दिशं स्यात् +
१९. गतिवैलोम्येन for (गतिद्वैलोम्येन) (ख)
२०, नीचोच्च for (न्नीचोच्च)

(ख) १· पंचमं for (पंचम)    ४. समानाः for (समाना)
६. वेधेन न्यूनाधिकाः for (वेधन्यूनाधिक)    ७. तत्प्रतिवृत्त for (तात्प्रतिवृत्ते)
९. वशाद्भवति for (वशाद्भवन्ति)    ११. अथ अनवरत for (अथ नवरत)
१६. कालान्न्यूनोस्ति for (कालान्यूनोस्ति)
१८. + दिशि स्यात् +    २०. नींचोच्च for (न्नीचोच्च)

उत्क्रमज्या बजचापस्य भवति । उदाहरणं । द्विसप्तत्यंशानां उत्क्रमज्या[1] आनीयते । तद्यथा । द्विसप्तत्यंशज्या ५७।३।४८।१२।२[2]।७।३।११ अस्य वर्गः ५४।१६।१३।५५।-७।२५।४५।५८ त्रिज्यावर्गात् ३६०० शोध्यशेषं ३५।४५।४३।४६।४।५२।३४।१४।२ अस्य मूलं १८।३२।२७।४०।१४।४६।३३ त्रिज्यायां ६० हीनं ४१।२७।३२।१६।४५।१०।२७ इयं द्विसप्तत्यंशोत्क्रमज्या इयमेव व्यासार्द्धं ६०[3] युता अष्टोत्तरशतांशाना[4]मुत्क्रमज्या जाता । योगान्त[5]रज्या ।

**अथ प्रकारांन्तरेण ज्यासाधनं[6]—**

पूर्वं[7] तु पूर्णज्याभिर्ज्ञातचापयोर्योगान्तरज्यानयनमुक्तं । अधुनार्द्धज्याभिरेव ज्ञातचापयोर्योगान्तरज्यानयनमुच्यते । कबजदं वृत्तार्द्धं[8] कार्यं कबं[9] प्रथमचापं । बजं द्वितीयचापं । कजं योगचापं तस्य ज्या ज्ञेयास्ति[10] । कहं व्यासार्द्धं हकेन्द्रं । प्रथमचापज्याबघं द्वितीयचापज्याजतं योगज्याजसंज्ञेयं । जतहत्रिभुजे तं समकोणोऽस्ति । तहं कोटिज्यास्ति । बहघत्रिभुजेघं समकोणोऽस्ति । घहं[11] कोटिज्यास्ति । पुनः तयलम्बः कहरेखायां कार्यः । तहयत्रिभुजं बघह त्रिभुजस्य सजातीयं । जत अत्रिभुजं तल अत्रिभुजस्य सजातीयं । तलअत्रिभुजं लहस[12]त्रिभुजस्य सजातीयं

---

(घ) १. + अथ चाष्टोत्तर शतांशानामुत्क्रमज्या +
२. १२।२७।३ for (१२।२।७।३) ३. ६१ for (६०)

(ङ) २. ५७।३।४८।२।२।७१।३।११ for (५७।३।४८।१२।२।७।३।११)
३. ६० युक्ता for (६० युता)
४. अष्टोत्तरसततांसानां for (अष्टोत्तरशतांशानां)
५. 'योगांतरज्या' लुप्त
६. सार्द्धनं for (साधनं) ७. पूर्ण for (पूर्वं)
८. +प्रथमचापं बजं द्वितीयचापं कजं योगचापं तस्य जायेज्ञास्ति कदव्यासार्द्धं हकेन्द्रं दं वृत्तार्द्धं कार्यंक + ९. 'कबं' लुप्त
१०. येज्ञास्ति for (ज्ञेयास्ति) ११. दहं for (घहं)
१२. लहज for (लहस)

लहसत्रिभुजं तहयत्रिभुजस्य सजातीयं, तस्मात् जतकत्रिभुजं बहधत्रिभुजस्य सजातीयं जातं।


अथानुपातः। हबकर्णे बधं भुजः तदा हतकर्णे[1] किमिति लब्धं तयं। इदं असमं। पुनरनुपातः। बहकर्णे हधं[2] कोटिस्[3]तदा जतकर्णे का कोटिः लब्धं जअं। जअअसयोर्योगः[4] कजचापस्य जीवाजसंसिद्धं। उदाहरणं। अष्टादशांशानां जीवा ज्ञातास्ति, सा चेयं १८।३२।२७।४०।१४।४६।२३ कोटिज्या ५७।३।४८।१२।२७।३।१५ त्रिंशदंशानां जीवा[5] ३० कोटिज्या ५१।५७।४१।२६।१३।५८[6]।५८ इयमष्टादशांशजीवा गुणिता त्रिज्याभक्ता फलं[7] १६।३।२५।१०।४२।४५।३० द्विसप्तत्यंशजीवा त्रिंशदंशजीवा गुणिता त्रिज्याभक्ताफलं २८।३१।५४[8]।६।१७[9]।७[10] जाते यमष्टा चत्वारिंशदंशज्या।

**अथ चापयोर्ज्ञाने[11] चा[12]पांतरज्यानयनमुच्यते—**

ज्ञातचापज्ये परस्परकोटिज्यागुणे[13] त्रिज्याभक्ते फलान्तरं[14] चापान्तरज्या भवति। अस्योपपत्तिः—पूर्ववत् कदव्यासे[15] हकेन्द्रकं कबजदं[16] वृत्तार्द्धं[17] कार्यं। कबचाप-

(घ) ८. २८।३१।५४।६।१३।३१।३७ for (२८।३१।५४।६।१७।७)
१०. + अनयोर्योगः ४४।३५।१६।१६।५६।१७।७ +

(ङ) १. करणे for (कर्णे)
२. दं for (धं)
३. 'कोटि—कर्णेका' लुप्त
४. असयोंगः for (अससयोर्योगः)
५. जीवानां for (जीवा)
६. ५७ for (५८)
७. पलं for (फलं)
९. '७' लुप्त
११. + गप्तत्यंशजीवा त्रिसदं +
१२. 'चा' लुप्त
१३. 'गुणे' लुप्त
१४. पलांतरं for (फलांतरं)
१५. व्याकहकेन्द्रकं for (व्यासे हकेन्द्रकं)
१६. कबजकं for (कवजदं)
१७. 'ज्ञतार्द्ध' for (वृत्तार्द्धं)



ज्यावधं कजचापज्याजझं[1] । अन्तरचापस्य जबस्य जीवातबं इयमज्ञातास्ति[2] । अत्र शकले हजरेखायां धयलम्बः[3] योगज्या कार्यः । धयरेखायां बअलम्बः कार्यः । हय-क्षेत्रं धयत्रिभुजं हजझ त्रिभुजस्य सजातीयं । हजकर्णे जझ[4]कोटिः तदा ह[5]धकर्णे का कोटिरिति लब्धं धयं[6] प्रथमफलं । पुनः बअधत्रिभुजं हधयत्रिभुजस्य सजातीयं । हझकर्णे[7] झहं[8] लभ्यते तदा वधकर्णेन किमिति[9] । लब्धं धअं द्वितीयफलं, अनयो-रन्तरं अयं बततुल्यं भवति । इयमेव चापान्तरज्या । अत्रोदाहरणं—अष्टादशांशज्या त्रिशदंशकोटिज्या गुणा त्रिज्या भक्ता फलं १६।३।२५।१०।४२।४५।३०[10] त्रिशदंशज्या[11] अष्टादशांशकोटिज्या गुणा त्रिज्या भक्ता फलं २८।३१।५४।६।१३[12]।३१।३७ अनयोरन्तरं १२।२८।२८।५[13]५।३०।४६।७ जातेयं द्वादशांशज्या ।

**अथ क्षेत्रं चापांतरज्याज्ञानाय—**

अथ[14] चापज्याज्ञाने सति चापपञ्चमांशज्यानयनं—भुजांशज्यकेति[15] । ज्ञातं भुजांशानां जीवायाः पंचमांशः द्विधा स्थाप्यः । एकत्र घनः[16] कार्यः । स त्रिज्यार्द्ध-कृत्या भाज्यः लब्धमाद्यो भवति । तेनाद्येन ज्या पंचमांशस्य वर्गः गुणनीयः, त्रिज्या[17]-

(घ) १५. भुशांशज्यकेति for (भुजांशज्यकेति)

(ङ) १. 'ज्ञं' for (झं)

२: सयमज्ञातास्ति for (इयमज्ञातास्ति)

३. धवधंवः for (धयलम्बः)

४. जज्ञः for (जझः)

५. तदाहृद for (तदाहृध)

६. यं for (धयं)

७. हजकर्णे for (हझकर्णे)

८. हलभ्यते for (झहं लभ्यते)

९. किमित for (किमिति)

१०. '३०' लुप्त

११. + आ +

१२. २८।३२।५४।६१।३३।७ for (२८।३१।५४।६।१३।३१।३७)

१३. ५० for (५०)

१४. + अथ चापांतरज्याज्ञानाय +

१६. धनुः for (धनः)

१७. त्रीज्या for (त्रिज्या)

वर्गेण भाज्यः लब्धं परो भवति । पर आद्ये शोध्यः शेषं, पृथक्स्थज्या पंचमांशे योज्यं, पुनस्तस्य घनः कर्तव्यः त्रिज्यार्द्धकृत्या भाज्य[1] आद्यो भवति । आद्यगुणितः पंचमांशवर्गः त्रिज्यावर्गभक्तः फलं स्वपंचमांशोनं[2] परो भवति । परोन आद्यः[3] ज्या पंचमांशे योज्यः पुनस्तस्मात्पूर्ववत् क्रियां कृत्वा मुहुः पंचमांशः साध्यः, यावदविशेषः असौ चापपंचमांशज्या[4] भवति । अत्रोपपत्तिः—अत्र ज्ञातभुजकोटिज्याभ्यां समासभावनया द्विगुणितभुजांशानां भुजज्याकोटिज्ये भु०[5] को०[6] २ त्रि० १[7] भु० व० १ को० व० १[8] त्रि० १ अत्र[9] भुजकोटिज्याभ्यां समासभावनया जाते त्रिगुणभुजांशानां भुजज्या कोटिज्ये भु० व०[10] ४ त्रि० व० भु० ३ त्रि०[11] व० १ को० भु० व० ४ त्रि० व० को० ३ त्रि० व० १[12] एवं द्विगुणभुजांशानां[13] [14] [15] दोर्ज्या कोटिज्याभ्यां[16] तुल्यसमासभावनया जाते चतुर्गुणितभुजांशानां दोर्ज्या कोटिज्ये[17] भु० व० को० घ० भु०[18] ४ त्रिघ[19] १ भु० व०[20] व० १ भु० व० को० व० ६[21] को व० व० त्रिघ[22] १ अत्रापि पूर्वदोःकोटिज्याभ्यां समासभावनया पंचगुणितभुजांशानां भुजज्याकोटिज्ये[23] भु० घ० को० व० १[24] को० व० व० भु०[25] ५ भू० व० व० भू० १ त्रि० व०[26] व० १ भु० व० व० को०

(घ) ६. + पूर्वं +
८. को त्रि व १ for (को व० १ त्रि० १)
१०. 'व' लुप्त
११. 'त्रि०—त्रि० व० १' लुप्त
१२. '१' लुप्त
१३. द्विगुणा for (द्विगुण)
१४. + भुको भु० व० ४ त्रि० व० +
१५. कोणानां for (भुजांशानां)
१६. आभ्यां for (भ्यां)
१७. कोत्रिव १ टिज्ये for (कोटिज्ये)
२४. १० for (१) (ङ)
२६. 'त्रि० व० व० १' लुप्त (ङ)

(ङ) १. भाज्या for (भाज्य)
२. खपंचमांसोनं for (स्वपञ्चमांशोनं)
३. आद्या for (आद्यः)
४. पांच for (चाप)
५. 'भु०' लुप्त
६. + भुव +
७. 'त्रि० १ भु० व० १' लुप्त
१८. + घ० भु० +
१९. त्रिव० १ for (त्रिघ १)
२०. वव १ for (भु० व० व० १)
२१. द for (६)
२२. 'त्रिघ १' लुप्त
२३. को त्रिघ १ टिज्ये for (कोटिज्ये)
२५. + त्रिघ १ +

५ भु० व० को० व० १० व० व०[1] १ को० १ त्रि० व० व० १ को[2] ४ अत्र पंच[3]गुणित-भुजांशज्याखण्डेषु[4] भुजज्यावर्गो[5] नस्त्रिज्यावर्गो भ[6]वतीति कोटिवर्गं उत्थाप्यैवं स्वरूपमुत्पन्नम् । भु० घ० त्रि० व० २ त्रि व० व० भू० ५ भु० घ० भुव० १६ त्रि० व० व० १ अत्र भुजज्याज्ञा[7]नात् भुजस्थाने यावत्तावदव्यक्तं निवेश्य ज्ञातज्या सममिति पक्षौ[8] या० घ० त्रि० व०[9] २ या० त्रि० व० व० ५ या० घ० या० व० १६ त्रि०[10] व० व० ज्या समत्वात्तयोः पक्षयोः या०[11] घ० त्रि० व० २[12] या० घ० या० व० १ या घ० त्रि० व० २[13] या० घ० या० व० १६ त्रि० व०[14] व० ज्या० या०[15] त्रि० व० व० ५ संयोज्य[16] जातौ पक्षौ पंचगुणितेन त्रिज्यावर्ग वर्गेण भजने ऊर्ध्वपंक्त्यां पञ्चांशज्यैव[17] । अधः स्थिते तत्तुल्य[18]पक्षे अव्यक्तखण्डे ज्यापञ्चमांशः सिद्धः । तस्य

---

(घ) १. को० व० व० for (व० व० १ को० १)
२. को १ for (को ४)
५. निस्त्रिज्यावर्गो for (नस्त्रिज्यावर्गो)
१२. २० for (२)
१३. २० for (२)

(ङ) १. को० क० व० for (व० व० १)
२. 'को ४' लुप्त
३. 'पंच' लुप्त
४. खंडेषु for (खण्डेषु)
६. + त्रि व० व० १ +
७. वि० नोट—'भुघ०—त्रिव व० १' तक ऊपर की पंक्ति इस प्रति में यहां पर है ।
८. जा for (या)
"या० घ— से—व० १६" तक इस पृष्ठ की आठवीं पंक्ति के अन्तर्गत "जातौ" के आगे लिखित ।
९. वि०—इस पृष्ठ की पांचवीं पंक्ति के 'या० घ० से—व० १६' तक आठवीं पंक्ति के अन्तर्गत 'जातौ' के आगे लिखित ।
१०. 'त्रि० व० व० ज्या' लुप्त
११. 'या० घ०—या० व० १' लुप्त
१३. 'या घ०—से—व० १६' तक आठवीं पंक्ति के अन्तर्गत 'पक्षौ' शब्द से पूर्व लिखित
१४. 'त्रि० व० व० ज्या' आठवीं पंक्ति के अन्तर्गत 'पं—त्त्यां' के मध्य लिखित ।
१५. 'या०—व० ५' लुप्त
१६. संयोज्या जातः for (संयोज्य जातौ)
१७. जैव for (ज्यैव)
१८. + या घ० त्रि व० २ या० घ या घ० १६ त्रिवव ७ +

धनं कृत्वा प्रथमाव्यक्तखंडे आद्यसंज्ञ उपपन्नः । द्वितीयाव्यक्तखण्डे अन्यसंज्ञ उपपन्न इति स्योर्द्धनरयोरन्तरेण युक्तो ज्यापञ्चमांशः स्फुटो ज्या पंचमांशः स्यात् । पुनस्तस्मादाद्यान्यद्वारास्फुटो ज्यापंचमांशः पञ्चमांशजीवेत्युपपन्नं ।

इति पञ्चमांश ज्योपपत्ति । इति ज्यासाधनं सोपपत्तिकं सम्पूर्णं ।

**अथ त्रिप्रश्नाध्यायो निरूप्यते—**

**शिलातलादौ जलवत्समाने वा वज्रलेपे सुसमानभूमौ ।**
**कृत्वा समं मंडलमस्य केन्द्रे शंकुं निवेश्याथ विभां प्रपश्येत् ॥१॥**
**भायाः प्रवेशस्य च यत्र चिन्हं तत्रापरा निर्गमनस्य पूर्वा ।**
**एवं द्वितीयेपि दिने विधेयं पूर्वाख्यचिन्हं तु तदन्तरे यत् ॥२॥**
**भावेशनिर्वेशघटीप्रमाणांतरेण निघ्नं खरसैर्विभक्तं ।**
**फलेन पूर्वा चलितायनाशां पूर्वाख्यचिन्हं स्फुटमत्र विद्यात् ॥३॥**
**ततः समस्ताः ककुभः प्रसाध्या मत्स्यादिना प्राक् पर सूत्रकं च ।**
**याम्योत्तरं चक्रकलास्तथैव कार्याः सुधीभिर्निपुणैः कलाज्ञैः ॥४॥**
**केन्द्रस्थशंकोर्दिनमध्यजाभातुलाजसंस्थे तरणौ स्वदेशे ।**
**पलप्रभा स्यात्तु तदीयकर्णो भावर्गयुक् शंकुकृतेर्हि मूलं ॥५॥**

**अथ श्लोकपंचकस्य व्याख्या—**

शिला तलादाविति—जलवत्समीकृते शिलातलादौ वा वज्रलेपे सुधादिलेपैः

---

(घ) ६. + इत्यसकृत् स्थिरो ज्या पञ्चमांशः +

(ङ) १. उपपन्नं for (उपपन्नः) २. प्रथम for (प्रथमा)
३. + या विवव ५+ ४. 'शः' लुप्त
५. तस्माद्याध्यानस्फुटो for (तस्मादाद्यान्यद्वारास्फुटो)
७. + श्रीगणेशायनमः + ८. भार्या for (भायाः)
९. विदेयं for (विधेयं) १०. ककुः for (ककुभः)
११. शक् for (प्राक्) १२. सुधिभि for (सुधीभि)
१३. संको for (शंको) १४. फल for (पल)

समीपे[1] कृते भूभागे समानं[2] वर्त्तुलं मण्डलं कृत्वा अस्य केन्द्रशंकुं संस्थाप्य छायां पश्येत् ।।१।। भायाः प्रवेशस्य चेति—भायाः छायायाः प्रवेशस्य यत्र चिह्नं साऽपरा[3] पश्चिमा दिक् । भायाः निर्गमनस्य यत्र चिह्नं तत्र पूर्वा । एवं द्वितीयेपि दिने पूर्व-चिह्नद्वितीयदिनपूर्वचिह्नयोरन्तरं[4] यवलिक्षादि प्रमाणं यत् ।।२।। भावेश-निर्वेशेति-तत् भावेशनिर्वेशघटीप्रमाणांतरेण[5] गुणितं[6] षष्ठिभक्तं यल्लब्धं फलं तत्प्रमाणेन अयनांशां पूर्वां चलिता कार्या, तत्र स्पष्टं चिह्नं विद्याज्जानीयात्।।३।। ततः समस्ता[7] इति—ततस्तदनन्तरं समस्ताः ककुभः दिशः मत्स्यादिना प्रसाध्याः, तासामपि चिह्नानि कार्याणि, पूर्वापरं याम्योत्तरं च सूत्रं देयं[8] । कलाज्ञैः निपुणैः सुधीभिस्तथैव[9] चक्रकला अवधाः ।।४।। केन्द्रस्य शंकोरिति-सायनतुलामेषस्थे सूर्ये पूर्वोक्तवृत्तकेन्द्रस्थितशंकोर्मध्याह्ने या छाया आयाति, सा स्वदेशे अंगुलाद्यापल प्रभा पलभा[10] स्यात् । तुपरं शंकुवर्गः छायावर्गयुक्तः अस्य मूलं तदीयकर्णः पलकर्णः[11] स्यात् ।

**अथ क्रांत्यक्षांशज्ञानार्थं याम्योत्तरयन्त्रमुच्यते[12]—**

**श्लक्ष्णं दृढं धातुमयं सुवृत्तं शतांगुलव्यासयुतं[13] समानं ।**
**तथैव पंचागुलपिंडयुक्तं कृत्वा[14] तदन्तस्त्वपरं ततोल्पं ।।१।।**

---

(घ) १. समीकृते for (समीपे कृते) (ङ)
४. + पूर्वापराख्यचिह्नं कर्तव्यं । पूर्वदिन +
६. + छायाप्रवेशनिर्गमघटीमानांतरेण +
११. पलभाकर्णः for (पलकर्ण)

(ङ) २. समाने for (समानं) ३. तत्रापरा for (साऽपरा)
५. भावेत् for (भावेश)
७. समस्तमिति for (समस्ता इति) ८. ज्ञेयं for (देयं)
९. सुधिभि for (सुधीभि) १०. प्रलभ्या for (पलभा)
१२ यामोत्तर for (याम्योत्तर) १३ युक्तं for (युतं)
१४. 'कृत्वा—स्थेन युतं' लुप्त
नोट—यह लुप्त पाठ अग्रिम पृष्ठ पर द्वितीय श्लोक के पश्चात् अंकित है—

अंर्तविलग्नं भ्रमति प्रयुक्तं तथाक्षयुग्मे नसरंध्रकेण[1]।
षड्भांतरस्थेन[2] युतं प्रकुर्याद् वृत्तयुग्मं भकलांकितं च[3] ।।२।।
एवं हि याम्योत्तारनामयन्त्रं भूमौ समायां ककुबंकितायां।
याम्योत्तारस्थं रथचक्रसंस्थं दृढं च दिक् चिन्हयुतं[4] विदध्यात् ।।३।।
मध्याह्नसंस्थे तरणौ समाना यंत्रप्रभा चोभय[5]पाश्र्वयोर्यदा[6]।
वृत्तं द्वितीयं परिचालनीयं यथा विशे छिद्रयुगेऽर्कतेजः ।।४।।
छिद्रोन्मुखं[7] चिन्हमतः प्रकुर्यात्तात्खांतरालं नतभागकाः स्युः ।
दिने दिने तांस्तु तथा दिनस्य मध्ये नतांशान्विलिखेद्विदित्वा[8] ।।५।।
एवं मृगादौ परमान्नतांशां[9]स्तथैव कीटादि[10]गतान्विदित्वा।
एकान्यदिक्त्वे तु तदंतरैक्यं कृत्वा तदर्द्धे परमापमांशाः ।।६।।[11]
मृगोन्नतांशाः परमापमांशैर्युक्ता दिनार्द्धे भवतीह लंबः।
तदूनखांकाः पलभागकाः स्युर्जीवेत[12] दीर्योव[13] दधीत धीमान् ।।७।।

कान्त्यक्षांशज्ञानं तु पूर्वोक्ते भित्तियन्त्रेणापि जायते तथापि पूर्वाचार्यै-रूक्तत्वादिदमपि याम्योत्तर यंत्रमुक्तं। श्लक्ष्णं दृढ मिति—श्लक्ष्णं दृढं शतांगुल-व्यासं पञ्चागुलपिंडं समानं धातुमयं वृत्तं कार्यं तुपरं तदन्तस्तन्मध्ये[14] अपरमन्य-

---

(घ) ९. परमोन्नतांशा for (परमान्नतांशां)

(ङ) १. रंध्रकेन for (रंध्रकेण)          २. षडांतरस्थेन for (षड्भांतरस्थेन)
३. + कृत्वा तदन्तस्त्वपरं ततोल्पं। अन्तर्विलग्नं भ्रमति प्रयुतं तथाक्षयूग्मेन सरंध्रकेन। षडांतरस्थेन युक्तं प्रकुर्या तद्वृत्तयुग्मं भकलांकितं च ।।२।।
४. युक्तं for (युतं)          ५. वोभय for (चोभय)
६. पश्र्वयोर्यदा for (पाश्र्वयोर्यदा)
७. विद्धोन्मुखं for (छिद्रोन्मुखं)          ८. द्विदिता for (द्विदित्वा)
१०. क्रीडादि for (कीटादि)          ११. '।।६।।' लुप्त
१२. सजीवे तदीये for (स्युर्जीवे तदीर्यो)
१३. विदधीत for (वदधीत)          १४. दतंतस्तन्मध्ये for (तदंतस्त्वन्मध्ये)

द्वृत्तं धातुमयं तत अल्पमन्तर्विलग्नं सत्केनापि प्रयुक्तं भ्रमति तथा स रंध्रेणाक्ष-युग्मेन षड्भान्तरं स्थेन युक्तं प्रकुर्यात्। चक्रकलांकितं च कुर्यात् ॥२॥ अमुना प्रकारेण याम्योत्तरनामयन्त्रं[1] कृत्वा[2] समायां भुवि दिक्साधनं कृत्वा रथचक्रवद्या-म्योत्तरस्थं दिक् चिह्नांकितं कृत्वा स्थापयेत् ॥३॥ मध्याह्नसंस्थ इति—तरणौ सूर्ये मध्याह्नसंस्थे सति यंत्रप्रभा यंत्र[3] छाया उभयपार्श्वयोः यदा समाना स्यात्। तदा द्वितीयं वृत्तं तथा परिचालनीयं यथार्कतेजः छिद्रयुगे छिद्रद्वये विशेत्[4] ॥४॥ छिद्रोन्मुख इति—छिद्रोन्मुखं छिद्रसन्मुखं चिह्नं कुर्यात् तत् खान्तरालं। तत् चिह्नं खंख मध्यः अनयोरन्तरालं अन्तरं नतभागकाः नतांशाः स्युः। दिने दिने तान्[5]नतभागकान् तथा विलोक्य दिनस्य मध्ये विदित्वा धीमान् तान् विलिखेत् ॥५॥ एवमिति—एवममुना प्रकारेण मृगादौ कर्कादौ च परमान्नतांशान्[6] विदित्वा द्वयोरेकदिश्यन्तरं भिन्नदिशि योगं कृत्वा तदर्द्धं परमापमांशाः[7] परमापमांशैर्युताः इह लम्बः स्वदेशीयलम्बांशाः स्युः तदूनखां काः। लम्बांशोननवतिः[8] पलभागका स्युः धीमान् तदीये जीवे विदधीत कुर्यात् ॥७॥

**अथ विषुवसंक्रांतिज्ञानार्थं नाडीवलयं यन्त्रमुच्यते।**

**एवं हि नाडीवलयाख्ययंत्रं पूर्वापरस्थं[9] ध्रुवसन्मुखं[10] च।**
**आधारयुग्मेन दृढं निधाय प्रद्योतनं मेषगतं प्रतीक्षेत् ॥१॥**
**वृत्तस्य भा वृत्तगता समाना[11] प्रान्तात्समानान्तरगा[12] यदा स्यात्।**

---

(घ) ४. + प्रविशेत् +
६. परमोन्नतांशान् for (परमान्नतांशान्)
७. + स्युः ॥६॥ मृगोन्नतांशा इति। मृगोन्नतांशाः +

(ङ) १. यन्त्रे for (यन्त्रं)
२-३. 'कृत्वा—यन्त्र' लुप्त
४. विसेत् for (विशेत्)
५. तानत for (तान्नत)
७. + मृगोनतांशाः +
८. भवतीः for (भवतिः)
९. पूर्वापस्थं for (पूर्वापरस्थं)
१०. सुमुखं वा for (सन्मुखं च)

तदा रवेः संक्रमणं प्रजातं मेषादि[1] जूकादिगतस्य वेद्यं ॥२॥
दिनादिकं तद्दिन[2]पाद्[3]वेशे द्वितीयवर्षेपि पुनः प्रसाध्यं ।
तदंतरं वर्षदिवा[4]गणः स्यात्तद्भुक्तचक्रं रविजाः[5] गतिः[6] स्यात् ॥३॥

थ श्लोक त्रयस्य व्याख्या –

एवं हीति– एवं[7] पूर्वोक्तप्रकारेण याम्योत्त[8]रयंत्रवत् नाडीवलयाख्ययन्त्रं पूर्वापरस्थं ध्रुवसन्मुखं आधारद्वयेन दृढं निधाय स्थापयित्वा मेषगतं प्रद्योतनं प्रतीक्षेत् प्रतीक्षां कुर्यात् ॥१॥ वृत्तस्यभा इति वृत्तस्य भाछाया वृत्तगतां समाना-वृत्तप्रान्ता[9]त्समानान्तरगा यदा स्यात्तदा रवेः संक्रमणं जातं मेषादि तुला[10]दि-गतस्य वेद्यं ज्ञेयं[11] ॥२॥ दिनादिकमिति—दिनया[12]ब्दवेशे सूर्यवर्षप्रवेशे दि[13]नादिकं वारादिकं साध्यं । एवं द्वितीयवर्षेपि वाराद्यं साध्यं द्वयोरन्तरं[14] कार्यं, तदन्तरं वर्ष-दिनगणः स्यात् । तेन दिनगणेन भक्त चक्रं रविजागतिः सात्[15] प्रतिदिवसी[16] या रविगतिः स्यात् ॥३॥

अथ दृग्गोलबंधनं—

खगोलवृत्तैः सहितो भगोलो हि भवेदिह ।
दृग्गोलस्तं शलाका[17]भिर्धातुजाभिश्च कारयेत् ॥१॥

---

(घ) ३. दिनपाब्दवेशे for (दिनपाब्द)
६. विसर्ग लोप
१३. तद्दिनादिकं for (दिनादिकं)
५. विसर्ग लोप (ङ)
१२. दिनपाब्द for (दिनयाब्द)
१५. स्यात् for (सात्) (ङ)

(ङ) १. मेखादि for (मेषादि)
२. तदिनयावृदवेशे for (तद्दिनपाद्वेशे)
४. दिवागिण : for (दिवागण : )
७. इवं for (एवं)
८. यामोत्तर for ((याम्योत्तर)
९. प्रांत for (प्रांतात्)
१०. तुलदिगतस्य for (तुलादिगतस्य)
११. सेयं for (ज्ञेयं)
१२. दिनयावदवेशे for (दिनयाब्दवेशे)
१४. रांतरं for (रंतरं)
१६. दिवसजा for (दिवसीया)
१७. सलाकावि for (शलाकाभिर्)

पूर्वापरं च याम्योदग्वलयं क्षितिजं तथा ।
दृग्वृत्तं कोणवृत्ते द्वे खगोलोयं स्मृतो बुधैः ॥२॥
याम्योत्तरक्षितिजयोः सपात[1]समसंज्ञकः ।
समचिह्नादक्षभागैः सौम्यात्[2] स्यादुत्तरध्रुवः ।
ऊर्ध्वं तथा याम्य[3]संज्ञादधः स्याद्दक्षिणध्रुव : ।३॥
ध्रुवात् खांकांशकै ९० वृंत्तं निरक्षे सममंडलं ।
तदेव [4]नाडीवलयं विषुवाभिधमंडलं ॥४॥
तद्याम्योत्तर[5]संपातात्खांकभागैस्तु यद्भवेत् ।
वृत्तं निरक्षक्षितिजं तदेवोन्मण्डलं भवेत् ॥५॥
समोन्मण्डलभूजानाम्[6] भवेताम् यत्र संगमौ[7] ।
पूर्वापरौ स्वस्तिकाख्यौ ज्ञेयौ[8] गोलविचक्षणैः ॥६॥
ध्रुवात्परायमांशैस्तु[9] कदंबभ्रमवृत्तकं ।
तत्पालितः[10] खांकभागैर्वृत्तं स्याद्राशिमण्डलम् ॥७॥
तदेवायमवृत्तं[11] स्यात्क्रान्तिवृत्तं तदेव हि ।
तन्नाडीवृत्तसंपाताद्भवेदायनमण्डलम् ॥८॥
क्रान्तिनाडीवलय[12]योस्तत्र स्यात्परमंतरं ।
परक्रान्तिमितं तत्स्यान्नैकरूपं कदाचन ॥९॥

---

(घ) १. संपात : for (सपात) (ङ)
९. परापमांशैस्तु for (परायमांशेस्तु) (ङ)
११. तदेवापमवृत्तं for (तदेवायमवृत्तं) (ङ)

(ङ) २. सौमात for (सौम्यात्) ३. याम for (याम्य)
४. +नाडीव+ ५. तद्यामोत्तर for (तद्याम्योत्तर)
६. वृत्तानां for (भूजानां) ७. संगत्तौ for (संगमौ)
८. गेयौ for (ज्ञेयौ)
१०. तत्पलिख : for (तत्पालित : ) १२. नाडिवलय for (नाडिवलय)

क्रान्तिकोद्य[1]ंशवृत्तानि द्यु निशाख्यानि कारयेत् ।
ध्रुवा तथा[2] कदम्बास्तु[3] शरक्रो[4] द्यु ट्रुवानि च ॥१०॥
ऊर्ध्वाधः स्वस्तिके लग्नं चलं दृङ्[5]मण्डलं तथा ।
पूर्वापरस्वस्ति[6]कोत्थं वृत्तं स्याच्चलवृत्तकं ॥११॥
त्रिभोनलग्नदृग्वृत्तं तत्स्या[7]दृक्षेपमण्डलं ।
तज्जे[8] नतोन्नतज्ये च[9] स्यातां[10] दृक्षेप[11]दृग्गती ॥१२॥
वृत्ते याम्यो[12]त्तरे खात्तु नाडि[13]का वलयावधि ।
पलांशां[14]स्तज्जकोद्यं[15]शा लंबां[16]शा दक्षिणाः[17] सदा ॥१३॥
ध्रुववृत्तं क्रान्तिवृत्तं नाडिकावलयांतरं ।
क्रांतिः[18] सौम्या च याम्या स्या[19]त्कदंबाख्ये परा स्मृता ॥१४॥
याम्योत्तर[20]ाख्यवृत्ते तु क्रांतिरक्षांशसंस्कृता[21] ।
नतांशका[22]ः खमध्यांते स्युर्भुं[23]जादुन्नतां[24]शकाः ॥१५॥

---

(घ) १. कोट्यंश for (कोद्यंश) २. ध्रुवात्तथा for (ध्रुवा तथा)
३. कदंबात्तु for (कदंबास्तु) (ङ) १५. कोट्यंशा for (कोद्यंशा)
२३. भूंजा for (भुंजा)

(ङ) ४. सरकादुद्भवानि वा for (शरकोद्युद्भवानि च)
५. दृडंडलं for (दृङ्मण्डलं) ६. स्वस्ति कोस्थ for (स्वस्तिकोत्थं)
७. तस्मादृक्षेप for (तत्स्याद्वृक्षेप) ८. तजेनतोनतजे for (तज्जेनतोन्नतज्ये)
९. तस्मा for (चस्या) १० तांद्दग for (तांद्द)
११. सेपदृग्गती : for (क्षेपदृग्गतीः) १२. यामोत्तरे for (याम्योत्तरे)
१३. नडिका for (नाडिका) १४. पलासास्तज for (पलांशांस्तज्ज)
१५. कोटंसा for (कोट्यंशा) १६. लंबासा for (लंबांशा)
१७. विसर्गलुप्त १८. विसर्गलुप्त
१९. तस्य for (स्यात्) २०. यामोत्तर for (याम्योत्तर)
२१. संस्कृत : for (संस्कृता)
२२. नतासखाकमध्यान्ते for (नतांशका : खमध्यान्ते)
२४. दुनतांसका for (दुन्नतांशका : )

तल्लग्नं[1][2] वलयं प्रोक्तं समचिन्हाख्यमण्डलं ।।१६।।
तत्राग्रा विषुवद्वृत्ताद्ग्रहबिंबावधि[3] स्मृता ।
समवृत्ताद्भुजांशाश्च[4] ज्ञेया गणितकोविदैः ।।१७।।
उद्वृत्तभूजवृत्तांतश्चरं[5] स्याद्युनिशाभिघे[6] ।
भूजयाम्योत्तरांतस्थं तत्रैव स्याद्दिनार्द्धकं[7] ।।१८।।
दृग्वृत्तं[8] ग्रहबिंबस्य क्षितिजे यत्र संगतं ।
तच्चिन्हस्वस्तिकान्तः[9][10] स्यात्क्ष्माजवृत्ते[11] दिगंशकाः ।।१९।।
अग्रातुल्यादिगंशाः स्युर्लग्नजा वित्रिभस्य तु ।
अग्राकोट्यंशकैस्तुल्यास्तावन्तः[12] सत्रिभस्य च ।।२०।।
पूर्वापरस्वस्तिकयोर्बद्धं[13] सूत्रं तु यद्भवेत् ।
पूर्वापरं तु तद् ज्ञेयं याम्योदक् स्याद् ध्रुवाभिधां[14] ।।२१।।
द्युरात्र[15]कुज संपातसूत्रं स्यादुदयास्तकं ।
समाख्यचिन्हयोर्बद्धं समसूत्रं तदुच्यते ।।२२।।
ऊर्ध्वाधः स्वस्तिके लग्नमूर्ध्वसूत्रं तदुच्यते ।
एवं विपलजोर्ध्वाधः सूत्रं कार्यं विचक्षणैः ।।२३।।
नक्रकीटाद्ययोर्बद्धं सूत्रं स्यादपमण्डले ।

---

(घ) १. +याम्योत्तरक्षितिजयोः संपातो समसंज्ञकौ+
११ स्युक्ष्मा for (स्यात्क्ष्मा) १२. कोट्यंश for (कोद्यंश) (ङ)
१५. द्युरात्र for (द्युराज)

(ङ) २. तलग्नं for (तल्लग्नं)
३. दृग्रह for (द्ग्रह) ४. भु for (द्भु)
५. भुज for (भूज) ६. साध्य for (स्याद्यु)
७. दिवार्द्धकं for (दिनार्द्धकं) ८. दिग्वृत्तं for (दृग्वृत्तं)
९. तचिह्न for (तच्चिह्न) १०. खस्तिकांतस्यु for (स्वस्तिकांतः स्यात्)
१३. वंद्धं for (बद्धं) १४. ध्रुवाभिधम् for (ध्रुवाभिधां)

निरक्षक्षितिजे बद्धं निरक्षास्तोदयाभिधं ।।२४।।
याम्योत्तरद्यु[1]रात्राणां वृत्तानां यत्र संगतिः ।
तत्र यद्विनिबद्धं तु सू[2]त्रं द्युज्याभिधं भवेत् ।।२५।।
[3]नतांशजीवा दृग्ज्या स्यादु[4]न्नतज्या नरः स्मृतः ।
[5]अग्राग्रकाच्छंकुमू[6]लं यावच्छंकुतलं स्मृतं ।।२६।।
अग्रानृतलसंस्काराद्याम्यः सौम्[7]यो भुजो भवेत् ।
पूर्वापराख्यसूत्रात्तु कोटिः पूर्वापरे स्मृता ।।२७।।
मेषसंपाततो जूकसंपातावधिकः स्मृतः ।
सौम्यगोलो रा[8]शिषट्कं याम्यगोलस्तुलादिकः ।।२८।।
सौम्यायनं न क्रमु[9]ख्यात्कीटा[10]द्याद्दक्षिणा[11]यनं ।
पूर्वापराख्य संपातलग्नं वृत्तं चलाभिधं ।।२९।।
मध्ये समंताद् गो[12]लस्य भूगोलस्त्वीश्वरेच्छया ।
बिभ्राणो भगव[13]च्छक्तिमचलस्तिष्ठति ध्रुवं ।।३०।।
अर्द्धाधिको भूमिदेशो जलमग्नोस्ति सर्वदा ।
भूसक्तो जलगोलोस्ति तदूर्ध्वं वन्हिगोलकः ।।३१।।
तदूर्ध्वं मारुतो गोलस्तदूर्ध्वं गोलकाः क्रमात् ।
चन्द्रसौम्या स्फु[14]जित्सू[15]र्य भू[16]जेज्यरविजन्मनां ।। ३२।।

---

(घ) ९. मुखात् for (मुख्यात्) (ङ)

(ङ) १. द्यु रात्रानां for (द्युरात्राणां)  २. सूत्रं for (सुत्र)
३. नतांसजीवा for (नतांशजीवा)  ४. दुनतज्याः for (दुन्नतज्या)
५. अथा for अग्रा)  ६. मुलं for (मूलं)
७. सौम्ये for (सौम्यो)  ८. राषि for (राशि)
१०. कीडा for (कीटा)  ११. दक्षिणाय for (दक्षिणायनं)
१२. समंता होलस्य for (समंतादगोलस्य)
१३. छत्ति for (छक्ति)  १४. +जित्सु+
१५. सुर्य for (सूर्य)  १६. भुजेज for (भूजेज्य)

भानां तदूर्ध्वं गोलः स्यादिति पूर्वे जगुर्बुधाः ।
भूमौ देशस्थितिश्चैव ज्ञेया शास्त्रांतराद्बुधैः ॥३३॥
मिथस्तिर्यक्स्थयोर्यत्र[1] सम्पातो वृत्तयोर्भवेत् ।
तत्रोत्पन्नास्तु ये कोणाः समसंज्ञा बुधैः स्मृता ॥३४॥

अथ विषुवांश क्षेत्रम्—

त्रिज्यावृत्तात्रयोत्पन्नं त्रिभुजं यत्र जायते ।
तत्रैकः समकोणश्चेच्चाप[2]जात्यं भवेदिह ॥३५॥
गोलसंधेः क्रान्तिवृत्त भुजांशाः श्रवणो भवेत् ।
विषुवांशास्तु कोटिः स्यात्क्रांतिद्यौ[3] व भुजस्तथा ॥३६॥
गोलसन्धेस्त्रिभांते तु कर्णः कोटयंशकैः समाः[4] ।
परं क्रान्त्यंशका बाहुश्चापत्र्यस्रं त्रिबाहुकं ॥३७॥
नातश्चापानुपातो वै भिन्नजाति[5]त्वतो भवेत् ।
तस्माज्जीवानुपातो वै कथितः पूर्वसूरिभिः ॥३८॥
परा[6]क्रान्तिज्यका बाहुस्त्रिज्याकर्ण[7]स्तयोस्तु यत् ।
कृत्यंतरपदं कोटिः परात्पद्युज्यका भवेत् ॥३९॥
इष्टापमज्यका[8] बाहुर्भुजांशज्याश्रवो भवेत् ।
तद्वर्गयोः पदं कोटिर्भुजमूलश्रवोंतरं ॥४०॥
द्युज्याग्रस्थि[9]तितो नैव चापं संजायते क्वचित् ।
अतस्त्रिज्यानुपातेन तच्चापं[10] विषुवांशकाः ॥४१॥

---

(ङ) १. स्तयो for (स्थयो)  २. श्चेचाप्य for (श्चेच्चाप)
३. भौ for (द्यौ)  ४. समः for (समाः)
५. जोति for (जाति)  ६. परक्रान्ति for (पराक्रान्ति)
७. कर्णयोस्तयोस्तु for (कर्णस्तयोस्तु)
८. इयमज्यका for (इष्टापमज्यका)  ९. द्युजाप्रास्थि for (द्युज्याग्रस्थि)
१०. तचापं for (तच्चापं)

विषुवांशमिदं क्षेत्रं गोलजात्ये[1] प्रयोजयेत् ।
सम्पातं गोलसन्धिं च कल्पयेच्चायनं त्रिभे ॥४२॥

इति विषुवांश क्षेत्रम् ।

अथ छाया साधनं—

अथ छाया द्विधा प्रोक्ता प्रथमा परभेदतः[2] ।
प्रथमा च विलोमाख्या द्वितीया सरलाभिधा ॥१॥
प्रथमाभित्तगा ज्ञेया द्वितीया[3] भूतिगामिनी[4] ।

इदं पद्यं स्पष्टार्थं । अत्रोपपत्तिः—

जलसमीकृतायां भूमौ शंकुर्लंबरूपः स्थाप्यः । अथवा दृग्वृत्तस्पर्धिन्यां भित्तौ भूमिसमानान्तरितः शंकुर्लंबरूपः स्थाप्यः । रविबिंबकेन्द्रात्तिर्यक् शंक्वग्रस्पर्शि[5]भूगतसूत्रस्य । शंकुमूलस्य चान्तरं छायोच्यते[6] । एवं भित्तावपि ज्ञेयं । या भित्तौ छाया भवति सा प्रथमाख्या विलोमाख्या च ज्ञेया । या भूमौ छाया भवति सा द्वितीयाख्या सरलाख्या च । शंक्वग्रछायाग्रयो[7]रन्तरसूत्रं छायाकर्णः[8] । सूर्योदये भित्तिगतशंकोः छायाभावः । यथा यथा रवेरुन्नतांशानां वृद्धिर्भवति तथा तथा छायावृद्धिर्भवति । मध्याह्ने परमा भवति । अत एवेयं प्रथमा छायोच्यते । भूमिगतशंकोस्तु सूर्योदये परमा छाया भवति । यथा यथा रवेरुन्नतांशानां वृद्धिर्भवति तथा तथा छायापचयो भवति । खमध्यगेर्के छायाभावः । भित्तिगतशंकुः षष्टिविभागात्मकः[9] कल्पितः । भूमिगतशंकुः[10] द्वादशांगुलः । अथवा सप्तांगुलः पादछायात्मकः ।

---

(घ) १०. शंकुर्द्वादशांगुलः (शंकुः द्वादशांगुलः)

(ङ) १. जाते for (जात्ये)
२. भेदैः तैः for (भेदतः)
३. द्वितीय for (द्वितीया)
४. भूमिगामीनी for (भूमिगामिनी)
५. समकुप्रसस्यसि for (शंक्वग्रस्पर्शि)
६. चायोच्यते for (छायोच्यते)
७. संकुग्रहयायाग्रयो for (शंक्वग्रछायाग्रयो)
८. कर्णो for (कर्णः)
९. विभागात्मकं for (विभागात्मकः)

अथ शंक्वग्र[1] केन्द्रं कृत्वा शंकुमित[2]व्यासार्द्धेन यद्वृत्तं[3] भवति तत्पालिगत-शंकुमूला छाया भुजरूपा भवति । तदग्रशंक्वग्रान्तरे[4] छायाकर्णः । अस्मिन् त्रिभुजे शंकुमूल[5]कर्णसूत्रान्तरे यद्वृत्तखण्डं तस्य चापस्येयं छाया जाता ।


**अथ क्षेत्रं यथा—**

अत्र प्रथमा छायोन्नतांशानां[6] द्वितीया[7] छाया[8] तन्नतांशानां[9] छाया भवति । यदा प्रथमा[10] छाया दशांशचापस्य भवति तदा द्वितीया अशीत्यंशचापस्य भवति । एवं परस्परं यस्य[11] चापस्य ज्या त्रिज्यागुणा तच्चापकोटिज्या भक्ता तत्फलं[12] चापस्य प्रथमा छाया भवति । पुनर्यस्य चापस्य कोटिज्या षष्ठिगुणा भुजज्या भक्ता तस्य[13] चापस्य द्वितीया छाया भवति । यत्र[14] छायाशब्दस्तत्र प्रथमा छाया ज्ञेया । पुनर्भुजज्या भुजः कोटिज्या कोटिस्त्रिज्याकर्ण इत्यस्य त्रिभुजस्य शंकुछाया[15] छायाकर्णात्मकं[16] क्षेत्रं सजातीयं ।

---

(घ) १५. 'छाया' लुप्त

(ङ) १. संकग्रं for (शंकग्र)   २. सिकुमित for (शंकुमित)
३. यवृत्तं for (यद्वृत्तं)
४. संकग्रांतरे for (शंक्वग्रांतरे)   ५. संकू for (शंकु)
६. छायोनतांसानां for (छायोन्नतांशानां)
७. तत् द्वितीया for (द्वितीया)   ८. छायाया for (छाया)
९. तनतांसानां for (तन्नतांशानां)
१०. प्रथम for (प्रथमा)
११. +कस्यापि+
१२. +त+
१३. एतस्य for (तस्य)
१४. अत्र for (यत्र)
१६. +भक्तस्य फलेन तुल्यं भवति । तस्माद्यद्येका+



अथ कश्चनाभीष्टांक अभीष्टचापछायया गुणितः त्रिज्याभक्तः यत्फलं लभ्यते, तत्रिज्या गुणिताभीष्टांकस्य[१] तच्चापकोटिछाया भक्तस्य फलेन तुल्यं भवति। तस्माद्यद्येका छाया ज्ञातास्ति तदा त्रिज्यावर्गे ज्ञातचाप[२]छाया भक्ते द्वितीया छाया भवति। षष्ठिविभागात्मक शंकुछाया पंचभक्ता द्वादशांगुलशंकुछाया क्षेत्रं भवति।

इति छायाधिकारः


अथ क्रान्ति साधनाधिकारः। तत्र प्रथमं क्रान्तिलक्षणमुच्यते—

क्रान्तिनाडीवलययोरन्तरं क्रान्तिरुच्यते।
प्रथमा परभेदेन द्विविधा सा प्रकीर्तिता ॥१॥
प्रथमा ध्रुववृत्तस्था कदम्बवलये परा।
परमास्त्वायने वृत्ते प्राप्तेयं विविधा बुधैः ॥२॥
पूर्वाचार्यैः क्रान्तिभागा जिनसंख्याः प्रकीर्तिता।
तथा [३]बतुलमजूषेन देशे जूना न संज्ञके ॥३॥
[४]भागास्त्र्यक्षिमिताः क्रान्तिः [५]कलाभूबाणसंमिताः।
फामामूनामुकेनापि त्र्यक्षिभागाः [६]कलास्तथा ॥४॥
पंचत्रिसंमिता क्रांतिर्निश्चितैवं सुबुद्धिना।
उलूकबेगसंज्ञेन पुरे समरकंदके ॥५॥
क्रान्तिरा[७]प्ता त्र्यक्षिभागाः कलाभिः स्वा[८]ग्निभिर्युताः।

---

(घ) ३. सुनिश्चित यावत् लमजूषेन for (तथा बतुलमजूषेन)
८. स्वाग्निभिर्युताः for (स्वाग्निभिर्युताः) (ङ)

(ङ) १. भिष्टांकस्य तछाप for (भीष्टांकस्य तच्चाप)
२. छाप for (चाप)
३. वितुल मजसेन for (बतुल मजूषेन)
४. भागास्त्रक्षितिजाः (भागास्त्र्यक्षिमिताः)
५. कलाममिता for (कलाभूबाणसंमिताः)
६. 'कलास्तथा' लुप्त
७. राक्षा अक्षिभागाः for (राप्तात्र्यक्षिभागाः)



एवं क्रान्ति[1]क्रमेणैव प्राप्ता वेध[2]विशारदैः ॥६॥
राज्ञा श्रीजयसिंहेन प्राप्ता जयपुरे तथा ।
त्र्यक्षभागमिता[3] क्रान्तिर्वस्वक्षिकलिकायुता ॥७॥
ध्रुववृत्ते खेटभोगनाडीवृत्तांतरं तु यत् ।
[4]साद्यक्रान्तिस्तथाभोगात्कदंबवलये परा ॥८॥
तथैव ग्रहबिंबस्य नाडीवृ[5]त्तस्य यद्भवेत् ।
ध्रुववृत्तेंतरं स्पष्टा क्रान्तिराद्या निरूपिता ॥९॥
बिंबात्कदंबवृत्ते तु नाडिकावलयावधि ।
[6]स्पष्टान्यक्रान्तिरुक्तेयं पूर्वैर्यवनसूरिभिः ॥१०॥

अथेष्टक्रान्तिसाधनं—

दोर्ज्या परापमज्याघ्नी त्रिज्याप्ता [7]फलजं धनुः ।
क्रान्तिराद्या गोलदिक् स्यादथकोटेस्तु या भवेत् ॥११॥
विलोमा सा निगदिता क्रान्तिर्गणितकोविदैः ।
विलोमक्रान्तिकोटिज्या भक्ता खेटस्य दोर्ज्य[8]का ॥१२॥
परमापरक्रमज्याघ्नी तच्चा[9]पं त्वपमः परः ।
भुजांशानां [10]तु या जीवा सापरक्रान्तिभागुणा ॥१३॥
त्रिज्या भ[11]क्ता भवेच्छाया तच्चा[12]पं वापमः [13]परः ।
सत्रिभद्यु[14]ज्यया भक्ता परालपद्युज्यया हता ॥१४॥

---

(घ) १. क्रान्तिः for (क्रान्ति)
१३. चेत् for (परः)

(ङ) २. वेधे for (वेध)
३. युक्ता for (मिता)
४. अथ for (साद्य)
५. 'नाडीवृत्तस्य' लुप्त
६. स्पष्टा for (स्पष्टान्य)
७. पलजं for (फलजं)
८. दोर्ज्यया for (दोर्ज्यका)
९. तचापं for (तच्चापं)
१०. 'तु या' लुप्त
११. भक्त for (भक्ता)
१२. तचापं for (तच्चापं)
१४. द्युजया for (द्युज्याया)

त्रिज्याफलधनुः शुद्धं नवतेर्बापमः परः ।
गोलदिक्त्वथ खेटस्य शरसंस्कारतस्त्वयं ॥१५॥
स्फुटान्यक्रान्तिसंज्ञः स्यात्तज्जीवा त्रिज्ययोद्धृता ।
सत्रिभद्युज्यया निघ्नी तच्चापं च स्फुटापमः ॥१६॥

इति क्रान्त्यानयन प्रकारः ।

ध्रुववृत्ते क्रान्तिवृत्तस्थग्रहभोगचिह्ननाडीवृत्तयोरन्तरं[1] आद्यक्रान्तिः[2] प्रथम-[3,4,5] क्रान्तिः स्यात्[6]। पदचतुष्टये भुजसमत्वे क्रान्तिस्तुल्यैव भवति । अतः प्रथमपद-क्रान्तिसाधनमुक्तं[7]। पूर्वस्वस्तिकात्पश्चिमस्वस्तिकाद्वा नवत्यंशान्तरे यद्वृत्तं तदा-यनवृत्तं कदम्बवृत्तं ध्रुववृत्तं तदेव भवति। आयनवृत्ते[8] क्रान्तिवृत्तनाडीवलययो-[9] र्यदन्तरं सा परमा क्रान्तिः। आर्षग्रन्थेषु चतुर्विंशत्यंशमिता परमक्रान्तिरुक्ताऽस्ति[10]। यवनैर्वेधेन[11] वत्लम् जूषेन[12] लब्धा २३।३५ पश्चात्फामामूनाम्ना लब्धा २३।३५ समर-कन्दनगरे उलूकबेगेन लब्धा २३।३० राज्ञा[13] श्रीजयसिंहदेवेन जयपुरे वेधेन लब्धा क्रान्तिः २३।२८ इदानीमनया क्रान्त्या व्यवहारः। वेधप्रकारस्तैरुक्तः[14]। कर्कादौ रविवेधेन परमोन्नतांशा[15] ज्ञातव्याः। तथा मकरादौ रव्युन्नतांशा ज्ञातव्याः।

---

(घ) १. वृत्तयो for (व्रतयो) (ङ)
६. कदंबवृत्ते क्रान्तिवृत्तस्थग्रहभोगचिह्ननाडीवृत्तयोरंतुरं अन्यक्रान्तिर्द्वितीयक्रान्तिः स्यात्+
१२. २३।५१ for (२३।३५)

(ङ) २. रंतरांश्चाद्यक्रान्तिः for (रंतरं आद्यक्रान्तिः)
३. +स्यात्+     ४. 'प्र' लुप्त
५. 'थम क्रान्तिः स्यात्' लुप्त     ७. 'मुतम् for (मुक्तम्)
८. वृत्ति for (वृत्ते)     ९. वलयर्या for (वलययोर्)
१०. रुतास्ति for (रुक्तास्ति)
११. वितलमजूसेन for (वत्लम्लजूषेन)     १३. ज्ञा for (राज्ञा)
१४. रक्तः for (रुक्तः)     १५. परमौनतांसा for (परमोन्नतांशा)

अनयोरन्तरार्द्धं परमक्रान्त्यंशा भवन्ति । कर्कस्थे रवौ नतांशानां[१] क्रान्त्यंशानां योगो[२]ऽक्षांशा भवन्ति ।

**अथेष्टक्रान्तिसाधनं—**

भुजज्या परक्रान्तिज्या गुणात्त्रिज्या भक्ता फलस्य[३] चापं आद्यक्रान्तिः स्यात् । खेटगोलदिग्भवति ।

अथ कोटिज्या परक्रान्तिज्या गुणा[४]त्त्रिज्या भक्ता[५] फलस्य चापं विलोमक्रान्तिर्भवति ।

**अत्रोपपत्तिः—**

प्रथम[६]क्षेत्रेण । क्रान्तिवृत्तस्य अबचापं राशित्रयमितमस्ति । अजं नाडीवलयस्य पदमस्ति । दहृ अदचापस्य क्रान्तिरस्ति ।

**अथानुपातः—**

अबचापज्यया परमक्रान्तिज्या लभ्यते[७] तदा[८]ऽबचापज्यया किमिति लब्धं क्रान्तिः ।


**अथान्यक्रान्तिसाधनं—**

ग्रहस्य भुजज्या पपक्रान्तिज्या[९] गुणाविलोमक्रान्तिकोटिज्या भक्ता[१०] फलस्य

---

(घ) ६. 'प्रथम क्षेत्रेण' लुप्त

यहाँ दक्षिण मार्जिन में निम्नांकित क्षेत्र अंकित है—



(ङ) १. +कानां+ २. योगे for (योगो)

३. पलस्य for (फलस्य)

४. गुणत्रिज्या for (गुणात्त्रिज्या)

५. भता पलस्य for (भक्ता फलस्य)

७. लभते for (लभ्यते) ८. 'ऽ' लुप्त

९. णा for (ज्यागुणा)

१०. भता पलस्य for (भक्ता फलस्य)

चापमन्यक्रान्तिर्भवति वा[1] भुजांशानां ज्यापरक्रान्तिछाया गुणा[2] त्रिज्या भक्ता फलस्य[3] छायारूपस्य चापं वाऽन्यापमो[4] भवेत्। वा त्रिज्यापराल्पद्युज्या[5] हता सत्रिभद्युज्या भक्ता फलस्य[6] चापं नवतेः शुद्धं वान्यक्रान्तिर्भवति।

**अत्रोपपत्तिः**—

द्वितीय क्षेत्रेण। दअधवं अयनवृत्तमस्ति। अहवं नाडीवलयं। बं ध्रुवः। दहधं क्रान्तिवृत्तं। जं कदंबः। बतकं[7] ध्रुववृत्तं। जतमं कदंबवृत्तं[8]। तकं क्रान्तिः। तमं अन्यक्रान्तिः। वसं[9] सत्रिभक्रान्तिः। लसं सत्रिभक्रान्तिकोटिः[10]।

**अथानुपातः**—

लसज्यया लमत्रिज्या प्राप्यते तदा कतसंज्ञया प्रथमक्रान्तिज्यया किमिति। लब्धा तमज्या। तच्चापमन्यक्रान्तिः[11]। प्रथमक्रान्तिज्यास्वरूपं तु। दोर्ज्यापरक्रान्तिज्या गुणा त्रिज्या[12] भक्ता। अत्र त्रिज्ययोर्गुणहरयोस्तुल्यत्वान्नाशे[13] कृते यथोक्तमुपपन्नम्[14]। क्षेत्रं यथा—

**अथ प्रकारान्तरेणाऽन्यक्रान्तिसाधनोपपत्तिः[15]**—

तृतीयक्षेत्रेण[16]। हकेन्द्रे अबजदं आयनवृत्तं[17] कार्यं, अजरेखा बदरेखा च

---

(घ) ९. नसं for (वसं) (ङ)          १६. त्रितीय for (तृतीय)

(ङ) १. 'वा' लुप्त          २. गुण for (गुणा)
३. पलस्य for (फलस्य)          ४. वान्य पमो for (वाऽन्यापमो)
५. द्यु जा for (द्यु ज्या)          ६. पलस्य (फलस्य)
७. तवकं for (बतकं)          ८. +कदं+
१०. कोडि: for (कोटिः)          ११. तचाप for (तच्चाप)
१२. त्रि for (त्रिज्या)          १३. त्रिजयो for (त्रिज्ययो)
१४. मुपपनं for (मुपपन्नम्)          १५. प्रकारांतरेण for (प्रकारांतरेणा)
१६. तृतीये क्षेत्रेण: for (तृतीयक्षेत्रेण)          १७. वृतं for (वृत्तं)

कार्या। अजं क्रान्तिवृत्तस्य व्यासः[1]। बदं नाडीवलयस्य व्यासः सतपर्यन्तं वर्द्ध-
नीयः। अतं परमक्रान्तिछायालमं[2] अन्य[3] क्रान्तिछाया[4]। हलं दोर्ज्या। अत्रानुपातः-
[5]यदि अहेन अतं लभ्यते तदा हलेन किमिति लब्धं लमं। चतुर्थक्षेत्रेण[6]। अस्या-
श्छायायाश्चायमन्य[7]क्रान्तिर्भवति। इत्युपपन्नम्। पुनः प्रकारान्तरेणान्यक्रान्तिसा-
धनोपपत्तिः। अघहं क्रान्तिवृत्तं। अस्य[8] कदम्बोजं। अझहं[9] नाडीवलयं, अस्य[10] ध्रुवोवं।
बजझधं[11] आयनवृत्तं। तमजलं कदम्बवृत्तं। तमं अन्यक्रान्तिः। मजं अन्य क्रान्ति
कोटिः[12]। वलसनं[13] सत्रिभ[14]ध्रुववृत्तम्। नसं सत्रिभक्रान्तिः। सलं सत्रिभक्रान्तिकोटिः।
यदि सलज्यया[15] लमत्रिज्या लभ्यते तदा झजज्यया[16] किमिति लब्धा जमज्या, अस्या-
श्चापमन्यक्रान्तिकोटिः इयं नवति शुद्धा अन्यक्रान्तिर्भवतीत्युपपन्नं[17]।

**अथ स्पष्टक्रान्त्यानयनम्—**


अन्यक्रान्तिः शरसंस्कृता स्पष्टान्यक्रान्तिर्भवति। अस्या ज्या सत्रिभद्युज्या

---

(घ) २. 'लमं' लुप्त
३. 'अन्य' लुप्त
४. 'क्रान्तिछाया' लुप्त
६. 'चतुर्थक्षेत्रेण' लुप्त

नोट—इस पृष्ठ पर सबसे नीचे 'चतुर्थक्षेत्र' शब्द अंकित है।

(ङ) १. व्याखः for (व्यासः)
५. 'यदि अहेन— श्चायम' लुप्त
७. 'न्यक्रान्ति पुनः' लुप्त
८. तस्य for (अस्य)
९. अहं for (अझहं)
१०. यस्य for (अस्य)
११. बजधं for (बजझधं)
१२. विसर्ग लुप्त
१३. वलसंसनं for (वलसनंस)
१४. त्रिमध्रुववृत्तं for (त्रिभध्रुववृत्तम्)
१५. सलज्याया for (सलज्यया)
१६. 'झ' लुप्त



गुणा[1] त्रिज्या भक्ता फलं स्पष्टक्रान्तिज्या भवति। वा स्पष्टान्य[2]क्रान्तिज्यापरम[3]-क्रान्तिकोटिज्या गुणा स्पष्टान्यक्रान्तिकोटिज्या भक्ता लब्धं स्पष्टाक्रान्तिज्या तच्चापं[4] स्पष्टा क्रान्तिः। अनयोः प्रकारयोरुपपत्तिर्द्वितीयचतुर्थक्षेत्राभ्यां ज्ञेया। यतस्तत्राद्यक्रान्तिर्भुजः अन्यक्रान्तिः कर्णः, अत्र स्पष्टक्रान्तिर्भुजः स्पष्टान्यक्रान्तिः कर्णः तस्मादिदमपि क्षेत्रं तत्सजातीयमस्ति। शरा[5]भावे मध्यमक्रांतिरेव स्पष्टा क्रान्तिः। मध्यमक्रान्त्य[6]भावे शरसत्वे शरतु[7]ल्यैव स्पष्टान्यक्रान्तिः। यदा ग्रह आयन-वृत्ते भवति तदा स्पष्टान्यक्रान्तिरेव स्पष्टा क्रान्तिः।

**अथ प्रकारान्तरेण स्पष्टक्रान्त्यानयनम्[8]—**


**अथवा ग्रहकोटिज्याशरको[9]टिज्यका हता।**
**त्रिज्याप्ता फलजं चा[10]पं चलवृत्तगतं भवेत् ॥१॥**
**तत्कोटिज्याहरो ज्ञे[11]यः शरज्या त्रिज्यया हता।**


---

नोट—यहाँ ३ रा और ४ था क्षेत्र अंकित है परन्तु स्पष्ट नहीं है।

(घ) १७. + श्रीः +

(ङ) १. त्रिज्यागुण for (गुणा)
२. 'न्य' लुप्त
३. 'भ' लुप्त
४. तचापं for (तच्चापं)
५. शरभावे for (शराभावे)
६. क्रान्त for (क्रान्त्य)
७. सरतुल्यैःव for (शरतुल्यैव)
८. क्रान्त्यान्य for (क्रान्त्यानयनम्)
९. 'शरकोटिज्य' लुप्त
१०. चपं for (चापं)
११. गेयः for (ज्ञेयः)





हरभक्ता फलस्यास्य चापमाद्यं शराशकं ।।२।।
एतच्च परमक्रान्त्या संस्कृतं चापरं धनुः ।
इदमायनवृत्तस्थं तस्य ज्या हरसंगुणा ।।३।।
त्रिज्याप्राप्त धनुः स्पष्टा क्रान्तिः स्यात्पर चापदिक् ।

इदं सार्द्धपद्यत्रयं सुगमार्थं ।

**अस्योपपत्तिः—**

पञ्चमक्षेत्रेण । अतदजं क्रान्तिवृत्तं । अनसहजं नाडीवलयं । अवबजं चलवृत्तं । धहदबमायनवृत्तं । धसवं ग्रहोपरिगतं ध्रुववृत्तं । कनतवं शरवृत्तं । अजौ गोलसन्धी । धं ध्रुवस्थानं । कं कदंबः । वं ग्रहबिंबस्थानं । तदं ग्रहकोटिः । कवं शरकोटिः । अवं हरचापं । बदं प्रथमचापं । बहं द्वितीयचापं । वसं स्पष्टा क्रान्तिः । इत्येवं सर्वमुपपन्नं ।

इति क्रान्ति साधनम् ।


**अथाक्षक्षेत्राणि—**

अक्षज्यकादोः श्रवणस्त्रिभज्यालंबज्यकाकोटिरिति प्रसिद्धं ।
क्षेत्रं पलांश प्रभवेषु मुख्यं विद्येव मानार्थयशः सुखेषु ।।१।।

---

(घ) नोट—यहाँ ५ नंबर का क्षेत्र बना हुआ है, परन्तु स्पष्ट नहीं—

(ङ) १. पलस्यास्य for (फलस्यास्य)
२. माद्यां for (माद्यं)
३. अदतजं for (अतदजं)
४. संधि for (संधी)
५. 'कवं शरकोटिः' लुप्त
६. मुपपनं for (मुपपन्नं)
७. जकादो for (ज्यकादोः)



पलप्रभा-बाहुरिनाश्च कोटिः श्रवोक्षकर्णस्त्वपवर्त्तितं च।
कुज्याभुजः[1] स्यादपमज्यकात्रकोटिस्त्रिबाहौ श्रवणौ ग्रका स्यात् ॥२॥
अग्राद्यखण्डं भवतीह कोटिः श्रवोपमज्या समनाभुजोत्र।
अग्राग्रखण्डं तु भुजः क्षितिज्या श्रवस्तथोद्वृत्तनरस्तु[2] कोटिः ॥३॥
अग्राभुजस्तद्वृत्तिरत्रकर्णस्तथैव[3] कोटिः समवृत्तशंकुः।
कुज्यो नितातद्वृत्तिरत्रकोटिर्भुजोपमज्या समाना च कर्णः ॥४॥
अग्रादिखण्डं तु भुजस्तु कोटिरुद्वृत्तशंकू[4]नसमाख्यशंकुः।
कुज्योनिता तद्वृत्तिरत्रकर्णः क्षेत्राण्यमून्यक्ष भवानि चाष्टौ ॥५॥
कोटिस्तथैवेष्टनरः[5] श्रुतिः स्यादिष्टाहृतिः शंकुतलं भुजोत्र।
ज्ञातौ भुजौ चैकभवौ यदास्तोन्यक्षेत्रबाहुर्विदिस्तदा स्यात् ॥६॥

अथोदाहरणम्—

अथापमज्या पलकर्णनिघ्नी स्यादग्रिका सूर्यहृता तथैव।
क्रांतिज्यकाक्षप्रभया विनिघ्नी सूर्या[6]द्वृत्तोन्मण्डलशंकुरेव।
अग्रा तथा द्वादशसंगुणा च पलप्रभा हृतसमशंकुमानं ॥८॥
समाख्य शंकुः[7] पलकर्णनिघ्नः सूर्योद्वृतस्तद्वृतिरत्र वेद्या।
तथेष्टशंकुः पलभाविनिघ्नो[8]रव्युद्वृतः शंकुतलं प्रदिष्टं ॥९॥
शंकुस्त्वभीष्टः पलकर्णनिघ्नोरव्युद्[9]वृतोभीष्टहृतिस्तथैव।
इत्थं स्वबुध्या गणितप्रकारा बुधैर्विचिंत्या बहवोनुपातात् ॥१०॥

---

(घ) ६. त्रिज्योद्वृतोन्मंडल for (सूर्याद्वृत्तोन्मंडल)
 ९. रव्युद्धृतो for (रव्युद्वृतो)

(ङ) १. कुजाभुज्यः for (कुज्याभुजः)  २. ततोद्वृत्त for (तथोद्वृत्त)
 ३. तधृति for (तद्वृत्ति)  ४. संकु for (शंकू)
 ५. तर्थैविष्टनरः for (तथैवेष्टनरः)
 ६. सूर्योवृतन्मंडलं for (सूर्याद्वृत्तोन्मंडल)
 ७. विसर्ग लुप्त  ८. विनिधो for (विनिघ्नो)

अथ विषुवांश साधनं—

क्रांतिज्यका वर्गविहीनिता या दोर्ज्या[१]कृतेर्मूलमवाप्यते यत् ।
त्रिज्यागुणं द्यु[२]ज्यकया विभक्तं फ[३]लस्य चापं विषुवांशकाः स्युः ॥१॥
कोटिज्यका भत्र्यर्सिजिनि[४]घ्नी द्युरात्रमौर्व्या विहृ[५]ताप्त चापं ।
खांकच्युतं वा विषुवांशकाः स्यु प्रकारतोथ प्रवदामि सूक्ष्मं ॥२॥
दोर्ज्यापरा[६]ल्प द्युगुणेन निघ्नी स्वद्युज्ययाप्ता फ[७]लजं धनुर्यत् ।
ते वा भवेयुर्विषुवद्विभागा पुनः प्रकरान्तरतः प्रवक्ष्ये ॥३॥
क्रान्त्यंशकाद्यु[८]प्रभया विनिघ्नी त्रिज्या परक्रांतिभया विभक्ता ।
विलब्धचापं विषुवांशकाः स्युस्त्वाद्ये पदे सायन खेचरश्चेत् ॥४॥
भार्द्धांशशुद्धास्तु पदे द्वितीये तृतीयपादे ख[९]गजेन्दुयुक्ताः
भांशच्युतास्ते तुपदे तुरीये मेषादिकानां निजगोलसन्धेः ॥५॥

अ[१०]थार्थः—

क्रान्तिज्या दोर्ज्या वर्गान्तरपदं त्रिज्यागुणं द्युज्याभक्तं फ[११]लस्य चापं विषु-
वांशकाः वा ॥१॥ ग्रहकोटिज्या त्रिज्यागुणा ग्रहद्युज्या भक्ता फ[१२]लस्य चापं
[१३]नवतिच्युतं विषुवांशाः ॥२॥ अथवा । ग्रहदोर्ज्या पराल्पद्यु[१४]ज्या गुणा ग्रहद्युज्या
भक्ता फ[१५]लचापं विषुवांशाः । अथवा ग्रहक्रान्त्यंशानां छायात्रिज्या गुणा परक्रा-

(ग) १. स्त्रिज्या for (दोर्ज्या)
८. द्य for (द्यु) (ङ)
४. नीघ्नी for (निघ्नी)

(ङ) २. द्युजकया for(द्युज्यकया)
३. पलस्य for (फलस्य)
५. वृहृतातपं for (विहृताप्तचापं)
६. पराल for (पराल्प)
७. पलजं for (फलजं)
९. खगदे प्रयुताः for (खगजेंदुयुक्ताः)
१०. अस्यार्थः for (अथार्थः)
११. पलस्य for (फलस्य)
१२. फल for (फलस्य)
१३. न्यवति for (नवति)
१४. द्युजा for (द्युज्या)
१५. पल for (फल)

न्तिछाया भक्ता फलस्य[1] चापं विषुवांशा भवन्ति। प्रथमपदे[2] एत एवोदयांशा भवन्ति। द्वितीये भार्द्धांशशुद्धास्तृतीये भार्द्धांशयुताश्चतुर्थ भार्द्धांश[3]शुद्धा उदयांशा भवन्ति।

**अत्रोपपत्तिः—**

षष्ठक्षेत्रेण। कखगधं आयनवृत्तं तस्य केन्द्रं हंगोल सन्धिः। खहधं क्रांतिवृत्तं। कहगं नाडीवलयं। तस्य ध्रुवौ यझौ। यधतझं[4] ध्रुववृत्तं। हतं उदयः। हधं लग्नं। तधं क्रान्तिः। धयं क्रान्तिकोटिः। तहधत्रिभुजं खधयत्रिभुजस्य सजातीयं। खधयत्रिभुजं[5] खतव[6]त्रिभुजस्य सजातीयं स्वयं परालप द्युज्या। धयज्यया खयज्या लभ्यते तदा धहज्यया किमिति लतहज्या[7]। अस्याश्चाप[8]मुदयांशाः। अथवा धयेनधखं लभ्यते तदायतेन किमिति लब्धं कतं तन्नवति[9] शुद्धं हतं भवति इत्युपपन्नं।

**अथ चरसाधनं—**

**निरक्षसंज्ञा ये देशास्तत्राभावश्चरस्य हि।**
**दिनार्द्धं तत्र पंचेदु घटिकाभिर्मितं भवेत् ॥१॥**
**यत्राक्षांशाः साक्षदेशे परालप द्युज्यया समाः।**
**नवत्यंशमितं तत्र देशे स्यात् परमं[10] ॥२॥**

---

(घ) ३. भांश for (भार्द्धांश)
६. 'खतव—परालप द्युज्या' लुप्त
७. लब्धतहज्या for (लतहज्या)
८. चा for (चाप)
५. 'खधयत्रिभुज' लुप्त

(ङ) १. पलस्य (फलस्य)
२. प्रथममपदे for (प्रथमपदे)
४. पंचतझं for (यधतझं)
६. खव for (खतव)
७. तहज्या for (लतहज्या)
९. तत्रवधि for (तन्नवति)
१०. +चरं+

खांगनाडी[1]मितं तत्र दिनमानं परं भवेत् ।
देशादेताद्दशाल्लंकापर्यंतं येपि मध्यगाः ॥३॥
देशास्तेषु चरांशाश्च नवत्यूना भवंति हि ।
चतुर्ष्वपि पदेष्वंशा[2] ये यत्र स्युः समानकाः ।
तेषां क्रान्तिश्चरं चात्र तुल्यमेव भविष्यति ।
येषां चरं भवेत्साध्यमंशानां क्रान्तिभा ततः ॥५॥
अक्षांशछायया गुण्या त्रिज्या भक्ता फलस्य[3] यत् ।
चापं चरांशा विज्ञेयास्त्वथ वक्ष्ये प्रकारतः ॥६॥
अभीष्टांश[4]क्रान्तिजीवा त्रिज्याघ्नो लंबजीवया ।
भक्ताप्तम[5]ग्रजीवा स्याच्चापमग्रा विभागकाः ॥७॥
तत्रकोटि[6]जीवा त्रिज्याघ्नी स्वाभीष्टद्युज्यया हृता ।
फलस्य[7] चापकोटिश्च शरांशास्ते[8] भवंति हि ॥८॥
वाग्रज्या[9]क्षज्यया गुण्याऽभीष्टांशद्युज्यया हृता ।
यल्लब्धं[10] तस्य यच्चापं[11] चरांशास्ते भवंति हि ॥९॥
इष्टांशलंकोदयासिजिनीघ्नी चरांशमौर्वी परमा विभक्ता[12] ।
त्रिभज्यया[13] प्रस्य धनुश्चरांशाः, षड्भिर्विभक्ताशा. घटिकादिकं च ॥१०॥

---

(घ) यहां पत्र के बायें Margin पर निम्नांकित वाक्य लिखा हुआ है—
'खधयत्रिभुजं खतकत्रिभुजस्य सजातीयं खयं परात्पलघुज्या'
६. तत्कोटि for (तत्र कोटि) (ङ) ८. चरांशास्ते for (शरांशास्ते)

(ङ) १. नाडि for (नाडी)
२. शसा for (ष्वंशा) ३. पलस्य for (फलस्य)
४. अभिष्टांस for (अभीष्टांस) ५. मुग्र for (मग्र)
७ पलस्य for (फलस्य) ९. चापज्या (वाग्रज्या)
१०. यंलब्धं for (यल्लब्धं) ११. यं चाप for (यच्चापं)
१२. प. पमाविभक्ता for (परमा विभक्ता)
१३. त्रिभजस्थया for (त्रिभज्यया)

चरं तेन युतोनाश्च नाड्यः पर्वेंदुसंमिताः ।
दिनार्द्धं गोलयोः सौम्ययाम्ययोरस्फुटं भवेत् ।।११।।
इदं द्वाभ्यां च गुणितं दिनमानं भवेत्किल ।
उदयार्कस्य विषुवद्भागाः[१] षड्भसुतस्य[२] च ।।१२।।
तेषां यदंतरं सूक्ष्मं दिनार्द्धं तद्भवेत्किल ।
चंद्रादीनां ग्रहाणां च नक्षत्राणां तथैव च ।।१३।।
स्पष्टक्रान्ति विधायादौ चरं साध्यं ततो दिनं ।

**अथैतेषां श्लोकानां क्रमेण व्याख्या—**

निरक्षदेशे चराभावः । दिनार्द्धं पञ्चदशघटीमितं । साक्षदेशे तु यत्राक्षांशाः परात्पद्युज्या तुल्यास्तत्र परमचरं नवत्यंशमितं परमदिनमानं षष्टिघट्यात्मकं । एतादृशाद्देशाल्लंकापर्यन्तं[३] ये ये देशास्तत्र तत्र चरांशा नवत्यपेक्षया न्यूना एव भवन्ति ।

अथ चतुर्षु पदेषु ये येंशाः समानास्तेषां क्रांतिश्चरं च तुल्यमेव भवति । येषामंशानां चरं साध्यं भवति । तेषां क्रांतिछाया अक्षांशछाया गुणा त्रिज्या भक्ता फलस्य[४] चापं चरांशा भवन्ति ।

**अथ द्वितीयप्रकारः—**

अभीष्टांशानां क्रांतिज्या त्रिज्या गुणा लम्बज्या भक्ता लब्धं अग्रज्या तस्य चापं अग्रांशाः । तत् कोटिज्या त्रिज्या[५] गुणा अभीष्टांशद्युज्या भक्ता तच्चाप[६]कोटिश्चरांशा भवन्ति ।

---

(घ) २. युतस्य for (सुतस्य) (ङ)

(ङ) १. विपुवद्भागाः for (विषुवद्भागाः)
३. + मेघा +
४. पलस्य for (फलस्य)
५. 'त्रिज्या' लुप्त
६. तचापं for (तच्चाप)

अथ तृतीय प्रकारः—

अग्रज्या अक्षज्या गुणा अभीष्टांशद्युज्या भक्ता लब्धस्य चापं चरांशा भवंति।

अथ चतुर्थप्रकारः—

आदौ परमचरं साध्यं अभीष्टांशानां लंकोदयज्या परमचरज्या गुणा त्रिज्या भक्ता फलस्य[१] चापं चरांशास्ते षड्भक्ताः घटयादिकं चरं भवति। उत्तरगोले चरं पंचदश घटीषु योज्यं दिनार्द्धं भवति। दक्षिणगोले पंचदशघटीषु शोध्यं दिनार्द्धं भवति। तद्द्विगुणितं दिनमानं न[२] भवति। इदं दिनमानं स्थूलं सूक्ष्मं तु। उदयकालीनरविविषुवांशानां स[३]षड्भरविविषुवांशानां चान्तरं दिनार्द्धं भवति। चन्द्रादिग्रहाणां[४] नक्षत्राणां[५] च स्पष्टक्रांति[६] विधाय चरं दिनमानं च साध्यं।

अत्रोपपत्तिः—निरक्षसंज्ञा ये देशा इत्यारभ्य। सप्तमक्षेत्रेण। तेषां क्रान्तिश्चरं चात्र तुल्यमेव[७] भविष्यति। इत्यंतश्लोकानानुपपत्तिः सुगमैव। एषां[८] चरं भवेत्साध्यमित्यस्य[९] उपपत्तिरुच्यते। अक्षज्या भुजः लम्बज्या कोटिः त्रिज्या कर्णः। इदं जात्यक्षेत्रम्। एतत्सजातीयं। अक्षछायाभुजः। त्रिज्याकोटिः। तद्वर्गयोगपदं कर्णः तृतीयं तत्सजातीयं। क्रांतिज्याकोटिः। कुज्या भुजः। अग्रा कर्णः तत्रानुपातः। त्रिज्ययाऽ[१०]क्षांशछाया लभ्यते तदा क्रान्तिज्यया किमिति[११]लब्धं कुज्या[१२]। इयं त्रिज्या गुणा द्युज्या भक्ता फलं चरज्या भवति। अत्र क्रान्तिज्या चे[१३] त्रिज्यया गुण्यते[१४] गुण्यते द्युज्यया भाज्यते। तदा क्रान्तिछाया भवति[१५]। तदेवमुपपन्नं। क्रान्तिछायाऽक्षछाया

(घ) २. 'न' लुप्त (ङ)
१४. 'गुण्यते' लुप्त (ङ)

(ङ) १. पलस्य for (फलस्य)
३. 'स' लुप्त
४. ग्रहानां for (ग्रहाणां)
५. नक्षत्रानां for (नक्षत्राणां)
६-७. 'क्रान्ति—तुल्यमेव' लुप्त
८. येषां for (एषां)
९. मितस्य for (मित्यस्य)
१०. 'ऽ' लुप्त
११. किमितं for (किमिति)
१२. कुजाः for (कुज्या)
१३. ते for (चे)
१५. भति for (भवति)

गुणा त्रिज्या भक्ता फलं[१] चरज्या भवति। तत्कोटिजीवेत्यस्योपपत्तिः। कखगघं श्रायनवृत्तं। अलं नाडीवलयं। कगं निरक्षक्षितिजं[२]। खघं स्वक्षितिजं। वं ग्रहस्थानं। गं ध्रुवस्थानं। घं[३] समचिह्नं। हंगोल सन्धिः ग्रहग्रहद्युज्या[४]। गतं गलं नवतिमितं। लतं चरकोटि। वघं अग्राकोटिः। हवं श्रग्रा। तवं इष्टक्रांतिः। हतं चरं। गवज्यया घवज्या[५] लभ्यते। तदा जतज्यया ६० किमिति लब्धं तलज्या। एतच्चापं नवतिशुद्धं हतं भवतीत्युपपन्नं[६]। वाग्रज्येत्यस्योपपत्तिरुक्तक्षेत्रैणेव[७][८] ज्ञेया। गघवत्रिभुजहतव[९]-त्रिभुजं मिथः सजातीयं। यदि गवज्यया[१०] गघज्या लभ्यते। तदा हवज्यया किमिति लब्धं हतज्या तच्चापं[११] हतं चरं भवतीत्युपपन्नं[१२]। इष्टांशलंकोदयसिजिनिघ्नीत्यस्यो[१३]-पपत्तिः—परमाल्यद्युज्यावृत्ते[१४] त्रिज्यायाः परमचरज्यायाश्च या निष्पत्तिरस्ति सैवा[१५]-भीष्टद्युज्यावृत्ते भीष्टलंकोदयांशानामभीष्टचरज्यायाश्च निष्पत्तिरस्ति इत्युपपन्नम्[१६]। चरं तेन युतोनाश्चेत्यस्योपपत्तिः। उत्तरगोले स्वक्षितिजं निरक्षक्षितिजादधस्ताद्-भवति, याम्यगोले उपरिष्ठाद् भवति। श्रतश्चरांशैरूनयुता नवत्यंशाः गोलयो-


---

(घ) ४. गवंग्रह for (ग्रहग्रह) (ङ)
१४. परमाल्प for (परमाल्य) (ङ)

८. क्षेत्रैणेव for (क्षेत्रैणेव)

(ङ) १. पलं for (फलं)
३. + नंगं ध्रुवस्थानं +
५ जा for (ज्या)
७. तस्योपपत्ति for (त्यस्योपपत्ति)
९. 'व' लुप्त
१०. जया for (ज्यया)
११. तचापं for (तच्चापं)
१२. भवतित्युपपनं for (भवतीत्युपपन्नं)
१३. तस्योपपत्तिः for (त्यस्योपपत्तिः)
१५. सैवाभि for (सैवाभी-)
१६. पनं for (पन्नं)

२. क्षतिजं for (क्षितिजं)
६. भवतित्युपपनं for (भवतीत्युपपन्न)



दिनार्द्धं भवतीत्युपपन्नं। इदं दिनार्द्धं प्रतिक्षणं चरवैलक्षण्यादस्फुटं इदं द्विगुणं-दिनार्द्धं दिनमानं भवतीति। सूक्ष्मं तु उदयार्कस्य विषुवांशाः साध्याः सषड्-भस्य च विषुवांशाः साध्यास्तेषां यदन्तरं तत्सूक्ष्मं दिनार्द्धं भवेत्।

अथ चन्द्रादीनां ग्रहाणां चेत्य[1]स्योप[2]पत्तिः सुगमैव।

**प्रोक्तप्रकाराद्विषुवांशकाग्रे निरक्षजाता उदयांशकास्ते।**
**पूर्वेण पूर्वेण विहीनितास्ते [3]प्रत्यंशकास्योदयकालमानं ॥१॥**
**प्रत्यंशजाता विपलोदयांशा मेषादितः खांकमिताश्च ये स्युः[4]।**
**क्रमोत्क्रमस्थाश्चरखण्डकैः स्वैः क्रमो[5]त्क्रमस्थं रहिता युतास्ते ॥२॥**
**मेषादितः स्वोदयभागकाः स्यु[6]स्तुलादितो ह्युत्क्रमतश्च वेद्याः।**
**तान्पूर्वपूर्वैः सहितान् विधाय [7]ज्यावल्लिखेद्वांशमितालयेषु ॥३॥**

**अथ विषुवांश[8]कभ्यो निरक्षलग्नसाधनम्—**

**तात्कालिकात्सायनभागसूर्याद्राश्यादिकाद्ये विषुवद्विभागाः।**
**[9]ग्राह्याश्च ते ज्यानयनप्रकारात्कार्या रसघ्नेष्टघटीभिराढ्याः ॥४॥**
**ततो धनुर्वेद्वि[10]पले विलग्नं राश्यादिकं स्यादयनांशहीनं।**
**एवं स्वकीयैरुदयैः स्वकीयं लग्नं प्रसाध्यं गणकैः स्वबुध्या ॥५॥**

**अथ [11]कालसाधनम्—**

**ससायनार्का[12]न्निजभोदयांशाः साध्यास्तथा सायनलग्नजाताः।**

---

(ङ) १. 'त्यस्यो' लुप्त
२-३. 'पपत्तिः—स्ते प्र—' लुप्त     ४. षु for (स्युः)
५. क्रमक्रमस्थै for (क्रमोत्क्रमस्थैरता)
६. 'स्तु' लुप्त     ७. यावलिखे for (ज्यावल्लिखे)
८. 'श' लुप्त     ९. ग्राहाश्च for (ग्राह्याश्च)
१०. विपये for (विपले)
११. कालासाधनं for (कालसाधनं)     १२. निजभोदयांशाः for (न्निजभोदयांशाः)

तदन्तरं षड्विहृतं[1] तु घट्यः स्युः सावनाख्युदयात् स्व देशे ॥६॥

अथ लग्ने ज्ञाते दशमलग्नसाधनम्—

विलग्नजाता उदयांशका ये खांकांशकैस्ते रहिता विधेयाः ।
तेभ्यो विलग्नं हि निरक्षजातं साध्यं भवेतद्दशमाख्यलग्नम्[2] ॥७॥

अथ लंकोदयेभ्यः क्षेत्रांशसाधनम् —

कोटिज्यकाया विपलोदयानां लंकोदयान्यद्यु गुणेन[3] गुण्या ।
त्रिभज्ययाप्ताप्त[4] धनुर्लवाद्य खांकच्युतं चाद्यपदे तदेव ॥१॥
द्वितीयके[5] खांकयुतं तृतीये खभच्युतं तुर्यपदे खभाढ्यं[6] ।
क्षेत्रांशकाः स्युः खगुणेश्च तष्टा राश्यादिलग्नं भवति स्फुटं तत् ॥२॥

अथप्रकारांतरम्—

लंकोदयानां भुजसिंजिनी[7] या स्वकोटिजात द्यु गुणेन भक्ता ।
त्रिज्या गुणाप्ताप्त[8] धनुर्लवाद्यमाद्ये पदे क्षेत्रलवा भवेयुः ॥३॥
द्वितीयके भार्द्ध लवेषु शुद्धास्तृतीयके भार्द्धयुता विधेयाः ।
चतुर्थके चक्रलवेषु शुद्धाः क्षेत्रांशका वा प्रभवन्ति गोले ॥४॥

अथ श्लोकचतुष्टयस्य व्याख्या—

कोटिज्यकेति । लंकोदयानां कोटिजीवा । विषुवांशान्यक्रान्ति कोटिज्या गुणा त्रिज्या भक्ता फलस्य[9] चापं प्रथमपदे नवति शुद्धं द्वितीये नवतियुतं[10] तृतीये खभशुद्धं तुर्ये[11] खभाढ्यं क्षेत्रांशा[12] भवन्ति । ते खाग्नितष्टा राश्यादिलग्नं भवति ।

---

(ङ) १. तद्विहृतं for (षड्विहृतं)
२. भवेत् दशमाख्यलग्नं for (भवे तद्दशमाख्यलग्नं)
३. + गुणेन +
४. त्रिभाज्यया for (त्रिभज्यया)
५. को for (के)
६. खभाढा for (खभाढ्यं)
७. शिंजिनीया for (सिंजिनीया)
८. च for (प्त)
९. पलस्य for (फलस्य)
१०. नवतीतं for (नवतियुतम्)
११. तूर्ये for (तुर्ये)
१२. क्षेत्रामसा for (क्षेत्रांशा)

**अथ प्रकारांतरम्—**

लंकोदयांशानां भुजज्या[1] त्रिज्या गुणा स त्रिभोदयांशद्युज्या भक्ता फलस्य[2] चापं प्रथमपदे क्षेत्रांशाः भार्द्धशुद्धं द्वितीये पदे तृतीये भार्द्धयुतं चतुर्थे भांशशुद्धं क्षेत्रांशा भवन्ति। ते खाग्नि[3]तष्टाराश्यादिलग्नं भवति।

अत्रोपपत्तिरष्टमक्षेत्रेण। कखगघं आयनवृत्तं। कगं क्रान्तिवृत्तं। खघं नाडीवृत्तं[4]। हृचिह्नं गोलसन्धिः। मः[5] कदम्वः। वं ध्रुवस्थानं। मतधसं सत्रिभध्रुवक[6]कदम्ववृत्तं। तधं सत्रिभोदयक्रान्तिः। घसं सत्रिभोदयद्युज्या[7] चापांशाः[8]। अजसवं ध्रुववृत्तं। असं नवतिः। अधमपि नवत्यंशमितं। यदि धसज्यषां[9] अधज्या लभ्यते। तदा जहृज्या तुल्यया उदयज्यया किमिति लब्धं अहृज्या तच्चापं[10] क्षेत्रांशा भवन्तीत्युपपन्नं[11]। प्रथमप्रकारस्योपपत्तिस्तु उदयांशा नयनवैपरीत्येन ज्ञेया।


**अथ शकलं निदर्शनार्थम्। अथ स्वोदयांशेभ्यो[12] लग्नसाधनम्—**

**स्वोदयांशान् क्षेत्रभागा[13] कल्प्यलंकोदयास्ततः।**
**तत्कोटिभागक्रांत्यंशान् लम्बभागेषु शोधयेत् ॥१॥**

---

(घ) ६. घसज्यया for (घसज्यषां) (ङ) १३. भागान् for (भागा) (ङ)

(ङ) १. + गुणा +
२. पलस्य for (फलस्य)
३. वाग्नितष्टा for (खाग्नितष्टा)
४. नाडिवृत्तं for (नाडीवृत्तम्)
५. विसर्गलुप्त
६. 'क' लुप्त
७. द्यु जा for (द्यु ज्या)
८. चापंसा for (चापांशाः)
१०. तचापं for (तच्चापं)
११. भवतीतुपपन्यं for (भवंतीत्युपपन्नं)
१२. स्वोदयांशाभ्या for (स्वोदयांशेभ्यो)



यदि ते विषुवांशाः स्युः प्रथमेंत्ये पदेयवा ।
द्वितीये वा तृतीये च लम्बभागेषु योजयेत् ।।२।।
शेषं खभस्यो[1]न्नतांशास्त[2]ज्जीवा त्रिज्यका गुणा ।
दृग्गत्या[3]प्ता फलधनुः खभलग्नांतरं भवेत् ।।३।।
खभद्यू[4]नांतरं वा स्यादथ स्वविषयोदयाः ।
भार्द्धांशेभ्यो यदा न्यूनाः सौम्यगोले विलग्नकं ।।४।।
अधिकाः स्युस्त[5]दा ज्ञेयं याम्यगोले विलग्नकं ।
लग्नदृक्क्षेपयोरेकदिक्त्वे लब्धस्य यद्धनुः ।।५।।
खमध्यलग्ने योज्यं स्याद्भि[6]न्नदिक्त्वे तु तद्धनुः ।
भार्द्धांशशुद्धं दशमे योज्यं लग्नं[7] भवेदिह ।।६।।

अथैतेषां पद्यानां व्याख्या—स्वोदयांशान् क्षेत्रांशान् प्रकल्प्य तेभ्यो लंकोदयाः साध्याः । तत्कोट्य[8]ंशानां क्रात्यंशा लम्बांशेषु शोध्याः । यदि साधितलंकोदयाः प्रथमपदे तुर्यपदे वा स्युः[9] द्वितीये[10] तृतीये वा भवन्ति तदा क्रान्तिलंबांशेषु योज्या शेषं दशमस्योन्नतांशा भवन्ति । तेषां ज्यात्रिज्यागुणा दृग्गतिभक्ता फल चापं दशमलग्नयोरन्तरं[11] दशमसप्तमयोर्वांतरं भवति । स्वोदयांशाः भार्द्धांशेभ्यो यदि न्यूनास्तदा लग्नमुत्तरगोलेस्तीति यद्यधिकास्तदा दक्षिणगोलेस्तीति ज्ञेयं । लग्नदृक्क्षेपयो दिगैक्ये[12] सति लब्धचापं दशमलग्ने योज्यं, भिन्न[13]दिक्त्वे[14] भार्द्धांश[15]शुद्धं

(घ) ९. + यदि +                    ११. 'रन्तरं' प्रमादतः लुप्त

(ङ) १. नतांसा for (न्नतांशा)          २. तजीवा for (तज्जीवा)
३. दृगाप्ताप्तपलधनु for (दृग्गत्याप्ताफलधनुः)
४. द्यु नांतरं for (द्यू नांतरं)          ५. स्यादाज्ञेयं for (स्तदाज्ञेयं)
६. न for (न्न)          ७. लग्ने for (लग्नं)
८. कोटोसानां for (कोट्यंशानां)          १०. द्वितीयो for (द्वितीये)
१२. दिगैवो for (दिगैक्ये)          १३. भिन for (भिन्न)
१४. द्विक्त्वे for (दिक्त्वे)          १५. 'भार्द्धांश' लुप्त

चापं दशमे योज्यं लग्नं भवतीति[1]। अत्रोपपत्तिर्नवमक्षेत्रेण[2]। कखगघं क्षितिजं। खहझघं[3] नाडीवलयं। घझलं[4] क्रान्तिवृत्तं मः कदम्बः कहगं याम्योत्तरवृत्तं। झघं स्वोदयचापं। लं लग्नं। तं दशमं। कतं दशमोन्नतांशचापं। मनयद्यं कदम्बवृत्तं स्वोदयोपरिगतं। तनं नवतिमितं चापं[5]। स्वोदयांशान् क्षेत्रांशान् प्रकल्प्य उदयाः साधितास्ते झयचापं। घयचापं स्वोदयक्रान्तिः। भं वित्रिभदृग्वृत्तं तदेव कदम्बवृत्तं भवति। वसं वित्रिभोन्नतांशाः[6] सैव दृग्गतिः। हतं सत्रिभक्रान्तिः यदि वसज्यया दृग्गत्या[7] त्रिज्या तुल्या धवज्या लभ्यते। तदा कतज्यया किमिति लब्धचापं धत्तं दशमसप्तमान्तरं। विषुवांशाः यदा भार्द्धांशेभ्यो[8] न्यूनास्तदा लग्नं दक्षिणगोले ऽस्तीति अधिकास्तदोत्तरगोलेऽस्तीत्यत्र वासना प्रसिद्धा। दृक्क्षेपलग्नयोर्दिगैक्ये[9] दशमं वित्रिभात्पूर्वदिशि[10] भवत्यतः प्राप्तमन्तरं चापं दशमे योज्यं। भिन्नदिक्त्वे दशमं वित्रिभात्पश्चिमदिशि भवत्यतः प्राप्तचापं भार्द्धांशशुद्धं दशमे योज्यं लग्नं भवतीत्युपपन्नम्।

इति स्वोदयांशेभ्यो लग्नसाधनं शकलं[11] च।

**अथायनदृक्कर्मसंशरस्य[12] विषुवांशसाधनं चाह—**

**त्रिबघ्न्वांशोद्ध्रुवकोटिजीवा शरांशकोटिज्यकया विनिघ्नी।**

---

(घ) २. 'नवम क्षेत्रेण' लुप्त

(ङ) १. तितिति for (तीति)
३. झं for (झघं)
४. घजलं for (घझलं)
५. मिदं for (मितं)
६. नतांशा for (न्नतांशाः)
७. दगातिमा for (दृग्गत्या)
८. भार्द्धसोम्यो for (भार्द्धांशेभ्यो)
९. दिगैको for (दिगैक्ये)
१०. 'शि' लुप्त
११. सकलं for (शकलं)
१२. दृकमसंसरस्य for (दृक्कर्मसंशरस्य)

स्पष्टद्यु जीवा विहृताप्तचापमाद्ये पदे खांकलवेषु शुद्धं ॥१॥
पदे द्वितीये वियदंकयुक्तं खश्वाश्वि (खभांश) २७० शुद्धं तु पदे तृतीये।
खभांशयुक्तं च पदे तुरीये बिंबस्य लंकोदयभागकाः स्युः ॥२॥
लग्नं लंकोदयांशेभ्यः साध्यमायनदृग्ग्रहः।
स एव भवति स्पष्ट इति गोलाविदो विदुः।
भानांशरान्यापमदिक् समत्वे षष्ठचाप्तबाणांशभया विनिघ्नी।
छायापरक्रांतिभवांशकानां दोर्ज्याधिका चेत्प्रभवेत्तदानीं ॥३॥
स्यादाप्तचापं विपरीतसंज्ञं क्षेप्याः खनागेंदु १८० मिता इहांशाः।
सबाणनक्षत्रनभश्चराणां ते वै भवेयुर्विषुवद्विभागाः ॥४॥

अथ बिंबध्रुवांशोद्धृवेत्यादिश्लोकत्रयस्य व्याख्या—

स्पष्टग्रहध्रुवककोटिज्या शरकोटिज्या गुणा स्पष्टक्रान्तिकोटिज्या भक्ता फलचापं प्रथमपदे नवतिशुद्धं द्वितीये नवतियुतं तृतीये पादोनभांशहीनं चतुर्थे पादोनभांशयुतं बिंबग्रहस्य लंकोदयांशा भवन्ति। तेभ्यो लग्नं साध्यं, सः आयनदृग्ग्रहो भवति। अस्योपपत्तिर्दशमक्षेत्रेण—कखगघं आयनवृत्तं। खहघं नाडीवलयं। झं ग्रहबिम्बं। कहगवृत्तं पूर्वाऽपरसंपातकीलितं। बिम्बोपरिगतं इष्टवृत्तं

(घ) ४. + खाश्वाश्वि +
६. इहांशाः for (इहाशाः) (ङ)


(ङ) १. विहृताप्त for (विहृताप्त)
२. 'खश्वाश्वि' लुप्त
३. ये for (पदे तृतीये)
५. दृगाह for (दृग्ग्रहः)
६. गोलविदुविदो for (गोलविदो विदुः)
७. षष्टाप्त for (षष्ठचाप्त)
८. खनागें for (खनागेन्दु)
१०. ववेयु for (भवेयु)
११. + अथ बिंबध्रुवागेंदु १८० मिता इहांशा सबाणनक्षत्र नभश्चराणां ते वै भवेयुर्विषुवद्विभागाः +
१२. पादोभांसहिनं for (पादोनभांशहीनं)
१३. दग्राहो for (दृग्ग्रहो)
१४. 'घं' लुप्त

भसद्दशवृत्तं[1] भवति । लभतं[2] ध्रुववृत्तं । लझचापं[3] स्पष्ट द्युज्याचापं । झतं स्पष्ट क्रान्ति-चापं । झगं[4] आयनवृत्तत्रिबयोरन्तरं । यदि झलचापज्यया झगचापज्या लभ्यते तदा त्रिज्या तुल्यया लतज्यया किमिति लब्धस्य चापं तघं । इदं नाडीवृत्ते आयनवृत्त-ध्रुववृत्तयोरन्तरं स्वोदयकोटिरूपं जातं, अतो नवतिशुद्धं प्रथमपदे उदयांशा भवन्ति । द्वितीये नवतियुतं संपातादुदयांशा भवन्ति । तृतीयपादोनभांशशुद्धं[5] संपातादुदयांशा भवन्ति । चतुर्थे पादोनभांशयुतं संपातादुदयांशा भवन्ति । एवं ये साधिता बिंबोदयांशाः ते आयनदृक्कर्मसंस्कृतस्यापि भवन्ति । यतस्तूभयो-[6]ध्रुवसूत्रमेकमेवेत्यतस्तेभ्यः साधितं लग्नमायनदृक्कर्म[7] संस्कृतध्रुवको भवतीत्युप-पन्नम्[8] । शकलं चास्य ।

अथ सशरस्य विषुवांशसाधने भानामिति श्लोकद्वयेन विशेषमाह—ध्रुव-क्रान्त्यक्रान्तिशरयोर्दिक्साम्ये परक्रान्ति विलोमछाया[9] शरविलोमछायाघातः षष्ठि-भक्तः लब्धं यदा ध्रुवकज्यातोऽधिकं तदा लब्धचापं प्रथमपदे नवतौ योज्यं द्वितीय-पदे नवतौ शोध्यं तृतीयपदे[10] खभे योज्यं चतुर्थपदे खभे शोध्यं सर्वत्र भार्द्धांशाः क्षेप्याः विषुवांशा भवन्ति । अत्रोपपत्तिः—एकादश क्षेत्रेण । कखगघमायनवृत्तं[11] । कमगं क्रांतिवृत्तं । खलसघं नाडीवृत्तं । कं कदम्बस्थानं[12] । घं ध्रुवस्थानं[13] । तं ग्रह[14]

---

(घ) इस पृष्ठ पर निम्नांकित क्षेत्र अंकित है—



(ङ) १. + स +

२. लत for (लभतं)

३. 'भ' लुप्त

४. दृग्गं for (झगं)

५. पादोनसांसमुद्धं for (पादोनभांशशुद्धं)

६. यतस्तूपयो for (यतस्तूभयो)

७. दृकर्म for (दृक्कर्म)

८. त्युपपन्नं for (त्युपपन्नम्)

९. 'विलोमछायांशर' लुप्त

१०. तृतीये for (तृतीय)

११. सायनक्षतां for (मायनवृत्तं)

१२. कदंबवस्थानं for (कंकदंबस्थानं)

१३. 'घं ध्रुवस्थानं' लुप्त

१४. ग्रहण for (ग्रह)

बिंबस्थानं। बतमझं[1] कदम्बवृत्तं। धतलनं ध्रुववृत्तं। हं गोलसंधिस्थानं। मं क्रांतिवृत्तभोगस्थानं। मतंशरः तवधत्रिभुजं तमबत्रिभुजं परस्परं सजातीयं तत्रानुपातः। यदि तव तुल्यया शरकोटिज्यया कोटिरूपया बधवतुल्या परक्रान्तिविलोमच्छाया लभ्यते। तदा तमतुल्यया[2] शरज्यया किमिति लब्धं भवतुल्यं क्रान्तिवृत्त[3] खण्डं छाया[4]। अत्र परक्रान्तिछायायां एकं त्रिज्यातुल्यं[5] $\frac{\text{श० ज्या}}{\text{श० को०}}$ पं० क्रां० छा०[6] गुणक खण्डमधिकं निवेशितमस्ति।

अत्र शरज्या यावत्त्रिज्यया गुण्यते शरकोटिज्यया भाज्यते। तदा तावच्छाया[7] भवति। तेन पराक्रान्तिछाया शरछायया गुण्या पूर्वगुणके त्रिज्या निविष्टा स्थिता[8] तेनात्र त्रिज्याहरः कृतः, तेनोपपन्नं[9] सूत्रं। शकलं च।

श० ज्या० त्रि० १
श० क्रां० छा० १
श० को० १

इति सशरस्य[10] विषुवांशसाधनं[11][12] सोपत्तिकं[13]।

---

(घ) १. बतमसं for (बतमझं)

६. $\left\{\begin{matrix}\text{रा० ज्या०}\\ \text{प० क्रां० छा}\\ \text{श० को०}\end{matrix}\right\}$ for $\left\{\begin{matrix}\text{श० ज्या०}\\ \text{श० को०}\\ \text{पं० कां० छा०}\end{matrix}\right\}$

७. + छर +

१३. सोपपत्तिकं for (सोपत्तिकं)

(ङ) २. तमतुलया for (तमतुल्यया)

३. + छाया +

४. 'छाया' लुप्त

५ त्रिसज्याज्या for (त्रिज्या)

७. + छापक्रा +

८. स्ति for (स्थिता)

६. पन्नं for (पन्नं)

१०. इति सशारस्य for (इति सशरस्य)

११. यहां पर अंकित 'तालिका' पिछले पृष्ठ के आरंभ में अंकित है।

१२. घनं for (साधनं)

**अथ स्पष्टक्रांति[1] ध्रुवक[2]ज्ञाने आयनदृक्कर्मो[3]च्येते—**


**ग्रहर्क्षं ध्रुवकं तावत् कृत्वा राशित्रयान्वितं ।**
**बिंब स्पष्टक्रांतिसमपलभागांकपत्रतः ॥१॥**

उदयांशान्[4] साधयित्वा नवतिं तेषु शोधयेत् । तेभ्यो निरक्षे यल्लग्नं सः स्यादायनदृग्ग्रहः[5] ।[6] इदं[7] स्पष्टायमे सौम्ये ज्ञेयं दृग्ग्रहसाधनं । याम्ये[8] पमेथ ध्रुवकं कृत्वा राशित्रयो नितं । बिंवस्पष्टक्रान्तिसमपलभागांक[9]पत्रकः । उदयांशान् साधयित्वा नवतिं तेषु योजयेत् । तेभ्यो निरक्षे यल्लग्नं सः स्यादायनदृग्ग्रहः । अस्योपपत्ति[10]स्तु यन्त्राध्याये ऊक्तैवास्ति ।

**अथ शरध्रुवकयोर्ज्ञाने आयनदृग्ग्रहः—**

**स्पष्ट[11]ग्रहर्क्षध्रुवके नवत्यंशान् विशोधयेत् ।**
**शेषांशानुदयां[15]शाश्च शरांशानक्षभागकान्[12] ॥१॥**
**प्रकल्प्य[13] शरतुल्याक्षभागकोष्ठस्थितो[14]दयैः ।**

(ब) ६. + ॥२॥ +
७. 'इदं—अस्यो' लुप्त
१०. 'पपत्तिस्तु—आयनदृग्ग्रहः' लुप्त
११. + पुनः प्रकारांतरेणायनदृक्कर्म +
१२. + ॥१॥ +
१३. प्रकल्प्याक्षांशकोष्ठस्थोदयभागेभ्य एव हि for (प्रकल्प्य शरतुल्याक्ष भागकोष्ठस्थितोदयैः)




(ड) १. 'न्ति' लुप्त
२. ध्रुवक for (ध्रुवक)
३. दृकर्मोच्यते for (दृक्कर्मोच्येते)
४. उदयांसोन for (उदयांशान्)
५. दृग्राह for (दृग्ग्रहः)
८. यामे for (याम्ये)
९. भाखगांकपत्रतः for (भागांकपत्रतः)
१३. प्रकल्य for (प्रकल्प्य)
१४. स्थितो for (स्थितो)

लग्नमा[१]निय तस्मिन्हि प्रक्षिपेत्खनवांशकान्[२] ।।२।।
भवेदा[३]यनदृक्कर्म संस्कृतोदयभागकः ।
त[४]स्माल्लंकोदयैर्लग्नं साध्यमायनदृग्ग्रहः ।।३।।
इदं सौम्यशरे ज्ञेयं याम्ये खेटर्क्षजं ध्रुवं।।
नवत्यंशयुतं कृत्वा शेषांशानुदयांशकान् ।।४।।
शरांशानक्षभागांश्च कल्पयित्वा विचक्षणः ।
शरतुल्याक्षांशपत्रकोष्ठस्थोदयभागकैः ।।५।।
संसाध्य लग्नं त[५]स्मि[६]श्च खनवांशान्विशोधयेत् ।
भवेदायनदृक्कर्म संस्कृतोदयभागकः[७] ।।६।।
तस्मान्निरक्षजं लग्नं सः स्यादा[८]यदृग्ग्रहः ।

अत्रोपपत्तिः—क्रान्तिवृत्तं नाडीवृत्तं[९] शरः स्पष्टक्रान्तिः । वित्रिभकदम्बवृत्तं याम्योत्तरवृत्तं । याम्योत्तरवृत्तं वित्रिभकदम्बवृत्तं कल्पनीयं। ग्रहध्रुवकः दशमोदयः कल्पितः[१०] । सौम्ये शरे नवतिस्तत्रातः शोधि[११]तायतः क्रान्तिवृत्तस्य नाडीवृत्तकल्पनायां याम्याक्षांशानां सौम्या[१२]क्षांशत्वं भवति । याम्याक्षांशानां ये मेषादिषड्रा[१३]श्यु-

(ब) ३. मसीमृष्ट है— पढ़ा नहीं जाता ।
इस प्रति में मसीमृष्ट होने के कारण पढ़ा नहीं जाता ।

(ङ) १ मानिय for (मानीय)
२. +नवत्यंशयुक्तं कृत्वा शेषांसानुदयांशकान् । सरासानक्षभागाश्च कल्पयित्वा विचक्षणः । शरतुल्यांसा स यत्र कोष्ठस्थोदयभागकैः संसाध्यः लग्नं तस्मिश्च । खभवासान्विसोधयेत् +
४—५. 'तस्मा—लग्नं त' लुप्त
६-७. 'स्मिश्च—भागकः' लुप्त
८. स्यादायनदृग्राहः for (स्यादायदृग्ग्रहः)
९. नाडिवृत्तं for (नाडीवृत्तं)
१०. कल्पिः for (कल्पितः)
११. सोधिवतायतः for (शोधितायतः)
१२. सौमाक्षासत्वं for (सौम्याक्षांशत्वं)
१३. सड्रास्युदया for (षड्रास्युदया)

दयास्ते[1] सौम्याक्षांशानां तुलादिषड्राश्युदया भवन्ति । इत्युपपन्नं[2] यथोक्तं ।

इत्यायनदृक्कर्म[3] ।[4]

स्पष्टायमाच्चरलवानुदये विधाय तान् भस्य वैषुवलवेष्वयमांशगोलात्[5] ।
कुर्याद्दृणं धनमतो[6] विपरीतमस्ते[7] स्यात्स्वोदयांशक इहास्तमयांशकश्च ॥१॥
स्वीयोदयांशान् स्वपलांशपत्रे[8] धनुर्भवेत्स्वोदयलग्नकं तत् ।
स्वास्तांशतो[9] भार्द्धलवैरुपेतात्स्वास्ताख्यलग्नं[10] खलु भोदयास्ते ॥२॥

अथ श्लोक द्वयस्यार्थः—

स्पष्टक्रान्तेश्चरमानीय[11] आयनदृक्कर्मसंस्कृतोदये स्पष्टक्रान्तिः सौम्ययाम्यगोलयोः क्रमेण[12] ऋणं धनं च कार्यं । स आयनदृक्कर्म संस्कृतस्योदयो भवति । तस्माल्लग्नं[13] साध्यं तदुदयलग्नं भवति । अस्ते चरं विपरीतं दत्वा भार्द्धांशाश्च-दत्वा लग्नं[14] साध्यं तदस्तलग्नं भवति ।

अत्रोपपत्तिः—उत्तरगोले क्रान्तौ सत्यां यस्य ग्रहस्य नक्षत्रस्य वा तद्बिंबोपरिगतं क्षितिजवृत्तं नाडीवृत्ते यत्र लगति तच्चिन्हं[15] आयनदृक्कर्म संस्कृतोदय चि-

---

(घ) ३. स्पष्ट नहीं है । ४. + अथाक्षदृक्कर्म +

(ङ) १. + सौम्याक्षासत्वं भवति, याम्याक्षासानां ये मेषादि षड्रास्युदयास्ते +
२. इत्युपपनं for (इत्युपपन्नं)
३. इत्यायनदृकर्म for (इत्यायनदृक्कर्म)
५. वेषुयमासगोलात् for (वेष्वयमांशगोलात्)
६. घणमतो for (धनमतो) ७. मस्तत् for (मस्ते स्यात्)
८. स्वपलासपत्रे for (स्वपलांशपत्रे) ९. खास्तांसतो for (स्वास्तांशतो)
१०. स्वात्खाख्य for (स्वास्ताख्य) ११. क्रान्ति for (क्रान्ते)
१२. 'क्रमेण' लुप्त १३. तस्मालग्नं for (तस्माल्लग्नं)
१४. ग्नं for (लग्नं) १५. नवतिचिह्न for (तच्चिन्हं)

ह्नात्स्पष्टक्रान्त्युत्पन्न चरांशैरुदये पश्चिमत एव भवति। *दक्षिणक्रान्तौ पूर्वत एव भवति। अस्ते एतद्विपरीतं भवतीत्युपपन्नं[१]।

इत्याक्षदृक्कर्म

अथ दृश्यादृश्यत्वमुच्यते[२]—

ग्रहोदयांशानुदयांशकेभ्यो लग्नस्य संशोध्य यदत्र शेषं।
स्वाहर्द्दलांशा[३]नधिकं यदा स्यात्तदा ग्रहः स्वक्षितिजोपरिस्थः॥१॥
पूर्वे[४] कपालेऽस्त्यथ चेद्दिनार्द्धांशाः[५] शेषतुल्याः खचरस्तु वृत्ते।
याम्योत्तराख्ये स्वदिनार्द्ध[६]भागाधिकं[७] दिनांशानधिकं यदा स्यात्॥२॥
शेषं तदा स्वक्षितिजोपरिष्टात्पश्चात्कपालेस्ति खगोथशेषं।
स्वाहर्मितेरंशसमं तदास्तमूजेखगोस्तीति[८] विनिश्चयोयं॥३॥

अथार्थः[९]—

ग्रहोदयांशा लग्नोदयांशेभ्यः शोध्याः। शेषं दिनार्द्धांशेभ्यो यदि न्यूनं तदा ग्रहः क्षितिजादुपरि पूर्वकपालेस्तीति ज्ञेयं, दिनार्द्धांशसमानाः शेषांशास्तदा खमध्येस्तीति। यदि दिनार्द्धांशोधिका[१०]दिनमानांशेभ्यो न्यूनास्तदा क्षितिजादुपरि पश्चिमकपोलस्तीति वेदितव्यं। दिनांशसमानाश्चेदस्तक्षितिजेस्तीत्ययं निश्चयोस्ति।

(घ) १०. दिनार्द्धांशाधिका for (दिनार्द्धांशोधिका) (ङ)

* नोट—यह वाक्य यहां बाईं ओर मार्जिन में अंकित है।

(ङ) १. भवतीपपन्नं for (भवतीत्यूपन्नं) २. दृश्यात्वमुच्यते for (दृश्यादृश्यत्वमुच्यते)
३. स्वाहदलांशा for (स्वाहर्द्दलांशा)
४. पूर्वो for (पूर्वे)
५. स्यथचादिनार्द्धांसाः for (ऽस्त्यथचेद्दिनार्द्धांशाः)
६. स्वरिनार्द्ध for (स्वदिनार्द्ध) ७. + दिनांसानधिकं +
८. खगोस्तिति for (खगोस्तीति) ९. अस्यार्थः for (अथार्थः)

अथोन्नतांशेभ्यो[1] दिगंशज्ञानं—

दृगुन्नतज्याक्षभया[2] विनिघ्नी सूर्योद्धृता[3] शंकुतलं सदैव ।
याम्यं भवेद्वोन्नतभागजीवा लम्बज्यकाप्ता[4]क्षगुणेन निघ्नी ॥१॥
तदग्रया संस्कृतमत्रदोः स्यादसौ त्रिभज्या गुणितो हृतश्च ।
दृग्जीवयाप्तस्य धनुर्दिगंशा भुजांशदिक्काः[5] सुधियावगम्याः ॥२॥
यद्वा द्विधा स्थापितलंबभागा युतोनि[6]ताश्चोन्नतभागकैस्ते ।
तज्जीवयो[7]र्योगवियोगखण्डमाद्यान्यसंज्ञं[8] क्रमशो विचिन्त्यं[9] ॥३॥
याम्यान[10]भोगापमभागकाश्चेत्तज्यान्यसंज्ञेन[11] युता विधेया ।
यद्युत्तरः स्यादपमो ग्रहस्य क्रांतिज्यकान्यांतरमत्र कार्यं ॥४॥
योगो वियोगस्त्रिभसिंजिनीघ्न[12]श्चाद्योद्धृतो लब्धधनुर्दिगंशाः ।

अथ प्रकारांतरम्—

द्यु[13]रात्रवृत्ते नतकालमौर्वी स्पष्टद्यु जीवा गुणिता विभक्ता ।
नतांशमौर्व्याप्तफलस्य[14] चापं खांकांशशुद्धं च दिगंशकाः स्युः ।

अथार्थः—

उन्नतांश[15]ज्यापलभागुणा द्वादशभक्ता शंकुतलं सदैव दक्षिणं भवति । अथवा

---

(ङ) १. अथौनतांशेम्यो for (अथोन्नतांशेभ्यो)
२. वया for (भया) ३. सूर्यादवृत्ता for (सूर्योद्धृता)
४. ज्यकाशा for (ज्यकाप्ता)
५. भुजांसधिका for (भुजांशदिक्काः)
६. + ता + ७. तजीवयो for (तज्जीवयो)
८. माद्यामक्रसंज्ञं for (माद्यान्य संज्ञं)
९. विचित्त for (विचिन्त्यं) १०. यामान्य for (याम्यान)
११. त्तजान्यसंज्ञेन for (तज्यान्यसंज्ञेन)
१२. शिजिनिघ्न for (सिंजिनीघ्न) १३. द्युज्या for (द्यु)
१४. पलस्य for (फलस्य) १५. उनतांस for (उन्नतांश)

उन्नतांशज्या अक्षांशज्या गुणालम्बांशज्या भक्ता लब्धं शंकुतलं सदा दक्षिणमेव। इदमग्रया संस्कृतं भुजो भवति। अयं त्रिज्यागुणो दृग्ज्याभक्तो दिगंशज्याऽस्याश्चापं दिगंशाः भुजदिक्काः ज्ञेयाः।

अथ प्रकारान्तरं। उन्नतांशा लम्बांशैरूनयुताः कार्याः। उभयोर्जीवे कार्ये ज्ययोर्योगार्द्धं प्रथमसंज्ञं। ज्ययोरन्तरार्द्धं द्वितीयसंज्ञं भवति। यदि ग्रहस्पष्टक्रांतिर्दक्षिणा तदा क्रान्तिज्या द्वितीयेन युता। यद्युत्तरा क्रान्तिस्तदा क्रान्तिज्या द्वितीयान्तरं कार्यं शेषं त्रिज्यागुणं प्रथमसंज्ञेन भक्तं लब्धादिगंशज्या तच्चापं दिगंशाः। पुनः प्रकारान्तरं—वक्ष्यमाण प्रकारेणोन्नतांशेभ्यो नतकालमानी यतज्जीवा साध्या, सा स्पष्टक्रान्तिकोटिज्या गुणिता नतांशज्या भक्ता लब्धं दिगंशकोटिज्या ऽस्याश्चापं नवतिशुद्धं दिगंशाः। यद्वा द्विधा स्थापितलम्बभागा इत्यस्योपपत्तिः— कखगघ याम्योत्तरवृत्तं। झघमुन्नतांशचापं। अघ लंबांशचापं। कझ अन्तरं। झतमन्तरज्या। बपं उन्नतांशचापं खघंलम्बांशचापं। वगं योगः। वपं योगजीवा-लततुल्या झतलतयोर्योगार्द्धं। क्षत संज्ञा जीवा प्रथमं। झतलतयोरन्तरार्द्धं स्पष्टक्रान्तिज्या स च संज्ञा दक्षिणा। उत्तराक्रान्तिर्यशं। अन्तरार्द्धंजशं। सथं क्रान्ति-

---

(घ) १३. बसं for (वपं)        १४. खगं for (खघं)

(ङ) १. दृगज्या for (दृग्ज्या)        २. साश्चापं for (ऽस्याश्चापं)
३. लम्बांशेषु for (लम्बांशेषू)        ४. युक्ता for (युताः)
५. जयो for (ज्ययोः)        ६. स्थानं for (स्पष्ट)
७. तचापं for (तच्चापं)        ८. तजिवा for (तज्जीवा)
९. साश्चापं for (ऽस्याश्चापं)        १०. यामोत्तर for (याम्योत्तर)
११. घमुन्नतांस for (झघमुन्नतांश)        १२. गमतरज्या for (झतमन्तरज्या)
१५. चगं for (वगं)        १६. अतलतयो for (झतलतयो)
१७. राशं for (यंशं)

ज्या[१] द्वितीययोर्योग:। क्रान्तिज्या द्वितीययोरन्तरजपं[२]। झनमत्रिभुजं सथम त्रिभुजयो:[३] साजात्यं[४]। यदि नझमितं[५]।

अथ देनजूमकर्ण:[६] प्राप्यते[७]। तदा सथे न किमिति लब्धसमकर्ण:[८]। झनमत्रिभुजं जपमत्रिभुजं च मिथ: सजातीयं। यदि झनेन झमं लभ्यते। तदा जवेन[९] किमिति लब्धं मयं। पुनरनुपात:। दृग्ज्याप्रमाणेनेदं तदा त्रिज्या प्रमाणेन किमिति लब्धं, दिगंशज्या अस्याश्चापं[१०] दिगंशा भवन्तीत्युपपन्नं। क्षेत्रं च। द्युरात्रवृत्ते[११] इत्यस्योपपत्ति:। त्रयोदशक्षेत्रेण[१२]। कगजझं क्षितिजवृत्तं। झसगं नाडीवलयं। यतश्रं ध्रुववृत्तं। हृतवं दृग्वलयं। कहृजं याम्योत्तरवृत्तं। गतघझं भसदृशवृत्तं। तहं न-

(ख) ६. नभ्रमकर्ण: for (देनजूमकर्ण:)
९. जयेन for (जवेन) (क)      ११. 'द्युरात्र—पत्ति:' लुप्त
१२. 'त्रयोदश—सजाती' समस्त लुप्त

(ङ) १. क्रान्तिययोर्योग: for (क्रान्तिज्या द्वितीययोर्योग:)
२. द्वितीययोरन्तपजयं for (द्वितीययोरन्तरजपं)
३. भुजुयो: for (भुजयो:)      ४. सजात्यं for (साजात्यं)
५. नभ्रमिथ for (नभ्रमित)      ६. येनजमकर्ण: for (देनजूमकर्ण:)
७. सा तेदतां तथेन for (प्राप्यते तदासथेन)
८. 'भ्र' लुप्त      १०. 'स्याश्चापं—पपत्ति:' लुप्त
१२. 'त्रमोदश—सजाती' समस्त लुप्त

तांशाः । अतं स्पष्टक्रान्तिः । तयं स्पष्ट क्रान्तिकोटिः । स अंनतकालः । यसअत्रि-भुजं यद्यतत्रिभुजं सजातीयं[1] । यदि त्रिज्यामितेन अयेन असंनतकालज्या लभ्यते । तदा द्युज्यामिते नयतेन किमिति लब्धं घतज्या । पुनः हतद्यत्रिभुजं हवकत्रिभुजं च मिथः सजातीयं । यदि हतेन नतांशज्यया द्यतज्या लभ्यते । तदा हवेन किमिति लब्धं बकजीवा वावज जीवा, अ[2]स्याश्चापं दिगंशकोटिः । इदं नवतिशुद्धं दिगंशा भवन्तीत्युपपन्नं[3] ।

अथ दिनमानार्द्धसाधनमुच्यते । तद्यथा —

खांका ६० श्चरांशैः सहिता वियु[4]क्ता दिनार्द्धमानं खलु गोलयोः स्यात् ।
त[5]दूनखाष्टेंदुमिता निशार्द्धं तत्तर्कभक्तं घटिकादिकं स्यात् ॥१॥

अथ भावसाधनम्—

विलग्नजातं रजनी प्रमाणमेकं द्विवेदेषु हतं तु योज्यं ।
लग्नांशकानां विषुवांशके[र] साध्यास्ततः क्षेत्रलवाः पुरावत् ॥२॥
ते स्युर्द्विरामेषु रसास्तु भावास्तत्सप्तमाः षट्कयुता विचित्याः ।
षड्राशियुक्तं दशमं तुरीयं लग्नं स[6]षड्भं खलु सप्तमं स्यात् ॥३॥
दि[7]नप्रमाणं रजनीप्रमाणं निरक्षदेशेषु समं सदैव ।
लंबांशका यत्र परापमांशास्तत्रापवृत्तं कुजसंनिभं स्यात् ॥४॥
अयोकु[8]ष्ठष्ठोर्ध्वग चिह्नगानां दिनप्रमाणं कथयामि सूक्ष्मं ।
त्रिज्यार्ककर्णेन हता फ[9]लस्य चापं भवेद्भू पिहितं लवाद्यं ॥५॥

---

(घ) १. 'यं । यदि—जीवा अ' समस्त लुप्त
२-३. 'स्याश्चापं—त्युपपन्नं' लुप्त    ६. सड्भं for (षड्भं)

(ङ) १. 'यं यदि—जीवा अ' समस्त लुप्त
२. 'स्याश्चापं—खांका' लुप्त    ४. वियुता for (वियुक्ता)
५. जतननखाष्टेंदुमितानि for (तदूनखाष्टेंदुमितानि)
६. खड्भं for (सषड्भं)    ७. दीन for (दिन)
८. 'ष्ठ' लुप्त    ९. पलस्य for (फलस्य)

गर्भीयमूजादधरास्थितांशा दृग्वृत्तगा भूपिहितेन युक्ताः ।
तत्कोटिजीवा विहृता त्रिभज्या रूपेण हीना च भवद्दृगौच्यं[१] ॥६॥
यदा रविर्गर्भकुजस्थितः स्यात्कुछन्नकोद्यंशक[२] जीवयाप्ता ।
त्रिज्याफलं मूरहितं दृगौच्यं[३] स्याद्योजनाद्यं क्षिति खण्डनिघ्नं ॥७॥[४]
ध्रुवादधः संस्थित देशगानां मेरुस्थितानां[५] क्षितिपृष्ठतस्तु[६] ।
अश्वेंदुभिर्बाणपयोधिभिश्च तथा[७] च षड्गोमितयोजनैश्च ॥८॥
मीनादिकुंभादि मृगादिसंस्थो दृग्गोचरः[८] स्यात्सविताक्रमेण ।
दृगौच्यमाने बिदिते प्रसाध्यं दृश्यांशकज्ञानमतो[९] विलोमात् ॥९॥

अथ मध्यनतांशेभ्यो रविज्ञानं—

क्रांत्यक्षसंस्कारवशान्नतांशा[१०] तदूनखांकाश्च तथोन्नतांशाः ।
पलांशनम्रांशकयोर्विलोमसंस्कारतः क्रांति लवा भवेयुः ॥१०॥
तज्या त्रिभज्या गुणिता विभक्ता परापमांशज्यकया फलस्य[११] ।
चापं रविः स्याद्यदि[१२] नम्रभागा अक्षांशकाल्पाः[१३] क्षयगामिनश्चेत् ॥२॥
वर्धिष्णवश्चेद्रसराशिशुद्धाः पलांशकेभ्योऽनधिका नतांशाः ।
वृद्धिगता षड्भयुतं रविः स्यात् क्षयिष्णवश्चक्रविशोधितं वै ॥३॥
सौम्या नतांशा[१४] यदि वृद्धिगाः स्युराद्यं पदं स्यात्क्षयगामिनश्चेत् ।

---

(ङ) १. दृगोचं for (दृगौच्यं) २. कोटांसक for (कोद्यंशक)
३. दृगोच्यं for (दृगौच्यं) ४. '॥७॥' लुप्त
५. मेरुक्षितितानां for (मेरुस्थितानां)
६. स्थिति for (क्षिति) ७. तखा for (तथा)
८. दृगोचरः for (दृग्गोचरः) ९. 'श' लुप्त
१०. वसानतासातदूण for (वशान्नतांशा तदून)
११. पलस्य for (फलस्य) १२. साद्यदि for (स्याद्यदि)
१३. अस्यांश for (अक्षांश)
१४. सौम्यान्यतांसायनदि for (सौम्यानतांशा यदि)

पदं द्वितीयं सवितुर्विचिन्त्यं यत्राक्षभागापमभागकाल्पाः ॥४॥
एवं विभायावशतोपि शंकोः पदं खौ मध्यगते विचिन्त्यं ।
किन्तु प्रभायावशतो नतांशज्ञानं भवेत्सांतरकं हि किंचित् ॥५॥

अथ दृक्क्षेपानयनम्—

खमध्यलग्नोन्नतभागजीवा खलग्नलग्नांतरजीवयाप्ता ।
त्रिज्या गुणा दृग्गतिसंज्ञिता स्यात् त्रिभोनलग्नस्य नरश्च सोत्र ॥१॥
यद्वा रवेरुन्नतभागजीवा विलग्नसूर्यांतर जीवयाप्ता ।
त्रिज्या गुणा वित्रिभजो नरः स्यात् दृक्क्षेपकस्तद्धनुषस्तुकोटिः ॥२॥
खलग्नजाता विषुवांशका ये त्रिभोनलग्नस्य च ये भवन्ति ।
तदन्तरांशज्यकया विनिघ्नी त्रिभोनलग्नापमकोटिजीवा ॥३॥
विलग्नकाग्र्यज्यकया विभक्तं दृक्क्षेपको वाप्तधनुर्लवाद्यं ।
पलांशजीवा विहृता त्रिभज्या लग्न द्युजीवा विहृताप्तचापं ॥४॥
त्रिभोनजान्यापमसंस्कृतं वा दृक्क्षेपकः स्यादविशेष दिक्कः ।
लग्नोदयांशापमकोटिजीवा गुण्या वियल्लग्ननतांशमौर्व्या ॥५॥

---

(घ) १०. विलग्नकाग्रज्यकया for (विलग्नकाग्र्यज्यकया)
११. विभक्ता for (विभक्तं) (ङ)

(ङ) १. सविवितु for (सवितुर्)  २. 'न्त्यं यत्राक्ष—भवेत्सां' लुप्त
३. 'न्त्यं यत्राक्ष—भवेत्सां' लुप्त  ४. लग्नोनत for (लग्नोन्नत)
५. दृगाति for (दृग्गति)  ६. 'त्' लुप्त
७. + त्यं यत्राक्षभागापमभागकाल्पा ॥४॥ एवं विभावायावशतोपि सकोपदं रवौ मध्यगते विचिन्त्यं किन्तु प्रभायावशतो नतांशज्ञानं भवेत्सा ॥६॥ +
८. पर्यांतर for (सूर्यांतर)  ९. विपुवांशाका for (विषुवांशका)
१०. विलग्नकाग्रजकया for (विलग्नकाग्र्यज्यकया)
१२. नज्या for (नजा)  १३. दिक् for (दिक्कः)
१४. 'न' लुप्त


त्रिज्यौ द्धृताप्तस्य धनुर्लवाद्यं दृक्क्षेपको वा नतभागदिक्कः ।


अथ[1] खेमध्यलग्नोन्नत भागदिक्[2] इत्यंतस्यार्थः । दशमोन्नतांश[3]जीवा[4] त्रिज्या गुणा दशमलग्नांतरजीवया भक्ता लब्धा दृग्गति[5]जीवा अस्याश्चापं दृग्गतिः । इदं नवतिशुद्धं दृक्क्षेपः । वा दशमनतांशजीवा[6] लग्नविषुवांशद्युज्या गुणा त्रिज्या भक्ता लब्धं दृक् क्षेपजीवा । अस्याश्चापं दृक्क्षेपः । दृक्क्षेप । दिक् दशमनतांश-दिक्का ज्ञेया । वा अक्षांशज्या त्रिज्या गुणा लग्नद्युजीवा भक्ता फलचापं दृक्क्षेपवृत्ते खमध्यनाडी व[7]लयोरंतरं । इदं दक्षिणं । वित्रिभान्यक्रांत्या संस्कृतं दृक्क्षेपो भवति ।

अत्रोपपत्तिश्चतुर्दश क्षेत्रेण । क[8]गझदं क्षितिजं । हृंखमध्यः । कतअझं क्रांति-वृत्तं । सहवं दृक्क्षेपवृत्तं । द[9]हृगं याम्यो[10]त्तरवृत्तं । लमनं नाडीवलयं । तं दशमं द[11]तं दशमोन्नतांशाः । हृतं नतांशाः । कं स[12]प्तमं । झं ल[13]ग्नं । स अंदृग्गतिः । अहं दृक्क्षेपः ।

(घ) २. + जीवेत्यारभ्य दृक्क्षेपको वानत भाग +
७. वलययोरन्तर for (वलयोरन्तरं)
८. नोट—अतिरिक्त— + इदं उपपपत्ति शकलं मकारद्वयस्य +

(ङ) १. इति for (अथ)
३. दसमौनतांस for (दशमोन्नतांश)
४. जीवी for (जीवा)
५. दृगाति for (दृग्गति)
६. 'जीवा' लुप्त
९. हृहगं for (दहगं)
१०. यामोत्तरवृत्तं for (याम्योत्तरवृत्तं)
११. धमतं for (दतं)
१२. कसंभमं for (कं सप्तमं)
१३. झंललग्नं for (झंलग्नं)





मं[1] गोलसन्धिः। कतं दशमसप्तमयोरन्तरं। यदि कतेन दत्तं। तदा अकेन[2] असं। मनं लग्नोदयः। नयं उदयक्रान्तिः। व्यथं[3] क्रान्तिकोटिः। तथं नवतिः। यदि तथेन थयं लभ्यते। तदा[4] तहेन ह अमिति। पलांशजीवेत्यस्य। पंचदश क्षेत्रेणोपपत्तिः। कगझदं[5] क्षितिजं। हः खमध्यं। गसदं नाडीवलयं। वतक्रान्तिवृत्तं। कहझं याम्योत्तरवृत्तं। लहनं दृक्क्षेपवृत्तं। अं लग्नं अपं लग्नक्रान्तिः। यथं क्रान्तिकोटिः। सहं अक्षांशाः। हतं दृक्क्षेपः।[7] अथ[8] नवतिः। यदि यथेन[9] थसं लभ्यते। तदा सहे नमहं लभ्यते। तममन्यक्रान्तिर्वित्रिभस्य। अनया हयं संस्कृतं तहं दृक्क्षेपो भवति। शेष प्रकाराणामुपपत्तिस्तु गमाऽस्ति[10] सुबुद्धीनां[11] किं विस्तरेणेति।

अथ परमोन्नतांशपरमाधरांशलक्षणम्—

**वृत्ते याम्योत्तरे भूजाद्ग्रहर्क्षाऽवधियेंशकाः।**
**उन्नतांशास्त[12] एव स्युः परमादृश्यगोलजाः[13] ॥१॥**
**क्षितिजाधोथ खेटस्य बिंबपर्यंतमंशकाः।**
**परमाधरसंज्ञास्ते गोले ज्ञेयमिति स्फुटम् ॥२॥**
**यस्य नित्योदयास्तौस्तस्तस्य भस्य ग्रहस्य वा[14]।**
**उन्नतांशाधरांशाश्च परमाः संभवन्ति हि ॥३॥**

---

(घ) ३. यथं for (व्यथं)    ६. वतअं for (वत)
८. सथं for (अथं)    ९. यसेन for (यथेन)
१०. सुगमा for (गमा) (ङ)

(ङ) १. भंगोल for (मंगोल)    २. अनेक for (अकेन)
३. 'व्यथं क्रांति' लुप्त    ४. + हव् +
५. 'भ' लुप्त    ७. + अयं दृक्क्षेपः +
११. सुबुद्धिनां for (सुबुद्धीनां)    १२. उनतांस्त एव for (उन्नतांशास्त एव)
१३. ज्या for (जाः)    १४. या for (वा)

सदोवितस्य भस्याथ परमाश्चोन्नतांशकाः ।
वारद्वयं भवन्तीह गोलेस्त्येवं[1] परिस्फुटं ॥४॥
ऊर्ध्वाधराख्य[2]भावेन वृत्ते याम्योत्तरे यतः ।
तत्संबंधि द्युरात्रस्य वृत्तं लगति सर्वथा ॥५॥
यस्यर्क्षस्य[3] सदैवास्तस्तस्यैव परमाधराः ।
अंशावारद्वयं गोले भवन्तीति परिस्फुटं ॥६॥
सदोदितर्क्षस्य च यस्य[4] वृत्तं द्युरात्रसंज्ञं क्षितिजेस्ति लग्नं ।
तस्यैकवारं परमोन्नतांशा भवन्ति गोलेस्ति परिस्फुटं त्विदं ॥७॥
ऋक्षस्य[5] यास्यास्तमितस्य[6] नित्यं द्युरात्रवृत्तं क्षितिजेऽस्ति लग्नं ।
तस्यैकवारं परमाधरांशा भवन्ति चैषां कथयामि साधनं ॥८॥
निरक्षदेशे ये स्पष्टाः क्रांत्यंशास्ते नतांशकाः ।
नतांशाः खांकशुद्धाः स्युः परमोन्नतभागकाः ॥९॥
तावंत[7] एव परमा अधरांशा भवन्ति हि ।
साक्षदेशे यद्दक्षं स्यान्नाडी[8] वलयतो दिशि ॥१०॥
[9]दक्षिणस्यां तदा तस्य स्पष्टा ये क्रांतिभागकाः ।
लंबांशशुद्धा यच्छेयं[10] परमोन्नतभागकाः ॥११॥
साक्षदेक्षे यद्दक्ष[11] स्यान्नाडीवलयतो[12] दिशि ।

---

(घ) ६. यस्यास्तमितस्य for (यास्यास्तमितस्य)
१०. छेपं for (छेयं)

(ङ) १. स्तेवं for (स्त्येवं)
२. ख for (ख्य)
३. यस्य तस्य for (यस्यर्क्षस्य)
४. सदोदितभक्षच्चयस्य for (सदोदितर्क्षस्य च यस्य)
५. ऋणस्य for (ऋक्षस्य)
६. यस्यास्तमितस for (यास्यास्तमितस्य)
७. 'तावंत – भवन्तिहि' लुप्त
८. स्या नाडी for (स्यान्नाडी)
९-११. '॥१०॥ दक्षिण—यदृक्षं स्या' लुप्त
१२. 'न्नाडी – दिशि' लुप्त

उत्तरस्यां तदा तस्य स्पष्टा ये क्रांतिभागकाः ॥१२॥
लंबांशसहिताः कार्याश्चेत् स्युर्नवतितोधिकाः ।
तदा भार्द्धांशशुद्धाः स्युः परमोन्नतभागकाः ॥१३॥
पूर्वोक्तवैपरीत्येन परमाधरभागकाः ।
यस्य स्पष्टक्रांतिभागा लंबांशेभ्योधिका यदि ॥१४॥
बिंबगोलस्तस्य भस्य दृश्यध्रुववशात्सदा ।
उदितो वा सदैवास्तं यातश्च भवति स्फुटं ॥१५॥
लम्बांशेभ्यः क्रांतिभागाः स्पष्टाः स्युर्यत्प्रमाणकाः ।
अधिकास्ते त्र विज्ञेया परमोन्नभागकाः ॥१६॥

इति परमोन्नतांशपरमाधरांशज्ञानं ।

अथ दिगंशोपरिनतांशानयनम्—

दिग्भागकोटयंशकसिंजिनीघ्नी पलोत्क्रमज्या त्रिभजीवयाप्ता ।
तदूनदिक्कोटिलवज्यकाया कोदण्डकोटिः परसंज्ञकः स्यात् ॥१॥
लंबज्यका दिग्लवकोटिमौर्व्यागुण्या त्रिभज्या विहृता फलस्य ।
कोदण्डकोटिः परसंज्ञको वा जीवा तदीया च हरो विचिंत्यः ॥२॥
स्वाक्षापमज्ये त्रिभसिंजिनी गुणे हारेण भक्ते च तदीयचापयोः ।
योगे वियोगे समभिन्नकाष्ठयोरभीष्टकाः स्युः क्रमशोन्नतांशकाः ॥३॥
सौम्यांशकश्चेदधिकोपमोक्षतः प्राग्दिग्लवज्यापचयंगता पुनः ।
प्रवर्द्धते चापर दिग्लवज्यकान्यूनेपमेमि स्वपलात्तदा धनुः ॥४॥

---

(ङ) १. परमौनत for (परमोन्नत)　　२. सुर्यत् for (स्युर्यत्)
३. दिगभाग for (दिग्भाग)　　४. कोटांशक for (कोटयंशक)
५. शिनिघ्नी for (सिंजिनीघ्नी)　　६. दिकोटि for (दिक्कोटि)
७. लवजकाया for (लवज्यकाया)　　८-९. 'परसंज्ञकः—कोदण्डकोटिः' लुप्त
१०. तदिया for (तदीया)　　११. हरेण for (हारेण)
१२. योगोवियोगः for (योगेवियोगे)　　१३. नूने for (न्यूने)

द्वितीयमभ्राऽष्टकुतो विशोध्य वा ततो नतांशा[1] द्वि विधाः क्वचिन्मताः[2] ।
नतज्यकावर्गं[3] विवर्जितायास्त्रिज्याकृतेर्मूलमिहोन्नतज्या[4] ॥५॥
निरक्षदेशे क्रांतिज्या त्रिज्याघ्नी दृग्ज्ययोद्धृता[5] ।
फलचापं[6] नतांशाः स्युरुन्नताः खांकविच्युताः ॥६॥

**अथैषां पद्यानां वाक्यार्थः—**

अक्षांशानां उत्क्रमज्या दिगंशकोटयंशजीवा गुणा त्रिज्या भक्ता यल्लब्धं[7] तेनोनायाः दिगंशकोटयंशज्यायाः[8] चापकोटिः परसंज्ञः[9] स्यात् । लम्बांशज्या दिगंशकोटिज्या गुणा त्रिज्या भक्तफलस्य[10] चापकोटिः परसंज्ञः स्यात् । वा प्रकारान्तरेण । तज्जीवाहरो[11] ज्ञेयः । स्वदेशीयाक्षांशज्याक्रान्ति च[12] त्रिज्या गुणा पृथक्[13] हारेण भक्ता फलद्वयस्य[14] [15] चापद्वयं कर्तव्यं । अक्षांशक्रांत्योरेकदिक्त्वे[16] चापयोर्योगो नतांशाः अभीष्टा नतांशा भवन्ति । अक्षांशक्रान्त्योर्भिन्नदिक्त्वे[17] फल-[18]चापयोरन्तरं क्रमशो नतांशा अभीष्टाः[19] स्युः । स्पष्टक्रान्तिरुत्तरगोलेऽक्षांशाधिका भवति ।

अथ च पूर्वदिगंशा अपचिता भवन्ति । पश्चिमदिगंशा उपचिता भवन्ति ।

---

(घ) १२. + ज्या +

(ङ) १. नतांसद्विविधाः for (नतांशा द्विविधाः)
२. कच्चिनमताः for (क्वचिन्मताः) ३. वर्गः for (वर्गं)
४. महोन्नतज्या for (मिहोन्नतज्या) ५. दृगजयोद्धृता for (दृग्ज्ययोद्धृता)
६. पलचापं for (फलचापं) ७. यलब्धं for (यल्लब्धं)
८. जायाः for (ज्यायाः) ९. रशंज्ञः for (परसंज्ञः)
१०. पलस्य for (फलस्य) ११. तजीवा for (तज्जीवा)
१३. प्रथक् for (पृथक्) १४. पलद्वयस्य or (फलद्वयस्य)
१५. + चापद्वयस्य + १६. क्रान्तो for (क्रान्त्यो)
१७. भिनविक्त्वे for (भिन्नदिक्त्वे) १८. पलचापयो for (फलचापयो)
१९. अभिष्टाः for (अभीष्टाः)

[1]तदा आनीत स्पष्टक्रान्त्यंशान् भार्द्धांशकेभ्यः संशोध्य शेषेण नीतेष्टाक्षांशाः संस्कार्या[2]स्ते नतांशा भवन्ति। निरक्षदेशे क्रान्तिजीवा त्रिज्या गुणा दृग्ज्या[3] भक्ता फ[4]लस्य चापं नतांशाः स्युः। ते खांकच्युता उ[5]न्नतांशा भवन्ति।

इति।

अत्र उपपत्तिः—षोडशेन शकलेन। कखगं[6] क्षितिजं। खलघमायनवृत्तं। कलगं नाडीवलयं। हृचिह्नं खमध्यः। वं ग्रहस्थानं। जहवं दृग्वृत्तं[7]। धवं बिंबोपरिगतंध्रुववृत्तं। धं ध्रुवः। धजदं दृग्वृत्तं[8] नाडीवृत्तसंपाता[9]त्त्रिभांत[10]रे ध्रुववृत्तं। कतं दिगंशकोटिः। [11]जधं फलं। जदं फलकोटिः। वमं ग्रहबिंबक्रान्तिः। अत्र बजदत्रिभुजं वहलत्रिभुजं बवम त्रिभुजं चैतानि सजातीयानि। यदि जदेन जवं लभ्यते। तदा हलेन किमिति लब्धं हवं। पुनर्जदेन यदि जवं लभ्यते तदा वमेन किमिति। लब्धं बवं। हवबवयोगेन्तरे वा हवं नतज्या। शकलं।

[12]अथ [13]दिग्भागकोट्यं[14]शकसि[15]ञ्जिनीघ्नीत्यस्योपपत्तिः खण्डन्यासेन सा यथा। त्रिज्यया लंबज्या लभ्यते तदा दिगंशकोटिज्यया किमिति। अस्मि[16]न्ननुपाते लम्बज्यास्वरूपमिदं। प०। उ०[17] १ त्रि० अ[18]नेन दिक्को[19]टि जीवा गुण्या त्रिज्यया भाज्या

(घ) १२. यहां से आगे समस्त लिखे पर स्याही पोत रक्खी है। कुछ भी स्पष्ट नहीं।
    १८, यहां से कुछ २ दिखाई देने लगा है।

(ङ) १. + अक्षांशकांत्यो भिनदिक्त्वे पलचापयोरन्तरं। क्रमसो नतांसाः अभीष्टाः स्युः स्पष्टक्रांतिरुत्तरगोलेक्षांसाधिका भवन्ति। अथ च पूर्वदिगंसा अपचिता भवन्ति -.-

२. संस्कारा for (संस्कार्या)  ३. दृक्ज्या for (दृग्ज्या)
४. पलस्य for (फलस्य)  ५. उनतांस. for (उन्नतांशा)
६. कखगति for (कखगं)  ७. दृगवृत्तं for (दृग्वृत्तं)
८. दृगवृ for (दृग्वृत्तं)  ९. 'ता' लुप्त
१०. त्रिभान्ततरे for (त्त्रिभांतरे)  ११. 'जधं फलं' लुप्त
१३. दिगभाग for (दिग्भाग)  १४. कोट्यंसक for (कोट्यंशक)
१५. शिजिनी for (सिञ्जिनी)
१६. अस्मिन्नुपाते for (अस्मिन्ननुपाते)
१७. उ० त्रि०१ for (उ० १ त्रि०)  १९. दिकोटि for (दिक्कोटि)

एवं कृते [1]एकस्मिन् खण्डे दिक्कोटिजीवै[2]वावशिष्टा, द्वितीयखण्डे [3]पलोत्क्रमज्या दिक्को-टिजीवा गुणा त्रिज्याभक्त ेति सिद्धं । अत इदं [4]फलं दिक्कोटिजीवायां शोधितं शेषस्य धनुः कोटिः परसंज्ञः स्यादित्युपपन्नं ।

इति दिगंशोपरिनतांशानयनं सोपपत्तिकं संपूर्णम् ॥६॥[5]

**अथोन्नतांशेभ्यो लग्नानयनम्—**

**तत्रादावुन्नतांशेभ्यो नतकालः साध्यंते स यथा ।**

**दिनार्द्धमानोत्क्रमसिंजिनी स्यान्म[6]ध्यांत्यका तद्[7]गुणितोन्नतज्या ।**

**भक्तातु मध्योद्भव शंकुनासौ स्वेष्टांत्यका सन्मति नावगम्या ॥१॥**

**[8]स्वेऽष्टांत्ययो नामध्यांत्यानतकालोत्क्रमज्यका ।**

**अस्या उत्क्रमचापं [9]यन्नतकालः स एव हि ॥२॥**

**यद्योत्क्रमज्या त्रिभसिंजिनीतोधिका तदा त्रिज्यकया विहीना ।**

**शेषस्य चापं वियदंक[10]युतं नताख्यकालो भवति स्फुटोत्र ॥३॥**

**स्फुटापमांशैरथलंबभागाः पृथग्युतो नास्त्वनयोरिहज्ये ।**

**तयोश्चयोगार्द्धमितोहरः स्याल्लंबांशकाः क्रांतिसमा यदि स्युः ॥४॥**

**तदा हरः स्यात्परमोन्नतांशज्यार्द्धं यदा लम्बलवाधिका स्यात् ।**

---

(घ) १०. युक्तं for (युतं)

(ङ) १. एगित त्रिज्यावृत्तदिजीवोकोटि for (एवं कृते एकस्मिन् खण्डे दिक्कोटि)

२. + वा +

३. खंडो for (खण्डे)

४. पलं for (फलं)


५. '॥६॥' लुप्त

६. मध्यांतका for (मध्यांत्यका)

७. दुणितानतज्या for (तद्गुणितोन्नतज्या)

८. स्वेष्टांतयो for (स्वेष्टांत्ययो)

९. चापाय नतकाल for (चापं यन्नतकालः)



क्रांतिस्तदा चोन्नतभागकाश्च वारद्वयं यांति तयोर्ज्यके[1] ये ॥५॥
तयोर्वियोगार्द्धमितो हरो वा स्पष्टापमज्याक्षलवज्यकाघ्नी।
त्रिज्याहृताप्तं परमोन्नतांशज्यायामृणं स्वंक्रमतो विधेयं[2] ॥६॥
क्रांत्योर्[3]रुदग्याम्यगयोर्[4]हरः स्याद्वा क्रांति कोटिज्यकया विनिघ्नी।
लंबांशजीवा त्रिभजीवयाप्ता लब्धं हरः स्यादिति वेदितव्यं ॥७॥

चतुर्भिः कालापकं—
परोन्नतांशोद्भव सिंजिनीतो संशोधनीयोन्नतभागजीवा।
शेषं त्रिभज्यागुणितं हराप्तं नताख्यकालोत्क्रमसिंजिनी[5] स्यात् ॥८॥
अस्या[6] भवेदुत्क्रमतो धनुर्यन्नताख्य[7]कालो भवति स्फुटोयं।
पूर्वे कपाले दिनमानखंडे नताख्यकालः परिशोधनीयः ॥९॥
शेषं भवेदुन्नतकालसंज्ञं[8] पश्चात्कपाले दिनमानखंडे।
नताख्यकालः खलु योजनीयो दिनस्य कालो गतसंज्ञकः स्यात् ॥१०॥
स आक्षदृक् संस्कृतभोदयांशयुक्तस्तनोस्ते निजदेशभागाः।
भवंत्यथो वायनदृष्टिकर्मयुतस्य लंकोदयके नताख्यः ॥११॥
कालो विशोध्यः[9] खलु पूर्वसंज्ञश्चेत्पश्चिमस्तत्र युतो विधेयः।
शेषं ख[10]लग्नोदयं काल[11]मानं खांकैर्युतं ते निजभोदयांशाः[12] ॥१२॥
भवन्ति लग्नस्य पुनर्विलग्नमेभ्यः प्रसाध्यं सुधियोक्तरीत्या[13]।
इति

---

(घ) १. 'ज्यंके—हरो वा' तक अस्पष्ट, स्याही पुती हुई है।
११. अस्पष्ट १२. अस्पष्ट
(ङ) १. तयोर्वियोकेय for (तयोर्ज्यकेये) २. विदेहं for (विधेयं)
३. क्रांतो for (क्रांत्यो) ४. मगयोर्हरः for (म्यगयोर्हरः)
५. क्रमिराजजिनी for (त्क्रमसिंजिनी)
६. अस्य for (अस्या) ७. यंनताख्य for (यंन्नताख्य)
८. दुनतकाल संज्ञं for (दुन्नतकालसंज्ञं)
९. विधोः for (विशोध्यः) १०. 'ख' लुप्त
१३. रित्या for (रीत्या)

अथार्थः श्लोकानां क्रमेण लिख्यते ।

उन्नतांशज्या दिनार्द्धोत्क्रमज्यया मध्यांत्यया गुण्या[1] मध्याह्नशंकुना भक्ता फलमिष्टांत्या । अनया हीनांत्या नतकालोत्क्रमज्या भवति । अस्या उत्क्रमचापं[2] नतकालो भवति । यदोत्क्रमज्या त्रिज्यातोधिका तदा तस्यां त्रिज्यां विशोध्य[3] शेषस्य[4] चापं नवतियुतं नतकालो भवति ।

अथ प्रकारान्तरं । स्पष्टक्रान्त्यंशाः लंबांशेषु युतोनाः कार्याः उभयोर्ज्ये साध्ये[5] । ज्ययोर्योगार्द्धं[6] हरो भवति । यत्र स्पष्टक्रान्तिर्लंबांशसमा[7] भवति । तदा परमोन्नतांशज्यार्द्धं हरो भवति । यत्र लंबांशेभ्योधिका क्रान्तिस्तत्रोन्नतांशा वारद्वयं परमतां यान्ति । तत्रोन्नतांशद्वयज्यान्तरार्द्धं[8] हरो भवति । अथवा स्पष्टक्रांतिज्या अक्षांशज्या गुणा[9] त्रिज्याभक्ता लब्धं परमोन्नतांशज्यायां शोध्यं[10] यदा[11] स्पष्टक्रान्तिरुत्तरा स्यात् । दक्षिणा चेत्तदा परमोन्नतांशजीवायां योज्यं वा हरो भवति । स्पष्टक्रान्तिकोटिज्यालम्बांशज्या गुणात्रिज्याभक्ता वा हरो भवति । उन्नतांशज्या परमोन्नतांशजीवायां शोध्या, शेषं त्रिज्यागुणं हरभक्तं फलं[12] नतकालस्योत्क्रमज्या भवति । अस्या[13] उत्क्रमचापं नतकालः । पूर्वकपाले नतकालो दिनार्द्धं शोध्यः[14] शेषमुन्नतकालो भवति । पश्चिमकपाले दिनार्द्धं योज्यः दिनगतकालो भवति । स आक्षदृक्कर्म संस्कृतग्रहोदयांशयुतो लग्नस्य विषुवांशा भवन्ति[15] । आयनदृक्कर्मं

---

(घ) ८. तरार्ध for (तरार्धे)

(ङ) १. गुणा for (गुण्या) २. + ज्या +

३. विसोध for (विशोध्य)

४. शेषचापं for (शेषस्य चापं) ५. साधे for (साध्ये)

६. जयोर्योगार्द्धं for (ज्ययोर्योगार्द्धं) ७. समाना for (समा)

९. + ज्यार्द्धं हरो भवति यत्र लम्बांशेभ्यो धिकाक्रांतिरतत्रोनतां तासावारद्वयं परमतां यांति ततो नतांद्वस +

१०. साध्यं for (शोध्यं) ११. य for (यदा)

१२. पलं for (फलं) १३. तस्या for (अस्या)


१४. दिनार्द्धसाध्ये for (दिनार्द्धं शोध्य)


१५. भवं for (भवन्ति)

संस्कृतोदये पूर्वनतकालः शो[1]ध्यं पश्चिमनतकालो योज्यः दशमोदयो भवति। अस्मि-न्नवतियुता चेल्लग्नस्य विषुवांशा भवन्ति। एभ्यः पुनर्लग्नमानेयं उक्तप्र[2]कारेण य[3]द्यापमांशैरित्यस्योपपत्तिः सप्तदश[4]शकलेन। कखगघमायनवृत्तं। कगंनाडीवल-यो[5]र्ध्वाधर सूत्रम्। चछं ऊर्ध्वाधर स्वस्तिकसूत्रं। [6]चं खमध्यः। [7]खघं समचिह्नसूत्रं। झभं ध्रुवद्वयनिबद्धसूत्रं। संघजं द्युज्यावृत्तसूत्रं। कघं लवांशाः। कसं क्रान्त्यंशाः लम्बांशक्रान्त्यंशान्तरं घसं इद[8]मेव परमोन्नतांशचापं। तज्जीवातसं। पुनः खगं-लम्[illegible]ाः। गजक्रान्त्यंशाः। अनयोर्योगः खजं। योगज्या[9]जवं। योगज्यां[10]तरज्या-यो[illegible]ं। तदर्द्धं लनंवानसंहरो भवति। घमं इष्टोन्नतांशा। तज्यामथं। मथसतयो[11]रन्तरं [12]सदं। सनघत्रिभुजं [13]सट्टत्रिभुजं च मिथः सजातीयं। यदि सनेन [14]सघं त्रिज्या लभ्यते। तदा सदे न किमिति लब्धं [15]सटं इदम् नतकालोत्क्रमज्या-भवतीत्यु[16]प[17]पन्नं। इदं दक्षिणक्रान्तौ ज्ञेयं। उत्तरक्रान्तौ तु अष्टादशक्षेत्रेणोपपत्ति-रूहनीया, अत्र सजलत्रिभुजं वृत्तान्तः पतितं अस्ति। एतावान् विशेषः। शेषं

(घ) १. शोध्यः for (शोध्यं)
२. अस्पष्ट
३. 'यदा—स्वस्तिक सूत्रं' लुप्त
६-९. 'चंख—योगज्यां' समस्त लुप्त
१०-१६. 'तरज्या—त्युप' समस्त लुप्त
१७. 'पन्नं—क्षेत्रं यथा' लुप्त

(ङ) ४. 'श' लुप्त
५. विसर्ग लुप्त
७. खगं for (खघं)
८. इहमेव for (इदमेव)
११. सययो for (सतयो)
१२. + सदं +
१३. 'सट्टत्रिभुजं' लुप्त
१४. सघि for (सघं)
१५. सदं for (सटं)






सप्तदशक्षेत्रवत् ज्ञेयं। लम्वांश तुल्या यत्र क्रान्तिस्तत्रोपपत्तिरेकोनविंशतितम-क्षेत्रेण[१]। क्षेत्रं यथा[२]। अत्रै[३]तावान् विशेषः। सखं द्युज्यावृत्तसूत्रं। सतं लम्बांश-क्रान्त्यंशयोगज्या इयमेव परमोन्नतांशज्यापि भवति। लवांशक्रान्त्यंशयोरन्तरज्या-भावः। अतः सतार्द्धमेव सनं[४] हरो[५] जातः। शेषं पूर्ववत् ज्ञेयं। तदेवमुपपन्नं परमो-न्नतांशज्यार्द्धं हरो भवतीति। लम्वां[६]श[७]काधि[९]का यत्र क्रान्तिस्तत्रोपपत्तिर्विंशतितम[८]-क्षेत्रेण। अत्र लम्वांशाधि[९]कक्रान्तौ सजं[१०] द्युज्या[११]वृत्तसूत्रं। सतं लम्बांशक्रान्त्यंशयोग[१२]-ज्या अन्तरज्याराजं भवतीति। राजसतयो[१३]रन्तरं सलं भवति। सतजखेच[१४] परमो-न्नतांश ज्येपि भवतः। तदेवमुपपन्नं परमोन्नतांश ज्यान्तरार्द्धं हरो[१५] भवतीति[१६]।

अथ स्पष्टापमज्याक्षलवज्यकाघ्नीत्यस्योपपत्यर्थं। अत्र क्षेत्रं पूर्वोक्तमेव। सखं परमोन्नतांशज्या। अधं क्रान्तिः। भथं अक्षज्या[१७], अत्र अधमत्रिभुजं अभथ त्रिभुजं[१८] च मिथः सजातीयं[१९]। यदि त्रिज्ययाक्षज्या लभ्यते। तदा क्रान्तिज्यया

---

(घ) २. '···क्षेत्रं यथा' समस्त लुप्त  ३-६. 'अत्रै—लम्बां' समस्त लुप्त
७-१५. 'शकाधि—तरार्द्धं ह' समस्त लुप्त।
१६. 'रोभवतीति—किमिति' लुप्त

(ङ) ७. + क्षेत्रेण +  ४. त्पनं for (सनं)
५. हारो for (हरः)  ६. लंका for (लंवां)
१५. सकादिका for (शकाधिका)  ८. वितितम for (विंशतितम)
९. साधित for (शाधिक)  १०. सज्यं for (सजं)
११. द्यु जा for (द्यु ज्या)
१२. क्रान्त्यं सयोर्योगज्या for (क्रान्त्यंश-योगज्या)
१३. राजस्ततयो for (राजसतयो)
१४. स्तजखे for (सतजखे च)
१७. भधं अज्या आत्र for (भथं अक्षज्या सत्र)
१८. 'अभथत्रिभुजं' लुप्त
१९. सजातियं for (सजातीयं)




किमिति[1] लब्धं[2] घमं उन्मण्डलशंकुः स यदि दक्षिणगोले मध्यशंकौ योज्यते, उत्तर-गोले शोध्यते तदा यष्टिर्भवति स एव हर इत्युपपन्नं। अत्र सर्वत्र हरो यष्टि[3]र्भवतीति बुद्धिमद्भिर्ज्ञेयं। अथवा क्रान्तिकोटिज्यकया विनिघ्नीत्य[4]स्योपपत्तिः। त्रिज्या कर्णे लम्बज्या[5] को[6]टिस्तदा द्यु[7]ज्याकर्णे काकोटिः लब्धं यष्टिः। स एव हरो भवतीत्युपपन्नं[8]।


अथ लग्नादुन्नतांशानयने श्लोकाः—

ग्राह्यो ध्रुवश्चाक्षदृगाऽऽख्यकर्मंसु संस्कृतोस्योदयभागकार्ये।
तनोर्विशोध्या द्यु[6]दयांशकेभ्यः शेषेण खेटस्य दिनार्द्धकेन ॥१॥
सहांतरं बिबनताख्यकालस्तस्योत्क्रमाख्यज्यकया विहीना।
दिनार्द्धमानोत्क्रम सिंजिनीतच्छेषं दिनार्द्धोत्क्रमजीवयाप्तम् ॥२॥
संताडितं तत्परमोन्नतांशज्ययाऽत्र लब्धोन्नतभागजीवः।
अस्या धनुश्चोन्नतभागकास्ते भवन्त्ययो वच्मि बहुप्रकारैः ॥३॥
अथो भवेयुर्विषुवांशकाश्च ये सुसंस्कृतस्यायनदृष्टिकर्मणा।
खमध्यलग्नस्य च येंतरन्तयोर्नताख्यकालः सुधियावगम्यते ॥४॥

---

(घ) १. '...किमिति' समस्त लुप्त
२-५. 'लब्धं—ज्याको' समस्त लुप्त।
६-८. 'टिस्तदा—त्युपपन्नं' लुप्त
६. द्यु दयांश for (द्यु दयांश)
(ङ) ३. यष्टी for (यष्टिर्)
४. स्य for (त्य)
७. द्यु जा for (द्यु ज्या)





प्राक्साधिते नाथ हरेण निघ्नी नताख्यकालोत्क्रम सिंजिनीव ।
त्रिभज्यया प्राप्तफलस्य कार्यं मध्योन्नतांशज्यकयांतरं च ॥५॥
शेषं भवेदुन्नतभागजीवा तच्चापमत्रोन्नतभागकास्ते ।
अथ प्रकारं कथयामि पूर्वैः संसाधितं चोन्नतभागकानां ॥६॥
वाणाभावो यत्र खेदस्य[1] तत्र कार्या जीवो[2] खेटतन्वंतरस्य ।
सा त्रिज्याप्ता दृग्गति घ्न्यून्नतांशज्यास्यादस्याश्चाप मत्रोन्नतांशाः ॥७॥
यत्रास्ति बाणः शरकोटिसिंजिनी त्रिभोनलग्नग्रहजांतरज्यया ।
गुण्या त्रिभज्या विहृता फलस्य यच्चापं तदाद्यं खनवच्युतं भवेत् ॥८॥
अथाद्यचापज्यकया विभक्ता शरज्यका त्रिज्यकया विनिघ्नी[3] ।
लब्धस्य चापं भवति द्वितीयं दृक्क्षेपबाणौ यदि भिन्नदिक्कौ ॥९॥
द्वितीयचापस्य च दृग्गतेश्च चापस्य योगः सुधिया विधेयः ।
ऐक्ये दिशोरन्तरमेतयोश्च तृतीयचापं भवतीति वेद्यं ॥१०॥
तृतीयचापज्यकया विनिघ्नी त्रिज्याहृता चाद्य धनुर्ज्यका यत् ।
लब्धं फलं तद्धनुषस्तु भागा भवन्ति ते वोन्नतभागसंज्ञाः ॥११॥
भोगो ग्रहस्य यदि लग्न समोथवास्ततुल्यो भवेदिह शरज्यकया विनिघ्नः ।
दृक्क्षेपचापजगुणस्त्रिभजीवयाप्तो लब्धं फलं भवति चोन्नतभागसंज्ञं ॥१२॥
भोगो ग्रहस्य यदि वित्रिभलग्नतुल्यश्चेत्स्यात्तदात्र शर एव धनुर्द्वितीयं ।
तद्दृग्गतौ च खलु संस्कृतमुन्नतांशास्ते वा भवन्ति सुधियोति[4] विचारणीयं ।१३

अथैतेषां पद्यानां व्याख्या—

तत्रादौ । ग्राह्यो ध्रुव इत्यादिश्लोकत्रयस्य व्याख्या । आक्षदृक्कर्म संस्कृतध्रुवको ग्राह्यः । तस्य उदयांशा लग्नोदयांशेभ्यः शोध्याः, शेषस्य ग्रहदिनार्द्धे[5]नान्तरं कार्यं । स विबनतकालो भवति । तस्योत्क्रमज्या दिनार्द्धोत्क्रमज्यायां शोध्या । शेषं

(घ) १. खेटस्य for (खेदस्य) २. जीवा for (जीवो)
३. विघ्नी for (विनिघ्नी) ४. सुधियेति for (सुधियोति)
५. दिनार्द्धे for (दिनार्द्ध)

परमोन्नतांशज्यया गुणितं दिनार्द्धोत्क्रमज्यया भक्तं लब्धा उन्नतांशज्या । अस्या-श्चापं उन्नतांशाः इतिः ॥३॥

अथान्यत्प्रकारान्तरं श्लोकत्रयेणाह । अथो भवेयुरिति । आयनंदृक्कर्म संस्कृतस्य विषुवांशा ग्राह्याः । तेषां दशमविषुवांशैरन्तरं कार्यं । स नतकालो भवति । अस्योत्क्रमज्या पूर्वानीतहरेणगुणिता त्रिज्या भक्ता । लब्धस्य[1] परमोन्नतांश-जीवया सहान्तरं कार्यं । शेषमुन्नतांशज्या ऽस्याश्चापमुन्नतांशाः इति ॥६॥

**अथान्यत्प्रकारांतरमाह—**

बाणाभाव इत्यादिभिः सप्तश्लोकैः । यदा ग्रहस्य शराभावस्तदा लग्न-ग्रहान्तरज्या दृग्गतिगुणा त्रिज्या भक्ता लब्धमुन्नतांशज्या भवति । अस्याः चाप-मुन्नतांशाः । यदा शरः स्यात्तदा शरकोटिज्या वित्रिभलग्नग्रहभोगान्तरज्या गुणा त्रिज्या भक्ता फलस्य चापं नवतिशुद्धं प्रथमचापसंज्ञं भवति ।

अथ शरज्या त्रिज्यागुणा प्रथमचापज्या भक्ता लब्धस्य चापं द्वितीयचापं भवति । शरदृक्क्षेपयोर्भिन्नदिक्त्वेदृग्गतिचापद्वितीयचापयोर्योगः कार्यः । दिगै-क्येंतरं कार्यं, तृतीयचापं भवति । अस्य ज्या प्रथमचापज्या गुणा त्रिज्या भक्ता फलचापमुन्नतांशाः । यदि ग्रह[2]लग्नतुल्योथवा सप्ततुल्यो भवति । तदा शरज्या दृक्क्षेपज्या गुणात्रिज्या भक्ता फलचापमुन्नतांशाः ।

अथ च ग्रहभोगः वित्रिभलग्नतुल्यो भवति । तदा शर एव द्वितीयचापं तत् दृगातौ[3] संस्कार्यं उन्नतांशा भवन्ति । यत्रास्ति बाण इत्यस्योपपत्तिर्द्वाविंशतितम-क्षेत्रेण । कबजदं क्षितिजं । हृंखमध्यः । कबजं क्रान्तिवृत्तम् । झं कदम्बः । बहृदं दृक्क्षेपबलयं । जंलग्नं । तंबिंबं । झतलं कदम्बवृत्तं । हृतमं दृग्वलयं । मतजं लग्न-बिंवोपरिगतं चलवृत्तं । तलः शरः । झतं शरकोटिः । हृतं नतांशाः । अतमुन्न-तांशाः । हृवं दृक्क्षेपः । वबं दृग्गतिः । वं वित्रिभं । लं स्पष्टग्रहः । लंवमन्तरं । यदि झलज्यया लवज्या प्राप्यते तदा झतेन तमं प्राप्यते, एनं नवतेः शोध्यशेषं तजं प्रथम-

(घ) १. लब्धेम for (लब्धस्य)          २. ग्रहः for (ग्रह)
३. दृग्गतौ for (दृगातौ)

चापं। प्रथम[1]चापेन तजेन तलं प्राप्यते तदा मजे[2] त्रिज्यया मवं प्राप्यते। अस्य बवस्य योगः मबसंज्ञं तृतीयचापं। मजेनमवं प्राप्यते। तदा तजेन तम्रं प्राप्यते तम्रं उन्नतांशाः।


अथ क्षेत्रं। भागो[3] ग्रहस्योपपत्तिस्[4]त्रयोविंशतिमं[5] क्षेत्रेण। कबजदं क्षितिजं। हंख[6]मध्यं। दझवं क्रान्तिवृत्तं। बं[7]कदम्बः। कहजं दृक्क्षेपवलयं। अं बिंबं। वअवं कदम्बवृत्तं। हअलं दृग्वलयं। वं लग्नं। तदेव ग्रहध्रुवकः। अवंशरः। अलं उन्नतांशाः बजंदृक्क्षेपः कुतः सहं हवं च नवत्यंशमितं तुल्यमस्ति। उभयोस्तुल्ययोर्वहतुल्यं शोधितं। चेच्छेषं हसंवजं च तुल्यं भवति। असंदृक्क्षेपो भवति। तदा वजमपि दृक्क्षेपः बवेन बजं प्राप्यते। तदा अबन अलं प्राप्यते त एवोन्नतांशाः।


अथ यदि लग्नस्थाने लग्नविषुवांशा गृह्यन्ते स्पष्टस्थाने आयनदृक्कर्म संस्कृतस्य विषुवांशा गृह्यन्ते शरस्थाने स्पष्टक्रान्तिर्गृह्यते। दृक्क्षेपस्थलेऽक्षांशा गृह्यन्ते। तदाप्युक्त प्रकारेणोन्नतांशा आयान्ति।

इति लग्नादुन्नतांशानयनं।

---

(घ) १. प्रथमचापेन for (प्रथचापेन) २. तदामजेन for (तदामजे)
३. भोगो for (भागो) ४. ग्रहस्येत्यस्योपपत्ति for (ग्रहस्योपपत्ति)
५. त्रयोविंशतितम for (त्रयोविंशतितमं)
६. हखमध्यं for (हंखमध्यं) ७. वंकदम्बः for (बकदम्बः)





अथ ग्रहयोरन्तरचापज्ञानमाह—

नभोगयोश्चेच्छरयोरभावो विस्पष्टखेटांतरमन्तरं स्यात् ।
ग्रहस्य चैकस्य शरस्य सत्त्वेन्यस्याप्यभावेत्वथवोभयोश्च ॥१॥
बाणस्य सत्त्वेन्तरचापमत्र खेचारिणो[1] पंचविधं ब्रवीमि ।
न भोगयोः स्यात् ध्रुवकस्य साम्यं यद्वा खनन्दाल्पकमन्तरं च ॥२॥
खनन्दभागोन्मितमन्तरं वा भार्द्धांशकेभ्योनधिकं तथा च ।
खनन्दभागाधिकमन्तरं वा भार्द्धांशतुल्यं विवरं यदा वा ॥३॥
अथैकस्य शरासत्त्वे शरसत्वे परस्य च ।
द्वयोः समकलत्वं चेच्छर एवांतरं भवेत् ॥४॥
भार्द्धांशतुल्यं ध्रुवकांतरं चेद्बाणेन भार्द्धांशमितांतरं स्यात् ।
स्पष्टांतरं[2] खांकमितं यदा स्याद्बिंबांतरं चापि तदेव वेद्यम् ॥५॥
यदा नवत्यूनकमन्तरं स्याद्विस्पष्टयोस्तच्छरकोटिजीवा ।
त्रिज्या हृता चांतर कोटिजीवा गुणाऽऽप्तचापं नवतेर्विशोध्यं ॥६॥
स्पष्टांतरं स्याद्यदि खांकतोधिकं फलस्य चापं नवतौ युतं भवेत् ।
विश्लेषचापं ग्रह[3] बिंबयोरथो पंच प्रकारा उभयो शरे सति ॥७॥
स्पष्टध्रुवकयोः साम्ये दिक्साम्ये शरयोस्तथा ।
तत्र बाणांतरं खेटबिंबयोरन्तरं भवेत् ॥८॥
यदा बाणौ भिन्नदिक्कौ योगः स्याद्बाणयोस्तदा ।
बिंबद्वयांतरधनुर्गोलविद्भिरुदाहृतं ॥९॥
यदि स्पष्टयोरन्तरं भार्द्धभागैः समं स्याच्छरौ चैकदिक्कौ भवेतां ।
तदा बाणयोगश्च भार्द्धांशशुद्धो भवेदन्तरं बिंबयोः शेषकं यत् ॥१०॥
यदा भिन्नदिक्कौ शरौ तत्र बाणांतरं भार्द्धभागेषु संशोधितं च ।
यदत्रावशेषं तु विश्लेषचापं भवेत्खेटयोरंबरे तारकाणां ॥११॥

---

(घ) १. चारिणोः for (चारिणो) २. यदांतरं for (स्पष्टांतरं)
३. ग्रह for (ग्रह)

तुल्यौ यदा शरौ स्यात्[१] खेटयोरन्तरं तदा ।
भार्द्धभागसमं प्रोक्तं गोलागमविशारदैः ॥१२॥
यदा खेटयोरन्तरं खांकतुल्यं तदा चकबाणस्य जीवा विनिघ्नी ।
द्वितीय[२] बाणज्यया त्रिज्ययाप्ता बिललस्य[३] चापं खनंदाशशुद्धं ॥१३॥
द्वयोर्बाणयोरेक्दिक्त्वेऽथभिन्ने दिशौ बाणयोश्चेद्युतं तन्नवत्या ।
भवेत्खेटयोः स्पष्टयोरन्तरं तन्निरुक्तं च गोलागमज्ञैः पुराणैः ॥१४॥
यद्यन्तरं स्पष्टखगद्वयस्य भवेन्नवत्यूनमथोधिकं च ।
एकस्य कार्या शरकोटिजीवा स्पष्टांतरज्या गुणिता विभक्ता ॥१५॥
त्रिभज्ययाप्तस्य फलस्य चापं संशोधितं तन्नवतौ च शेषं ।
चापं भवेत्तत् प्रथमाभिधानं तस्यैव बाणज्यकया विनिघ्नी ॥१६॥
त्रिज्याद्यचापज्यकया विभक्ता फलस्य चापं भवति द्वितीयं ।
स्पष्टांतरं स्यात्खनवोनमेकदिक्कौ शरौ चेद्ग्रहयोर्भवेतां ॥१७॥
स्पष्टांतरं वा खनवाधिकं चेद्बाणौ यदा भिन्नदिशौ भवेतां ।
द्वितीयखेटस्य च बाणकोटौ द्वितीयचापं खलु योजनीयं ॥१८॥
ततो भवेत्तद्धि तृतीयचापं स्पष्टांतरं चेन्नतेरथोनं ।
विभिन्नदिक्कौ च शरौ भवेतां स्पष्टांतरं शून्यनवाधिकं च ॥१९॥
बाणौ भवेतां यदि वैकदिक्कौ द्वितीयचापस्य सहांतरं[४] च ।
द्वितीयखेटस्य शरस्य कोटया कार्यं[५] भवेत्तद्धि तृतीयं चापं ॥२०॥
अथाद्यचापज्यकया विनिघ्नी तृतीयचापोद्भूर्वासिजिनी च ।
त्रिज्या हृताप्तस्य फलस्य चापं चतुर्थचापं भवतीति वेद्यं ॥२१॥
स्पष्टांतरं भवति यत्र खनन्दतोनं बाणौ तथैव यदि वैक दिक्कौ ।
दिग्भिन्नता भवति वाशरयोस्तथा चेत्स्याद्बाणकोटिरधिकात्र द्वितीय चापात् ॥

---

(घ) १. स्यातां for (स्यात्) २. द्वितीयस्य for (द्वितीय)
३. विलब्धस्य for (विललस्य)
४. 'सहातरं च' स्याही से पुता होने के कारण अस्पष्ट ।
५. 'कार्यं भवे' स्याही से पुता होने के कारण अस्पष्ट ।

स्पष्टांतरं स्यान्नवतेरथोधिकं बाणौ तथैकां दिशमाश्रितौ यदा।
द्वितीयचापं शरकोटितोऽधिकं तदा तुरीयं नवते[1]र्विशोधयेत् ॥२३॥
यदत्रशेषं ग्रहबिंबयोस्तद्विश्लेषचापं भवतीति वेद्यं।
स्पष्टांतरं स्यात्खनवोनमत्र बाणावुभौ भिन्नदिशि स्थितौ वा ॥२४॥
स्याद्बाणकोटेरधिकं द्वितीयचापं तया स्पष्ट खगांतरं च।
खांकाधिकं भिन्नदिशिस्थबाणौ वाऽभिन्नदिक्कौ शरकोटिरत्र ॥२५॥
द्वितीय चापादधिका तदा तु चतुर्थचापं नवतौ तु योज्यं।
यद[2]त्रशेषं ग्रहबिंबयोस्तद्विश्लेषचापं भवतीति वेद्यं ॥२६॥

अथैषां श्लोकानामर्थो लिख्यते—

यद्युभयोः शराभावस्तदा स्पष्टयोरेवान्तरमंतरचापं भवति। अथैकस्य शर-सत्त्वे ऽन्यस्य शराभावे। अथोभयोः शरसत्त्वे चापांतरस्य ज्ञानं पंचप्रकारं। तद्यथा। उभयध्रुवकसाम्यमित्येकः। स्पष्टयोरंतरं नवत्यूनमिति द्वितीयः। स्पस्पटयोरंतरं नवतिरिति तृतीयः, स्पष्टयोरंतरं नवत्यूर्ध्वं भार्द्धांशोनमिति चतुर्थः। भार्द्धांशसम-मिति पंचमः। एकस्यशरसत्त्वेन्यस्य शराभावे तावल्लिख्यते। उभयोः समकलत्वे-तयोः शर एवांतरचापं। यदि स्पष्ट[3]योरंतरं १८० तदा शरं भार्द्धांशेषु संशोध्य तयोरंतरं भवति। यदि स्पष्टयोरन्तरं नवतिस्तदा तयो सशरविशरयोरन्तरं नवतिरेव। यदि नवत्यूनमधिकं वा स्पष्टयोरन्तरं तदा शरकोटिज्या अंतर-कोटिज्या[4] गुणा त्रिज्या भक्ता फलचापं नवतिमध्ये शोध्यं, यदि स्पष्टांतरं नवत्यूनं। यदि स्पष्टांतरं नवत्यधिकं तदा फलचापं नवतियुतं उभयोरंतरचापं भवति। उभयोः शरसत्वे पंचप्रकाराः प्रदर्श्यंते। उभयोः स्पष्टसमत्वं। उभयोः-शरावेकदिक्कौ तदा शरांतरमेव तयोरंतरचापं। यदि भिन्नदिक्कौ तदा शर-योग एव ग्रहांतरचापं। उभयोः स्पष्टयोः अंतरं १८० शरावेकदिक्कौ भवतस्तदा शरयोगो भार्द्धांशशुद्धः शेषं तयोर्ग्रहयोरंतरं। यदि भिन्नदिशौ शरौ तदा शरांतरं भार्द्धांशशुद्धं शेषं ग्रहयोरंतरं। यदि शरौ तुल्यौ तदा भार्द्धांश १८० मितमेवांतरं

---


(घ) १. 'नवते' स्याही से पुता, अस्पष्ट। २. 'यदत्रशेषं ग्र' स्याही से पुता अस्पष्ट,
३. स्पष्टयोरन्तरं for (स्पयोरन्तरं) ४. 'ज्या—शोध्यं' अस्पष्ट

यदि स्पष्टांतरं नवतिमितं तदा एकशरज्या द्वितीयशरज्यया गुण्या त्रिज्या भक्ता फलचापं नवतिशुद्धं कर्तव्यं यदि शरावेकदिशौ भवतः। भिन्नदिशौ चेन्नवतियुतं तद्ग्रह योरंतरं भवति।

अथ स्पष्टांतरं नवत्यूनमधिकं वा भवति। एकस्य शरकोटिज्या स्पष्टांतरज्या गुणा त्रिज्याभक्ता फलचापं नवतिशुद्धं शेषं प्रथमचापं। तस्यैव शरज्या त्रिज्यागुणा प्रथमचापज्या भक्ताफलचापं द्वितीयचापं।

अथ स्पष्टांतरं नवत्यूनं शरावेकदिशौ। स्पष्टांतरं नवत्यधिकं शरौ भिन्नदिशौ। तदा द्वितीयस्य शरकोटौ द्वितीयफलचापं योज्यं इदं तृतीयचापं। यदि स्पष्टांतरं नवत्यूनं शरौ भिन्नदिशौ भवतः। स्पष्टांतरं नवत्यधिकं शरावेकदिशौ तदा द्वितीयचापस्य द्वितीय शरकोटेरंतरं कार्यं। इदमपि तृतीयचापं। तृतीय चापज्या प्रथमचापज्या गुणा त्रिज्या भक्ता फलचापं चतुर्थचापं। यत्र स्पष्टांतरं नवत्यूनं शरावेक दिशौ वा भिन्नदिशौ शरकोटिरधिका द्वितीय चापात्।

अथ स्पष्टांतरं नवत्यधिकं शरावेकदिशौ द्वितीयचापमधिकं शरकोटेः। द्वितीय ग्रहस्य झंग्रहस्थानं। घहखं क्रान्तिवृत्तं। कंगौ कदंबौ तदा चतुर्थचापं नवतिशुद्धं शेषमुभयोर्ग्रहयोरंतरं। स्पष्टांतरं नवत्यूनं उभौ भिन्नदिशौ द्वितीयचापमधिकं शरकोटेः। स्पष्टांतरं नवत्यधिकं उभौ भिन्न दिशौ वा एक दिशौ द्वितीयचापाच्छरकोटिरधिका तदा चतुर्थचापं नवतियुतं तद्ग्रहयोरन्तरं भवति। यदा खेटयोरित्यस्योपपत्तिश्चतुर्वितितमक्षेत्रेण। कखगघं कदंबवृत्तं। वं ग्रहस्थानं। हं ध्रुवस्थानं ग्रहगं कदम्बवृत्तं। वभतं ग्रहांतरवृत्तं। घहचापं नवतिमितं स्पष्टान्तरम्।




बस्थानं ध्रुवं प्रकल्प्य नवत्यंशांतरे वृत्ते कृते वफघग चापे नवतिमिते भवतः। घकचापमपि नवतिभागमितं । धवचापं वग्रहस्य शरः । अयं गफतुल्यः। हज्ञचापं द्वितीयग्रहस्य शरः । हज्ञतत्रिभुजं हफगत्रिभुजं च सजातीयं । यदि गह्वेनगफं लभ्यते तदा हज्ञेन किमिति लब्धं ज्ञतं। ज्ञतं तवे शोध्यं वा योज्यं तदा बज्ञ उभयोरंतरचापं भवति। इत्युपपन्नं । ग्रहांतरं नवत्यूनमधिकं वा भवति इत्यस्योपपत्तिः पंचविंशादि क्षेत्रत्रयेण। कखगघं कदंबवृत्तं । वं ग्रहः । हं ध्रुवः कतगं कदंबवृत्तं। द्वितीयग्रहस्य । तं ग्रहः । खहघं क्रान्तिवृत्तं । कंगं कदंबौ । बंध्रुवं कल्प्यनवतिमितं वृत्तं । लहनसंज्ञं कार्यं । वलं वनं उभौ नवत्यंशमितौ । वतं ग्रहांतरवृत्तं । वतमंतरचापं हतग्रवृत्तं प्रथमकदंबवृत्तध्रुवात् द्वितीय ग्रहोपरिगतं कार्यं घं स्पष्टस्थानं वग्रहस्य । घवं शरोवग्रहस्य । मस्पष्टः तग्रहस्य । मतं शरः तग्रहस्य । घमग त्रिभुजं अतग त्रिभुजं उभे सजातीये । घमं स्पष्टयोरंतरं । नवतिमितेन गमेन मघं लभ्यते तदा गतेन शरकोट्या किमिति लब्धं, तग्रं इदं नवतिशुद्धं शेषं तहसंज्ञं प्रथमचापं । घग्रहत्रिभुजं तमहत्रिभुजं उभे सजातीये । हतेन तमं प्राप्यते तदा हग्रेन अघमिति द्वितीयं चापं । अघं घले संयोज्य द्वितीयचापं अलसंज्ञं भवति । हग्रलत्रिभुजं हतयत्रिभुजं उभे सजातीये । यदि हग्रेन अलं प्राप्यते तदा हतेन तयमिति चतुर्थचापं । तयं नवतिशुद्धं शेषं तवसंज्ञमंतरं ग्रहयोः । अथान्यल्लकलद्व-

(घ) १. कखगहं for (कखगघं)

बं । हृतं प्रथमचापं । छकं वकं द्वितीय चापं । यकछलयोर्योगोनरं वा कलसंज्ञ तृतीयचापं । वफवनयोर्योगोंतरं वाफनसंज्ञमपि तृतीयचाप । हृफलं । हृतयं । हृफनं । एतानि सजातीयानि त्रिज्यया । फलजीवा वाफनजीवा तृतीय चापस्य प्राप्यते तदा हृतप्रथमचापज्यया किमिति तयजीवा चतुर्थचापस्य प्राप्यते । तयसंज्ञं चतुर्थचापं । वयमितं नवतो युतमूनितं वातवसंज्ञमतरचाप भवति ग्रहयोः ।

अथ यदा ग्रहयोः शरयोः समत्वं तदान्तरचापायनमाह । समशरौ यदि समदिक्कौ तदा अन्तरार्द्धज्या शरकोटिज्या गुणात्रिज्या भक्ता फलचापं द्विगुणं अन्तरचापं भवति । यदि समशरौ भिन्नदिक्कौ तदा ग्रहान्तरार्द्ध कोटिज्या शरकोटिज्या गुणा त्रिज्या भक्ता फलचापं द्विगुणं भाघ्रांशशुद्धमन्तरचापं भवति ।

अत्रोपपत्तिः । कगजं क्रान्तिवृत्तचापं दहौ कदम्बौ । वतो अभीष्टग्रहौ एकदिक्समशरौ अचिह्नं ग्रह भिन्नदिक्समशरोस्ति । तत्रान्तरं चापज्ञानं । वतमन्तरचापं एकदिक् समशरग्रहयोरस्ति । भिन्नदिक् समशरयोस्तु व असंज्ञ अन्तरचापमस्ति । कजचिह्नचापं स्पष्ट । ग्रहान्तरमस्ति । कगचापं गजचापं च ग्रहांतरार्द्धचापमस्ति । दवहं प्रथमकदम्बवृत्तं । दगहं स्पष्टान्तरार्द्धकदम्बवृत्तचापं । तदहं[1] अतग्रहयोः कदम्बवृत्तं । कहगत्रिभुजं । वहज्ञत्रिभुजं च सजातीयं । कहजीवया



१. दतहं for (तदहं)

वगजीवा लभ्यते । तदा हवजीवया किमिति लब्धं वज्ञजीवा । तस्य चापं द्विगुणं वत संज्ञं । कगवत्रिभुजं जग अत्रिभुजं सजातीयं । त्रिज्यया कगकोटिज्या लभ्यते । तदा कवकोटिज्यया किमिति लब्ध्वा गवकोटिज्या तस्याश्चापं द्विगुणं भार्द्धांशशुद्धं अवसंज्ञमन्तरचापं भवति ।

अथ प्रकारान्तरमन्तरचापानयने । स्पष्टग्रहस्थाने आयनदृक्कर्म संस्कृतोदयांशाः ग्राह्याः । शरस्थाने स्पष्टक्रान्तिर्ग्राह्या । उक्तवत् क्रिया कार्या अन्तरचापं भवति ।

**अथाभीष्टनगरान्तरचापानयनमाह—**

देशान्तरं स्पष्टग्रहान्तरं कल्पनीयं अक्षांशान् शरांशान् प्रकल्प्य पूर्वोक्तप्रकारेण क्रियायां कृतायां सत्यां नगरान्तरचापज्ञानं भवति ।

**अथाक्षज्या क्रांतिज्या ज्ञाने नतांशेभ्यो नतकालानयनमाह—**

**गुणरवघ्न्यंशगुणितः शंकुः सैकः समन्वितः ।**
**गुणवर्गेण तद्भक्तानतांशज्याकृतिस्ततः ॥१॥**
**पदमिष्टापसज्या[1] सौगुणघ्नीष्टपलज्यका[2] ।**
**इष्टाक्षज्याक्षसिजिन्योर्वर्गांतरपदं हृतं ॥२॥**
**त्रिज्यया लंबया भक्तं नतांशज्या गुणं हृतं ।**
**इष्टाक्षज्यकया निघ्नं त्रिज्यया द्युज्यया हृतं ॥३॥**
**तच्चापं षट् हृता नाड्यो नतकालसमुद्भवाः ।**

**अथैतेषां श्लोकानामर्थो लिखिते[3]—**

अक्षज्या क्रांतिज्यया भाज्या फलं गुणो भवति । गुणकस्य त्रिंशदंशेन गुणितः शंकुः सैकः गुणकवर्गेण समविन्वतश्च कार्यः । तद्भक्तानतांशज्याकृतिः कार्या । अस्याः पदं इष्टापमज्या भवेद् । असौ इष्टा अपमज्या गुणघ्नौ इष्टाक्षज्या भवति ।

---

*(घ) २. पमज्या for (पसज्या)     ३. फलज्यका for (पलज्यका)
४. लिख्यते for (लिखिते)     ५. + कार्यः +

इष्टाक्षज्यावर्गः। अक्षज्यावर्गयोरन्तरस्य मूलं त्रिज्यागुणं लंवज्याभक्तं। पुनर्नतांशज्यागुणं। इष्टाक्षज्यकया भक्तं पुनस्त्रिज्यागुणं द्युज्याभक्तं कार्यं। फलस्य चापं षट्भक्तं नतकालसमुद्भवा नाड्यो भवन्ति ।

अस्योपपत्तिरेकोनत्रिंशेन क्षेत्रेण—कखगघं दृग्वृत्तार्द्धं। कघं व्यासः। कचं व्यासार्द्धं। कखं इष्टक्रांतिदृग्वृत्ते। कगं दक्षिणगोले नतांशाः। खजं इष्टक्रान्तिज्या। छगं नतांशज्या। खथं इष्टाक्षज्या। इयं साध्यास्ति। चगं त्रिज्या। अस्यां जझं लम्बोस्ति। अस्मिन् खथं लंबो भवति। चगछत्रिभुजं। जझचत्रिभुजं। खयजत्रिभुजं। एतानि त्रिभुजानि सजातीयानि सन्ति। अक्षज्याभुजः। खमध्यात् दृग्वृत्ते इष्टाक्षज्यातुल्यं नतांशखण्डकर्णः। याम्योत्तरवृत्तान्नाडी वृत्तखण्डं कोटिः। इदमेकं।

अथ द्वितीयं। नाडीवृत्तात्¹ क्रान्तिज्या भुजः। नाडीवृत्तखंडं कोटिः इष्ट क्रान्तिज्या कर्णः। इमे सजातीये। अत्र क्रान्तिज्याक्षज्ययोर्निष्पत्तिः। सैवेष्टक्रान्तिज्येष्टाक्षज्ययोर्निष्पत्तिर्भविष्यति। तस्मादक्षज्या क्रान्तिज्यया भाज्या फलं गुणसंज्ञं भवति। तेनेष्टक्रान्तिज्या गुणिता इष्टाक्षज्या भवति। दक्षिणगोले इष्टक्रान्तिज्येष्टाक्षज्ययोर्योगेन उत्तरगोलेंतरेण नतांशा भवन्ति। तत्रेष्टक्रान्तिज्या अज्ञातास्ति। अस्याः प्रमाणं या १।

अथ चापांतरज्यानयनप्रकारेणेष्टाक्षज्या दक्षिणगोले साध्यते। तत्र पूर्वो-

(घ) १. वृत्तात्क्रांति for (वृत्ताक्रांति)

क्तक्षेत्रे गचं ६० कर्णे। चछं उन्नत ज्या लभ्यते तदा यावत्तावता किमिति लब्धं जयं। या० उ० १ त्रि० १ इदं गुणगुणितयावद्रूपखथरेखा तुल्यझयरेखायुतं जातं, जझरेखा प्रमाणं या० उ० १ या० त्रि० गु त्रि० १ अथास्या: वर्ग: याव० उन्न० व० १ या० व० उ० त्रि० गु० २ (याव० उन्न० व० १ या व उ० त्रि० गु० २ या० व० त्रि० व० गु० २१ त्रिव १) प्रकारांतरेण जझवर्ग: साध्यते। यदि गचत्रिज्यावर्गेण गछरूपनतज्या वर्गो लिभ्यते[2] तदा जचरूपेष्टक्रान्तिकोटिज्यावर्गेण किमिति लब्धं; जझ वर्ग: याव०[3] न० व० त्रिव १ त्रि० १ एतौ जझवर्गौ समौ। अत्रोपरि तनपक्षे उन्नतज्यावर्गस्य स्वरूपं इदं नव १ त्रिव १ एतौ त्रिज्या वर्गापवर्त्तितौ जातौ पक्षौ यावगुव १ याव १ यावउगु १ नव १ ३० अत्र उपरितन अव्यक्तपक्षे गुणत्रिंशां-शेत्यादिना हर उत्पन्नः, तेन रूपे शेषे भक्ते फलमूलं यावत्तावन्मानं इष्टापम-ज्या भवतीत्युपपन्नं। पुनरियं इष्टापमज्या गुणगुणिता सतीष्टाक्षज्या भवती-ति पूर्वं प्रतिपादितमेव। इष्टाक्षज्याक्षवर्गांतरपदं तु लंबज्याग्रे भवति, अपेक्षितं त्रिज्याग्रे, तदर्थमनुपात: लंबज्याग्रे, इदं तदा त्रिज्याग्रे किमिति फलचापं ना-डीवृत्तदृग्वृत्तसंपातादायनवृत्तपर्यंतं नाडीवृत्तखंडं भवति। इदं तु इष्टाक्षांश-ज्याग्रेऽस्ति। नतांशज्याग्रेकरणार्थं पुनरनुपात:। इष्टाक्षज्याग्रे इदं तथा नतांश-ज्याग्रे किमिति लब्धं भसदृशवृत्तखंडस्य बिम्बादायनवृत्तपर्यंतं स्थितस्य ज्यारूपं भवति। पुनरहोरात्रवृत्तेऽस्य चापकरणार्थमनुपात:। द्युज्याप्रमाणेनेदं तदा त्रिज्याप्रमाणेन किमिति फलस्य चापं नतकालो भवतीत्युपपन्नं। गुणत्रि-शांशेति–उत्तरगोले चापैक्यज्या प्रकारेणोपपत्तिर्ज्ञेया श्री महाराजाधिराज-महाराजजयसिंहदेवकृतमक्षज्याक्रान्ति ज्याज्ञाने सति नतांशेभ्यो नतकालान-

---

(च) १. लभ्यते for (लिभ्यते)

२. या० व० त्रि० व१ गु० व१ त्रि० व० १ for (याव० उन्न० व० १ या० व उ० त्रि० गु० २ या० व० त्रि० वगु० २१ त्रि व१)

३. याव० न० व० १ न० व० त्रिव० त्रि० व१ for (याव० न० व० त्रि० व० १ त्रिव१)

यनं । छ । अत्र प्रकारांतरेणाक्षांशक्रान्त्यंश ज्ञाने नतांशेभ्यो नतकालानयनमाह—नतांशानामक्षांशानां च योगः कार्यः। एकत्रांतरं च कार्यं । योगांतरयोर्ज्ये कार्ये । ज्ययोर्योगार्द्धं प्रथमसंज्ञं । ज्ययोरंतरार्द्धं[1] द्वितीयसंज्ञं दक्षिणगोले द्वितीयेन क्रान्तिज्ययोर्योगः कार्यः उत्तरगोलेंतरं कार्यं तत्तृतीयसंज्ञं भवति । तृतीयेन नतज्यागुणं प्रथमेन भक्तं फलं भुजो भवति । भुजवर्गनतांश ज्यावर्गांतरपदं त्रिज्यागुणं द्युज्याभक्तं फलचापं नतकालो भवति । अस्योपपत्त्यर्थं क्षेत्रं । कखगघं याम्योत्तरवृत्तं । छजं नतांशचापं । छकं अक्षांशचापं । कजं अंतरचापं कझं योगचापं । तजमंतरज्या । चझं योगज्याजलं ज्ययोर्योगः । जनं ज्यायोगार्द्धं प्रथमं । तनं ज्यांतरार्द्धं द्वितीयं । सवं दक्षिणगोलेक्रान्तिः। सथं तृतीयं । शयं उत्तर गोले क्रान्तिः । सथं तृतीयं । शयं उत्तरगोले क्रान्तिः । पयं तृतीयं । जमभं नतांशज्या द्विगुणा । छधं खमध्यसूत्रं । कगं नाडीवलयसूत्रं । यदि जनेन जमं लभ्यते तदा सथेन किमिति लब्धं समं भुजः । पुनर्यदि जनेन जमं लभ्यते तदा पयेन किमिति लब्धं सयं अयमेव भुजः । भुजनतांशज्या वर्गांतरपदं उन्नतवलये कोटिर्भवति । इयमहोरात्रवृत्तखंडस्यापि जीवा भवति, इयं यदा त्रिज्यया गुण्यते द्युज्यया भाज्यते तदा नतकालज्या भवति । अथवा[2] । दक्षिणगोले जभं भवति । उत्तर गोले रझं भवति । यदि जनेन जमं लभ्यते तदा जभेन किमिति लब्धं जसं । अथवा लंबज्यया त्रिज्या लभ्यते तदा

---

(घ) १. रन्तरार्द्ध for (रन्तरार्द्धं)
२. + दक्षिणगोले अन्तरज्याक्रांतिज्ययोरन्तरकार्यं । उत्तरगोले योगज्या क्रांतिज्ययोरन्तरं कार्यं +

जभेन किमिति लब्धं जसं । इद नतज्यायां शोध्यं भुजो भवति । भुजवर्ग नत-ज्या वर्गांतरपदं आयनवृत्ताद् बिंबपर्यंतं द्युरात्रवृत्तखंडस्य जीवारूपं भवति। परं त्विदं द्युज्याप्रमाणे नास्ति, त्रिज्याप्रमाणेन करणार्थमनुपातः । द्युज्या प्रमाणे-नेदं तदा त्रिज्याप्रमाणेन किमिति फलस्य चापं नतकालो भवतीत्युपपन्नं । अथवा । उन्नतांशज्या भुजकोटिज्यागुणा त्रिज्या भक्ता फलस्य चापं नवतौ शो-ध्यं, शेषस्य ज्या भुजकोटिज्या गुणाद्युज्या भक्ता फलस्य चापं नतकालो भवति।

अथ भुजज्ञानमपि दिगंशज्ञानेन भवति तद्यथा त्रिज्यया द्युज्या लभ्यते तदा नतज्यया किमिति फलं भुजो भवति। अथवाऽग्रा शंकुतलसंस्कारादपि भुजो भवति इत्यलं पल्लवितेन ।

इत्यक्षज्या क्रान्तिज्याज्ञाने नतांशेभ्यो नतकालानयनम् ।

**अथ विषुवांशस्पष्टक्रान्त्योर्ज्ञाने शरानयनमाह—**

**ग्रहस्य विषुवांशेभ्यः साध्याः क्रांतिर्द्वितीयका ।**
**अस्या उदग्दक्षिणत्वं विषुवद्भागगोलतः ।।१।।**
**स्पष्टापमान्यापमयोर्दिगैक्ये वितरन्तयोः ।**
**दिग्भेदे च तयोर्योगः कार्यो यच्चात्र शेशकं ।।२।।**
**अस्य ज्या विषुवांशानां कोटिद्युज्यागुणा हृता ।**
**त्रिज्ययाप्तस्य यच्चापं पृशक्तः शेष दिग्भवेत् ।।३।।**
**अन्यक्रांतिर्यदा वा स्यात्स्पष्टक्रांत्यधिका तदा ।**
**शरस्य दिग्विलोमत्वं ज्ञेयं गोलविशारदैः ।।४।।**
**अथवा शेषकस्य ज्या विषुवांशज्यया गुणा ।**
**विहृतानयन[1]दृक्कर्म संस्कृतस्य ज्यया फलं ।।५।।**

अथ श्लोकानामर्थो लिख्यते । ग्रहस्य विषुवांशेभ्यः अन्यक्रान्तिः साध्या । क्रांतेरुदक्दक्षिणत्वं विषुवांशगोलवशात् ज्ञेयं । अन्यक्रान्तेः स्पष्टक्रान्तेश्च दिगैक्यें-तरं दिग्भेदे योगः कार्यः । शेषं विषुवांशकोटि द्युज्यागुणं त्रिज्याभक्तं फलचापं


(घ) १. विहृतायन for (विहृतानयन)

शरो भवति । शरदिक्शेषवशात् ज्ञेया । अन्यक्रान्तिः स्पष्टक्रान्त्यधिका चेत्तदा-शरो विपरीतदिग्ज्ञेयः । अथवा शेषस्य ज्याविषुवांशज्यागुणाऽऽयनदृक्कर्म संस्कृतस्य ज्यया भक्ता फलस्य चापं वा शरो भवति । अस्योपपत्तिज्ञानार्थं एकत्रिंशतमं क्षेत्रं । कखगघं कदंबवृत्तमायनदृक्कर्म संस्कृतस्य सत्रिभस्य । हं आयनदृक्कर्मसंस्कृतः । तदेवकृत् वृत्तस्पष्टकेंद्रं भवति । कगं नाडीवलयं । खघं क्रान्ति वृत्तं । तं बिंबस्थानं । धं ध्रुवः । दं कदंबः । सं गोलसंधिः । धतहमं बिबीयध्रुव-वृत्तं । दतवं कदंबवृत्तं । वं ध्रुवकः । वतं शरः । तमं स्पष्टक्रान्तिरुत्तरगोले । मसं विषुवांशाः । महं विषुवांशान्यक्रान्तिः । हतं स्पष्टः शरः गघं सत्रिभायनदृक्कर्मसंस्कृतस्य अन्यक्रान्तिः ।

अथवा सत्रिभविषुवांशद्युज्या । अथानुपातः । यदि हृथेन ६० पथं लभ्यते तदा हृतेन किमिति लब्धं वतं शरः अयमेवास्माकमभीष्ट इति विषुवांश स्पष्टक्रान्त्योर्ज्ञानि शरानयनं ।

**अथाकाश गोलानां भूगोलस्य स्वरूपमुच्यते—**

तत्र तावद्ग्रहाकाशा गोलरूपाः सन्ति । आकाशानां गतिरपि गोलरूपास्ति । भूरपि गोलरूपास्ति । इयं भूराकाशमध्यगा वृत्तमध्यस्थकेन्द्रमिवास्ति । पुनरियं नक्षत्र कक्षापेक्षया चिह्नमिव भाति । मध्यान्न प्रचलति स्थिरैवास्ति । आकाशानां सरला गतिः, तिर्यग्गतिश्चक्राकारा गतिश्च ज्ञेया । अक्षांशानां न्यूनाधिक्येन तिर्य-




(घ) १. वृत्तस्य पृष्ठकेन्द्रं for (वृत्तस्पष्टकेन्द्रं)

२. + सत्रिभविषुवांशाद्यक्रांतिः कदम्बवृत्तः । धथं +

गतेर्बहवः प्रकारा भवन्ति तेपि ज्ञेयाः । ततः सूर्यगतेर्निश्चयः कार्यः । ततश्चन्द्रस्य गतेर्निश्चयः कार्यः । ततः सूर्याचन्द्रमसोर्गत्युत्पन्नग्रहणादीनां निश्चयः कार्यः । क्वचित्क्रमः आवश्यकोस्ति, क्वचिदुपयुक्तोस्ति । अयं क्रमः स्वकृतवेधेन प्राचीनाचार्यकृतवेधेन च रेखागणितेन च निश्चितोस्ति ।

अथाकाशगोलरूपागतयश्च गोलरूपाः संतीति प्रतिपाद्यते । पूर्वाचार्यैः प्रकाशवन्ति बिंबानि दृष्टानि, तानि पूर्वस्यां दिश्युदयं प्राप्य शनैः शनैरून्नतानि भूत्वा परमोन्नतत्वं प्राप्नुवन्ति । ततः शनैः शनैर्नतानि भूत्वा पश्चिमस्यां दिश्यस्तं प्रयान्ति । ततः कंचित्कालमदर्शनं प्राप्य पुनः पूर्वस्यां दिश्युदयन्ति । यानि भानि नाडीवलयाद्यावतान्तरेणोत्तरस्थानि तेषां यद्दिनमानं रात्रिमानं च यद्भवति नाडीवलयात्तावतान्तरेण दक्षिणतः स्थितानां दिनमानं रात्रिमानं च तद्वचत्ययाद् भवति । तेषां अत्रापि तुल्यैव भवति ।

अथ च ध्रुवसमीपस्थानां भानां अस्तोनभ[1] भवति । एतानि कस्यचिच्चिह्नस्य परितः समानान्तराणि भवन्ति । तच्चिह्नं ध्रुवत्वेन निश्चितं । ध्रुवसमीपस्थानामहोरात्रवृत्तानि अल्पप्रमाणानि भवन्ति । ध्रुवा दूरस्थानां महत्परिमाणानि भवन्ति । येषां ध्रुवान्महदन्तरमस्ति तेषां उदयोस्तश्च भवति । दिनमानं महद् भवति रात्रिमानमल्पं भवति । यथा यथैषां महदन्तरं स्यात्तथा तथा होरात्रवृत्तानि वृहत्परिमाणानि भवन्ति । रात्रिमानं वर्धिष्णु भवति, दिनमानं क्षीयमाणं भवति । एवमग्रे सर्वेभ्योधिकमहोरात्रवृत्तं भवति । तत्र दिनमानं रात्रिमानं च समानं भवति । मतो यदाऽधिकमन्तरं यथा यथा भवति तथा तथाहोरात्रवृत्तानि लघूनि भवन्ति । रात्रिमानमधिकं वर्धिष्णु च भवति, दिनमानमल्पं क्षयिष्णु च भवति । एवं पूर्वक्रमाद्विपरीतं भवति । एतै प्रकारैराकाशगोलरूपास्तेषां गतिरपि गोलरूपास्तीति निश्चितं । यैर्नदीजलप्रवाहवन्नक्षत्राणां पश्चिमगमनमंगीकृतं, तेषां बुद्धिशून्यानां मतं समीचीनं न भवति । कुतः । अस्तंगतस्यैव पुनरुदयदर्शनात् । यदि तानि पश्चिमस्यां सरलगत्यैव गच्छन्ति तदातिदूरगतानां

(प) १. १. न for (नभ)

बिम्बाल्पत्वं स्यात् । तत्तु न भवति । किन्तु अस्तमये महद्विम्बमेव दृश्यते । अस्तन्तु च बिम्बचतुर्थांशो मग्नः बिंबार्द्धं मग्नं पादोनं बिंबमग्निमिति[1] प्रतीयते अल्पं भूत्वा दर्शनं यातीत[2] न प्रतीयते ।

**अथ चान्यैरप्यल्पबुद्धिभिरेवमुच्यते—**

भूमेरुत्थितो धूमोग्निगोलं प्राप्य प्रकाशवान् भवति । तदा किंचिदुदितमिति प्रतीयते । स प्रकाशः ज्वलन् पश्चिमदिशं समागत्य नाश प्रयाति । तदा अस्तोजात इति प्रतीयते । इति यदुक्तं तदपि बाधितमेव । कुतः । तत्स्थानात्पश्चिमस्थानां तत्प्रकाशदर्शनात् । यदि स धूमो नष्टः तदा पश्चिमस्थानां दर्शनं स्यात् । मतद्वयाश्रिताः ध्रुवासन्नतारकाणां सदोदितानां संस्थां विलोक्य किं वदन्तीति न विद्मः । यदि च ग्रहर्क्षाश्रिताकाशाः गोलरूपा न स्युस्तर्हि उदयादस्तपर्यंतं ग्रहर्क्षाणां बिंबस्य दर्शनं एकरूपं न स्यात्, दर्शनं तु एकरूपं भवति । अतस्तेषामाकाशागोलरूपा भवन्तीति ज्ञायते । क्षितिजासन्नबिंबं यद्वृद्धद्दृस्यते तत्रेदं कारणम् । तत्र क्षितिप्रदेशे जलबाष्पा बहवः संन्ति, तैराच्छिन्नं बिंबं जलान्तर्गतवस्तुवत्प्रतिनेत्रादर्शवच्च महत् दृश्यते । तत्रापि यादृशजलमधिकं स्यात्तादृशं वृहत् दृश्यते ।

अथ च यैर्गोलयन्त्रादिपदार्थैर्वेधः कृतस्ते पदार्था गोलरूपा एव तस्मादपि च ज्ञायते । आकाशा गोलरूपा एव नोचेत्तर्हि गोलादिना तेषां गतयो मिलिता न भवेयुः, तस्माद्गोलरूपा आकाशा एवेति निश्चितं ।

अथात्र तावद्भूमेर्गोलरूपत्वं प्रतिपाद्यते, तत्र पूर्वाश्रितानां क्षितिजानामुपरिग्रहर्क्षबिंबदर्शनमुत्तरोत्तरकालेन जायते । अस्तक्षितिजे च स्वस्वदेशान्तरमितकालेन बिंबादर्शनं भवति । ततः प्रतीयते इयं भूर्गोलरूपास्ति । यदि कचोलोदरसन्निभा स्यात् । तदा भूमध्यस्थानां महता कालेनोदयाद् बिंबदर्शनं स्यात् । पश्चिमस्थानां पूर्वमेव स्यात् । यदि च मुकुरतलनिभा समा चक्राकारा भूरपि[3]

(ग) १. मग्न for (मग्नि) २. यातीति for (यातीत)
३. भूरस्ति for (भूरपि)

तर्हि सर्वेषां भस्थानां युगपदेव बिम्बदर्शनं स्यात् । तच्चैवं न संभवति तस्मात्पूर्वो-क्ताद् ग्रहबिम्बदर्शनादर्शनविचारेण भूर्गोलरूपास्तीति फलितं । ननु चैवं पूर्वपश्चिम-स्थानामुपपन्नं भूमेर्गोलरूपत्वं उच्यते । याम्योत्तरप्रदेशस्थानां केन प्रकारेण दर्शना-दर्शनेन गोलरूपत्वं भूमेः प्रतिपादितं । तत्र भूरस्ति स्वस्थानादुत्तरतः गमन-शीलस्य पुंसः भचक्रस्यौन्नत्यं ध्रुवाश्विनानां तारकाणां च सदोदित्वं भवति । तस्मादपि च ज्ञायते याम्योत्तरेणापि भूर्गोलरूपास्ति ।

अथ भूः खमध्ये वृत्तमध्यस्थ केन्द्रमिवास्तीति प्रतिपाद्यते, तत्र यदि खमध्ये भूः ध्रुवसूत्र केन्द्रे न स्यात् । उपरि चाधोभागेस्ति । तदा निरिक्षक्षितिजे दिनरात्रिसमत्वं न स्यात् । कुतः । निरक्षक्षितिजं नाडीवलयाहोरात्रवृत्तानां समानानि खण्डानि न करिष्यति ।

अथ च । निरक्षादन्यत्रदेशे यदा रविर्नाडीवृत्ते समायाति तदा दिनराञ्योः साम्यं न स्यात् । अन्यस्मिन्नहो रात्रवृत्ते रविप्रवेशेन दिनरात्रसाम्यं स्यात्, तन्न भवति । सर्वदेशेषु नाडीमण्डल प्रविष्टे रवौ दिनरात्र्योः साम्यं भवतीति दृष्टं । तस्मात् ध्रुवसूत्रादूर्ध्वाधरस्था भूर्नास्ति । यदि ध्रवसूत्रात्पूर्वाऽपरविभागे भूरस्ति । तदा उदयेस्ते बिंबस्य एकरूपं दर्शनं न स्यात् । अयमभिप्रायः । यद्भू ध्रुवसूत्राद्भूः पूर्वतस्तिष्टति तदा उदये बिंबं महत् दृष्टं स्यात्, अस्तेऽल्पं दृष्टं स्यात् । यदा पश्चिमस्था भूस्तदोदये बिंबमल्पं दृष्टं स्यादस्ते महद्बिंबं दृष्टं स्यात् । अन्यत्र । पूर्वापरकपाले नतांशसाम्ये नतकाल साम्यं न स्यात् । दिनार्द्धसाम्यं च न स्यात् । तस्मात् भूकेन्द्रं ध्रुवसूत्र एव तिष्ठति । ध्रुवसूत्रार्द्धप्रदेशाद्यदि भूर्दक्षिणो-त्तरस्थास्ति तदा निरक्षक्षितिजमाकाशगोलस्य समानं भागद्वयं करिष्यति । साक्षक्षितिजं विभागद्वयं न करिष्यति । तत्रायमभिप्रायः । यदा भूरुत्तरतो भवति तदोपरितनमाकाशगोल खण्डमल्पं स्यात् । यदा दक्षिणतो भवति तदोपरितनं खण्डं महद् भवति । अधस्तनमल्पं भवति । इयं व्यक्षादुत्तरस्थानां स्थितिः । व्यक्षा-द्दक्षिणस्थानां तूक्तवैपरीत्येन भवति । अन्यच्च नाडीवलयस्य साक्षक्षितिजसमानं खण्डद्वयं न करिष्यति । अन्यच्च उत्तरस्थाहोरात्र वृत्तस्यदिनखण्ड रात्रिखण्डं

(घ) १. अन्यच्च for (अन्यत्र)

च तत्तुल्यदक्षिणस्थाहोरात्रवृत्तस्य रात्रिखण्डेन दिनखण्डेन च साक्षदेशे समानं न स्यात्। समानता तु दृष्टास्ति। अन्यच्च। विषुवद्दिने शंकुछाया रवेरुदयेस्ते च पूर्वापरसूत्रे न पतिष्यति। तद्दिने पूर्वापरसूत्रे प्रत्यक्षं पतिता दृष्टास्ति। तस्माद् भूमिः ध्रुवसूत्रार्द्ध एव तिष्ठति, तत्केन्द्रं सर्वग्रहाकाशगोलानां केन्द्रमस्ति।

अथ ग्रहकाशगोलेषु भूमिश्चिह्नरूपास्तीति प्रतिपाद्यते। कुतः सर्वदेशेषु एककाले वेधेन बिंबप्रमाणकलानां समत्वात्। एकदेशे अनेककालवेधेनापि बिंब-प्रमाणकलानां समत्वात्। अन्यच्च। यदि भूर्महत्प्रमाणा स्यात् तदा खमध्यात् भूप्टष्ठस्थानां निकटे स्यात्। क्षितिजं दूरे स्यात्। क्षितिजे बिंबप्रमाणमपि दृष्टं स्यात्। खमध्ये बिंबप्रमाणं महद्दृष्टं स्यात्तादृशं तु न दृश्यते। एकरूपप्रमाणं बिंबं दृश्यते। अन्यच्च, भूपृष्ठे या शंकुछाया भवति, गणितेनापि सैवायाति। किंचिदप्यंतरं नायाति। अन्यच्च वेधार्थं कृतानां धात्वादिगोलयन्त्राणां केन्द्राणि भूमिपृष्ठे भवन्ति, अपेक्षितं तु भूकेन्द्रे। गोलादियन्त्रकेन्द्रं तु भूकेन्द्राद् दूरेऽस्ति। भूपृष्ठस्थैर्गोलादियन्त्रैः सम्यक् निष्पादितैर्वेधो यदा क्रियते भूकेन्द्राभिप्रायेण ग्रहध्रुवकशरक्रान्त्यादिसर्वं [निरन्तरं मिलति। एतैः प्रकारैर्ग्रहगोलाकाशापेक्षया भूरल्पप्रमाणास्तीति निश्चितं।

अथ भूराकाशगोलमध्यात् न चलति। किन्तु निश्चलास्ति। यदि भू-र्मध्याच्चलिता भवेत्तदा पूर्वोक्तान्येव दूषणानि समायान्ति। यानि गुरुणि वस्तूनि तान्याकाशगोलकेन्द्राभिमुखमेव प्रयान्ति। यदि भूरावरणं न स्यात्तदा गुरु वस्तु आकाशकेन्द्रगतमेव स्यात्। पृथ्वी सर्ववस्तुभ्योतिगुर्व्यस्ति। अस्याः केन्द्रं आकाश केन्द्रे मिलितमस्ति। तेन पृथिव्या आकाशगोलः सर्वतः समानान्तरश्चास्ति। अनेनेयं भूरतिभाराक्रान्ता कथं निश्चला तिष्ठतीति भ्रान्तिरपास्ता।

अथ केचिद्वदन्ति भूरधो याति, तन्न। यदि भूरधोधो याति। तदाकाश-क्षिप्तं वस्तु भूसंलग्नं न स्यात्।

अथ च। केचिदेवं वदन्ति भूरेव नाक्षत्राहोरात्रेण परिभ्रमणं करोति।

---

(घ) १. निश्गला for (निश्चला)

तेनैव ग्रहर्क्षाणामुदयास्तादिकं भवति । नत्वाकाशचलनेनेति । तन्न यदि भूः पूर्वतो याति तदा शरपक्ष्यादीनां पूर्वगमनं न स्यात् । अपि तु पूर्वं क्षिप्तानां शरपाषाणादीनां पश्चिमगमनमेव प्रतीयेत । पुनः । शरादीनां वेगस्य असुमात्रकालेन कोशमात्रं गच्छंत्या भूमेर्वेगाल्पत्वात् । यदि भूसंलग्नो वायुरपि पूर्वतो याति । तेनाकृष्टं पूर्वदिशि क्षिप्तं शरादिकं पूर्वतो यातीति चेत्, तदा केषामपि पश्चिमगमनं न स्यात् । कुतः सन्मुखागतं वायुं निर्भिद्य गंतुमशक्यत्वात् । तस्मात् पृथ्वी निश्चलास्तीति निश्चितं ।

अथाकाशस्य द्विविधागतिरस्तीति पाद्यते । आकाशस्यैकाऽहोत्रगतिः पूर्वतः[1] पश्चिमपर्यंतमस्ति । अनया गत्या यस्य कस्यचिद्[2] बिंबादिचिह्नस्याहोरात्रवृत्तं स्यात् । एवमनेकान्यहोरात्रवृत्तानि स्युः । एतेषां ध्रुवद्वयं निश्चलं तत्प्रसिद्धमेवास्ति । यत्सर्वेभ्योऽहोरात्रवृत्तेभ्यो महत् द्वयोर्ध्रुवयोः समानान्तरं वृत्तं तन्नाडीवलयसंज्ञमस्ति । आकाशस्य पश्चिमगतिः प्रकाशमद्ग्रहबिंबानामुदयास्तादिना निश्चितास्ति । द्वितीया गतिरेतद्विपरीता पश्चिमतः पूर्वपर्यंतमस्ति । पूर्वगमनशीला नामाकाशगोलानां ध्रुवौ भिन्नौ स्तः । ध्रुवद्वयमध्यवर्तिवृत्तमपि प्रत्येकं भिन्नमेवास्ति । इयं पूर्वगतिः कथं ज्ञाता इति चेत् । सप्तग्रहाणां नक्षत्रचारेणोपलक्षिता । अन्यदपि एते ग्रहा नाडीवलयात्कदाचिदुत्तरस्थाः कदाचिद्दक्षिणस्थाः कदाचिन्नाडीवलय एव भवन्ति, तेन ज्ञातं । एतेषां मध्यवृत्तानि भिन्नानि ध्रुवाश्च भिन्ना इति ।

अथ यस्मिन् वृत्ते रविर्भ्रमति । तद्वृत्तं क्रान्तिवृत्तसंज्ञं । तन्नाडीवलयेद्वांतरितस्थानद्वये संलग्नमस्ति । तत् ध्रुवौ कदम्बसंज्ञकौ स्तः । यावदेव नाडीवृत्तक्रान्तिवृत्तयोः परममन्तरं परमक्रान्तिसंज्ञमस्ति । तावदेव ध्रुवकदम्बयोरन्तरमस्ति ।

अथ चन्द्रादयो ग्रहाः कदाचित् क्रान्तिवृत्तादुत्तरतः कदाचिद्दक्षिणतो दृष्टाः । अतस्तेषां वृत्तानि ध्रुवाश्च क्रान्तिवृत्तकदम्वाभ्यां भिन्नाः संतीति ज्ञातं ।

---

(घ) १. 'पूर्वतः, लुप्त २. कस्यकिद्बिंवादि for (कस्यचिद्बिंबादि)

अयंकं वृत्तं ध्रुवद्वयकदम्बद्वयोपरिगतं क्रान्तिवृत्तनाडीवृत्तसंपातात्त्रिभान्तरे क्रान्तिवृत्तनाडीवृत्तलग्न परमक्रान्त्युपरिगतं तदायनवृत्तं ज्ञेयं।

अथ क्रान्तिवृत्तस्यायनवृत्तसंपातेन नाडीवृत्तसंपातेन च चिह्नचतुष्टयाच्चत्वारि पदानि जातानि। नाडीवृत्तक्रान्तिवृत्तसंपाते उत्तरगोलादौ मेषादि चिह्नं ज्ञेयं दक्षिणायनादौ कर्कादिचिह्नं ज्ञेयं। एकैकस्मिन्पदे राशित्रयमस्तीति ज्ञेयं। एवं सर्वस्मिन् क्रान्तिवृत्ते द्वादशराशयो ज्ञेयाः।

अथ पश्चिमगमनरूपा प्रथमगतिः। सर्वानाकाशगोलान् पश्चिमतो भ्रमयति। सर्वगोलानां ध्रुवान् च ध्रुवस्यासमं ततो भ्रामयति। क्रान्तिवृत्तमायनवृत्तं च भ्रमयति।

अथ यद्वृत्तं अहोरात्रवृत्तानां दिनखण्डस्य च समानं भागद्वयं करोति। तद्याम्योत्तरवृत्तं ज्ञेयं। यथा। अयनवृत्तं नाडीवृत्तेस्ति। तथा याम्योत्तरवृत्तमप्यस्ति। इदं याम्योत्तरवृत्तं कदम्बोपरिगतं भवति। यदायनवृत्तं अहोरात्रेण वारद्वयं याम्योत्तरवृत्ते समायाति तदा याम्योत्तरवृत्तं कदम्बगतं भवति।

अथ द्वितीयगतिस्तुनवमगोलाधः स्थितेषु सर्वगोलेषु प्राप्तास्ति। श्री महागणपतये नमः। पुष्पवतोर्ग्रहणे उदयास्तयोर्ग्रह स्पष्टीकरणे चांतरं दृष्टं तदा यन्त्ररचना कृता। इंद्रप्रस्थे अवन्त्यां तथा काश्यां मथुरायां सवाईजयपुरे च सर्वत्र यंत्ररचना कृता। पूर्वं प्राचीनमिजस्तिकर्त्रा मतलमजूषेन यन्त्रैर्ग्रहनक्षत्रवेधं कृत्वा निश्चयः कृतः। तदनन्तरं समरकंदनगरे उलूकवेगनाम्ना यन्त्रैर्ग्रहनक्षत्रवेधं कृत्वा निश्चयः कृतः। ततो वर्षशतत्रयानन्तरं श्री महाराजाधिराज जयसिंह प्रभुवर्याणामाज्ञया यन्त्ररचना जाता। पूर्वं यवनैर्जातुल् हलकं नाम गोलापरपर्याय धातुमयं यन्त्रं कृत्वा वेधः कृतः। तत्रायं दोषः यद्धातूनामतिभारतया क्रान्तिवृत्तं कदम्बस्थानान्नमति। तस्य नम्रतया वेधे त्रिंशत्कलात्मिका अशुद्धता भवति, एवं दृष्टं तदा श्रीमहाराजाधिराजजयसिंहदेवैर्नवीनया युक्त्या जयप्रकाशयन्त्रं कृतं,

(घ) १. +एवंद्वितीयसंपाते दक्षिणगोलादौ तुलादिचिह्नं ज्ञेयं। आयनवृत्तक्रान्तिवृत्तसंपाते मकरादिचिह्नं ज्ञेयं+

अस्य कर्तव्यता यन्त्राध्याये द्रष्टव्या । गोलयन्त्रेण यत्कार्यं सिध्यति तदनेनापि सिध्यति। इदं यन्त्रं स्थिरमस्ति । अस्मिन्नशुद्धता ग्रहाणां न भवति । यावन्मितः स्पष्टखेट आकाशे भवति स एव जयप्रकाशयन्त्रेण शुद्ध आयाति इति वेधेन ज्ञात । गणितं कृत्वा दृश्यते चेदन्तरं पतति । अस्मिन् जयप्रकाशे यथास्थितः स्पष्ट आयाति । अन्यच्च । यन्त्रराजात्समयज्ञानं वायनदृक्कर्मग्रहज्ञानं भवति । स यन्त्रराजो महान् भवितुं नार्हति यतस्तत्र वृत्तानिष्पादनार्थं महती यष्टिः कृता चेत्, सा नमति वृत्तं शुद्धं न भवति तेन वेधेन ध्रुवकः शुद्धो नायाति ।

अथ पुनर्यंत्रसम्राडाख्यं अर्द्धचन्द्रसदृशं अष्टादशकमंकारहस्तव्यासार्द्धमितं कृतमस्ति । तत्करणप्रकारो वेधप्रकारश्च यन्त्ररचनाध्याये द्रष्टव्यः । अनेनक्रान्तिज्ञानं नतघटिकाज्ञानं च भवति ।

अथ क्रान्तिनतघटीभ्यां ध्रुवकज्ञानं मुक्तमेवास्ति ।

अथ यवनैर्दिगंशोन्नतांशज्ञानार्थं जातुः शुकबतैनाख्यं यन्त्रमुक्तमस्ति । तस्य वेधपट्टी अतिमहती भवति । वेधपट्टी च महत्त्वान्नमति, तेन वेधः शुद्धो नायाति । नतांशेष्वन्तरं भवतीमं दोषं ज्ञात्वास्माभिर्दिगंशोन्नतांशज्ञानार्थं रामयन्त्र स्थिरं कल्पितमस्ति । अस्मिन्यन्त्रे यथास्थितं दिगंशोन्नतांशज्ञानं भवति । रामयन्त्रद्वयं कार्यं। तस्मिन्वेधार्थं यावदंशमिता वीथी स्थाप्या भवति, तावती स्थापनीया । यावान्वीथी विस्तारस्तत्तुल्या पट्टी चूर्णेन पाषाणेन वा कार्या । एवमेव द्वितीयरामयन्त्रमपि कार्यं। परन्तु प्रथमरामयन्त्रे यत्र पट्टीकृता द्वितीयरामयन्त्रे तत्र वीथी स्थाप्या । यदा वेधं कर्तुमपेक्षा भवति तदैव वेधः कार्यः । एकस्मिन् रामयंत्रे वेधावरोधश्चेत् द्वितीययन्त्रवीथीषु ग्रहर्क्षादिकं वेध्यं, ईदृशः प्रकारः कृतः येनाशुद्धता न भवति । अनया रीत्या सर्वत्र यन्त्रैर्वेधः कारितः, सूर्यस्य निश्चयः कृतः । इन्द्रप्रस्थे सवाई जयपुरे च नित्योद्भवा मध्यनतांशा विद्धाः । मेषासन्नराशिमीनवृषकन्यातुलागतेषु भास्करेषु वेधत्रयं शुद्धं गृहीतं, तस्माद्वेधत्रयात्पूर्वोक्त प्राचीनप्रकारेणापि फलं मन्दकेन्द्रं मध्यमग्रहश्च निष्कासितः । स मध्यमः वेधितो[2] यवनग्रहान्नव ९ कलामितोधिक आगतः ।

---

(घ) १. +तच्चालनार्थं मनुष्यबाहुल्यं चलगतितदातिकष्टेन वेधो भवति सोपि यथासमये न भवति । +

२. वेधित for (वेधितो)

अथैतत्प्रतीत्यर्थं प्रातःसायंकालयोः नक्षत्रैः कृत्वा सूर्यस्यान्तरं यन्त्रसंम्राजा निश्चितं। तन्मेषादिराशिषु सर्वत्र सूर्यघटिका गणितेन यवनमतेन ताभ्यो-घटीभ्यो वेधितनक्षत्रोपरि रविघटिकाः पलद्वयं २ कदाचित्पलं १ अनयोर्योगार्द्धं १। सार्द्धं पलं । एतस्य कलाः ६ नवनिश्चिताः। तद्यदेंद्रप्रस्थे यस्मिन् दिने भ्रं जातं तस्मिन् दिने सवाई जयपुरे वेधो दृष्टः। सवाई जयपुरे यदा भ्रादिकं जातं तस्मिन् दिने इन्द्रप्रस्थे वेधः कृतः दृष्टश्च। एवमवंत्यां मथुरायां काश्यां च सर्वत्र निश्चयः कृतः। अभ्रस्यायं नियमो नास्ति यत्सर्वत्रैवाभ्रं भवतीति। काबिले वर्षाकाले भ्रं न भवति। पौषादिमासेषु अभ्रं भवति। तेनायं नियमो न[1]।[2] जयप्रकाशाद्वेधं कृत्वा साधयेत्।

अथांतरनिष्कासनं ग्रहाणां बहुकालसाध्यं वर्त्तते तेन वेधे आयाति, स एव ग्रहः फलदाने। अयनांशाः १९।४७ शके १६५२ वेधितग्रहेषु शोध्यास्तदा ते ग्रहानिरयना अवशिष्यंते[3]। अयनांशानां गतिस्तु सप्ततिभिर्वर्षैरेकोंशो निश्चितोस्ति। निरवयवानां जातकादिके फलं ग्राह्यं।

अथ यदि कश्चित्पूर्वपक्षं करोति यः ग्रहोस्तंगतस्तस्य वेधः कथं संभवति। तत्र मुख्यं तु अस्तंगतो ग्रहः निर्बलो जातस्तेनास्य फलं न्यूनमेवास्ति। अन्यच्च। यंत्रादिकेषु बहुकाले नास्तंगतग्रहस्यापि ज्ञानं भवति। गणितेनास्तं गत-ग्रहस्यापि ध्रुवकः साध्यो भवति। एवं प्रकारैर्ग्रहशोधने देशाधिपेन राज्ञा देशे देशे यंत्ररचनां कृत्वा निश्चयः कार्यः। अत्र यंत्रैः परमक्रान्तिनिश्चयः कृतः, क्रान्ति २३।२८ अन्योपि कश्चिदग्रे निश्चयं कर्तुमिच्छति चेत्तेनापि यंत्रैः क्रांत्यादीनां निश्चयः कार्यः। यतोस्य कालांतरेण व्यवस्था भिन्ना भिन्नास्ति। अन्यच्च। फिरंगदेशे। श्रीमहाराजाधिराजैर्महंमदशरीफनामा यवनः प्रेषितः स्थितःतेन महैलद्वीपे गत्वाऽक्षांशा ४।१२।। निश्चितास्ते दक्षिणाः दक्षिण देशे यत्राग्ने दक्षिणध्रुव उन्नतो दृष्टः, तत्रत्यानां तारकाणामाकृतिर्दृष्ट्वा शुद्धाः कृत्वा आनीताः।

---

१. नास्ति for (न)

२. + अथ यः कश्चिदिष्टग्रहान्साधयितुमिच्छति स +

३. 'अ' लुप्त

तेषां ध्रुवकाः शराः क्रांतिद्युवोवा देशदेशीया मध्यनतांशाश्च दृष्टाः। एकेन सूरतिदेशात् फिरंगदेशोद्भवा गोलाः समानीताः। तथा महूनदनेहुदेनाम यवन अग्रे द्वीपेषु प्रेषितः। एवं देशे देशे पूर्वदक्षिण पश्चिमोदक्दिशासु स्वैव निश्चयः कृतः। अग्रे पि यो राजा देशाधिपतिर्भविष्यति तेनाप्येवमेव[1] देशे देशे यंत्राणि कारयित्वा वेधेन निश्चयः कार्यः। तदा यो ग्रहः नक्षत्रं[2] च दाइशं देशे नायाति स एव प्रमाणं। कालभेदेन वाऽऽकाशगोलस्य गतावनेकरूपत्वादेर पतति तस्य निश्चयः कर्त्तव्यो यः कश्चित् ज्ञाता भवति (भविष्यति)[3] तेन। आकाशे ग्रहगतिरन्यथा सिद्धान्तेभ्योप्यन्यथा ज्ञाता भवति। यदार्षेष्वपि सूर्य-सिद्धान्तजा ग्रहा अन्यथा सूर्यसिद्धान्तजाश्चान्यथा ऽऽ यांति। तेनेदं ज्ञायते आकाशे एकरूपता नास्तीति। यद्याकाशे एकरूपता स्यात्तदा सर्वकाले सर्वसि-द्धांतेभ्यश्च ग्रहा अपि एकरूपा एव स्युरिति। एवं सत्यपि लोकव्यवहारार्थं प्राचीनोक्ता मध्यमक्रिया प्रोच्यते।

अथ च तेषु बीजं दत्वा फलसंस्कारेण यथा दृक्तुल्यतां यांति तथा ग्रहाः साधिताः ॥६॥ श्रीमहागणपतये नमः[4] ॥६॥

**अथ मध्यमाधिकारः—**

ब्राह्मं दिव्यं तथा पित्र्यं प्राजापत्यं गुरोस्तथा।
सौरं च सावनं चांद्रमार्क्षं मानानि वै नव ॥१॥
भूतानामंतकृत्कालः कालोन्यकलनात्मकः।
सद्विधास्थूल सूक्ष्मत्वात् मूर्त्तश्चामूर्त्त संज्ञकः ॥२॥
मूर्त्तः प्राणादिक स्त्र्युद्यादिकश्चामूर्त्त संज्ञकः।
षुरात्रवृत्ते तच्चक्रकला एवासवः स्मृताः ॥३॥
खेदुगुर्वक्षरोच्चारः श्वासकालो ह्यसुश्च तैः।
इत्थं नाक्षत्रमानं स्यात्प्रवाहानिलजभ्रमात् ॥४॥

---

(घ) १. तेनाप्येवमेवमेव for (तेनाप्येवमेव) २. सक्षत्रं for (नक्षत्रं)
३. '(भविष्यति)' लुप्त ४. 'श्री महागणपतये नमः' लुप्त

विकलानां कलाषष्ट्या तत्षष्ट्या भाग उच्यते ।
त्रिंशता भवेद्राशिर्भगणो[1] द्वादशैव ते ॥५॥
इत्थं भमण्डले क्षेत्रविभागास्तद्विदोदिताः ।
पूर्वक्रमादजादीनां तथा भानां च दस्रभात् ॥६॥
पलं षड्भिः सषड्भिस्तैर्घटी तत्षष्टि संख्यया ।
दिन तत्त्रिंशता मासो वर्षं द्वादशभिश्च तैः ॥७॥
पश्चिमभ्रमणाद्भानां ग्रहाणा प्रावकुजे बुधैः ।
उदयादुदयं वारः सावनाहः प्रकीर्तितः ॥८॥
भानां भ्रमसंज्ञः स्याद्ग्रहाणां सावनाह्वयः ।
तस्य सूर्यस्य[2] दिनसंज्ञोप्युदीरितः ॥९॥
सूर्यचन्द्रमसोर्योगो दर्शतः परिकीर्तितः ।
दर्शांतादग्रिमामांतं चान्द्रो मासः प्रकीर्तितः ।
एतत्पंत्रं द्यु रात्रं स्यात्सौरः सूर्यस्य संक्रमात् ॥१०॥
त्रिंशता दिवसैर्मासः सावनः परिकीर्तितः ।
षवह्निभिस्तथाभागैः सौरस्तिथिभिरैंदवं[3] ॥११॥
चक्रैकभोगात् सूर्यस्य सौरं वर्षं प्रकीर्तितं ।
देवानां दितिजानां च दिनरात्र विपर्ययात् ॥१२[4]॥
खांगाग्निभि द्यु रात्रैश्च दिव्यं वर्षं तयासुरं ।
गुरोर्मध्यैकराशेश्च भोगे संवत्सरं विदुः ॥१३[5]॥
लंकानिशीथ चलिताग्रहोच्चपातादयः सर्वे ।
नाडीभवृत्तयोगात्[6] दैवसृष्ट्यादिसमयोभूत् ॥१४[7]॥

---

(घ) १. भगणो for (भगणे)
२. + भूसंज्ञो +
३. रैन्दवः for (रैन्दवं)

नोट—यहाँ एक श्लोक १२ वां कटा हुआ है।

४. ॥१३॥ for (॥१२॥)
५. ॥१४॥ for (॥१३॥)
६. योगात्त for (योगात्)
७. ॥१५॥ for (॥१४॥)

कालेन येन योगः स एव यदि याति कल्पसृष्टिं तां ।
प्रवदन्ति पूर्वंऋषयः सिद्धांतार्थैकनिष्णाताः ॥[1]१५॥
भगणाः सर्वमानानि सौरचांद्रादिकानि च ।
येन संपूर्णतां यांति स कालः कल्पसंज्ञकः ॥[2]१६॥
सृष्टेः स कालः कमलोद्भवस्य निद्रात्ययाद्वेदनगाब्धितुल्यैः ।
शताहतैर्वर्षगणैश्च दिव्यैर्भवेत्ततोहर्गणखेटसिद्धिः ॥[3]१७॥
महायुग सहस्रेण कल्पस्तत्तु महायुगम् ।
चतुर्युगमितं तानि चतुर्लघुयुगानि च ॥[4]१८॥
कृताह्वयं तथा त्रेताह्वयं द्वापरसंज्ञकं ।
तथा कल्पाह्वयं ज्ञेयं धर्मांघ्रिह्रासतः क्रमात् ॥[5]१९॥
खाभ्राभ्ररदवेदैश्च कृताग्निकरभूगुणैः ।
रव्यब्दैश्च क्रमेणैते स्युः कृताद्यायुगांघ्रयः ॥[6]२०॥
कृतं १७६८००० त्रेता १२९६००० द्वापरं ८६४००० कलि ४३२००० एवां
स्वार्कांशकैस्तुल्यौ संध्या संध्यांशकौ सदा ।
आद्यंतयोर्युतौ तेषामयुतघ्नरदाब्धयः ॥[7]२१॥
[8]४३२०००० महायुगं मनुस्तैश्च युगैः वस्त्रद्रिमितैस्तथा ।
आदिमध्यावसानेषु कृताब्दैः १७२८००० संधयः स्मृताः ॥[9]२२॥
मनूनां तिथिसंख्याकास्तत्रावश्यं जलप्लवः ।
अर्काब्दैरिन्द्रसंख्याकमनुभिर्ब्राह्म एव सः ॥[10]२३॥
कल्पः प्रोक्तः फलार्थं तु कालविद्भिर्मुनीश्वरैः ।

---

(घ) १. ॥१६॥ for (॥१५॥) २. ॥१७॥ for (॥१६॥)
३. ॥१८॥ for (॥१७॥) ४. ॥१९॥ for (॥१८॥)
५. ॥२०॥ for (॥१९॥) ६. ॥२१॥ for (॥२०॥)
७. ॥२२॥ for (॥२१॥) ८. ४३२०००० for (४३२०००)
९. ॥२३॥ for (॥२२॥) १०. ॥२४॥ for (॥२३॥)

सप्तर्षिमुनुभिश्चैव[1] कोटिघ्नास्ते रदाब्धयः ।।२४।।[2]
४३२००००००० प्रवदन्ति दिनं ब्राह्ममहोरात्रं च तद्द्वयं ।
वर्षाहोरात्रसंख्या तु खांगाग्नि प्रमिताविधेः ।।२६।।[3]
भूस्थितानां च जीवानां न स्थिरांबरवासिना ।
अनीदृशं जगदिदं न कदापीति वाग्बलात् ।।२७।।[4]
तत्लये संशयो नैव कार्यो निगमवेदिभिः ।
भूमेरेव विभागास्ते भूर्भुवः स्वः सदोदिताः ।।२८।।[5]
व्यक्षाद्याम्ये तथा सौम्ये तथा मेरुरिति क्रमात् ।
तद्गतब्रह्मसृष्टेः स्याद्विलयस्तद्दिनांत्यजः ।।२९।।[6]
सर्वदैव महाकाले महर्लोकादि खेस्तिहि ।
मार्कंडेयपुराणादौ सच्छ्रीभागवतेपि च ।
स्वीयप्रमाणवचनान्यपि स्पष्टानि सन्ति वै ।।३१।।
सौरेतु सृष्टिवर्षोक्तौ ग्रहर्क्षस्रजनं कजं ।
उक्तं ते भस्थिरा सृष्टिः कथं युक्तेति चेच्छृणु ।।३२।।
जपपूजनहेतोस्ते निर्मिता देवतांशकाः ।
विधिना बिंबरूपा ये तद्भिन्नास्त्वव्ययाः सदा ।।३।।[7]
ब्राह्ममानमिदं प्रोक्तं तादृशाः कमलोद्भवाः ।
कालेस्मिन् बहवो जाता भविष्यन्ति सनातने ।।३४।।
आयुषोर्द्धं गतं तस्य वर्तमानस्य चाग्रिमात् ।
कल्पादितः प्रमाणार्कपूर्वशास्त्रानुसारतः ।।३५।।
स्वायंभुवो मनुः स्वारोचिषश्चोत्तमजस्तथा ।
तामसो रैवतस्तद्वच्चाक्षुषस्ते गतास्तु षट् ।।३६।।

(घ) १. मनुभिश्चैव for (मुनुभिश्चैव) २. ।।२५।। for (।।२४।।)
३. + परमायुः शतं तस्य तयाहोरात्रसंख्यया ।
दैनंदिनसुसृष्ट्यर्थमनिरुद्धार्कजो विधिः ।।२७।। +
४. ।।२८।। for (।।२७।।) ५. ।।२९।। for (।।२८।।)
६. ।।३०।। for (।।२९।।) ७. ।।३३।। for (।।३।।)

वैवस्वतो मनुश्चायं सप्तमोस्त्यधुना किल ।
इत्थं कादेश्च मनवः षड् व्यतायुगानि वै ॥३७॥
भमितानि तथा चांघ्रित्रयं तद्वत्कलेर्गताः ।
नन्दाद्रींदुगुणाः ३१७९ सौराश्चाब्दास्त्विवत्थं शकानने ॥३८॥
ससंधिसर्वयोगे स्युः सौराब्दाविधिवत्क्रतः[2] ।
गोद्रीन्द्वचडचब्धि नन्दाश्विशैलनन्देन्दु १९७२९४७१७९ संमिताः ॥३९॥
शकाब्दसहितास्ते तु वर्षारम्भे गताः समाः
खत्रयाब्ध्यतुं खात्यष्टि १७०६४००० हीनाः सृष्ट्यादितो गताः ॥४०॥
यतः सर्वग्रहादीनां सृष्ट्यादौ संयुतिः किल ।
मेषादौ मुनिभिः प्रोक्ता दिनादौ ब्राह्मणेन हि ॥४१॥
अनाद्यनंतकालेस्मिन् भचक्रं प्रवहभ्रमात् ।
शश्वद्भ्रमणसंयुक्तं प्रत्यक् चलति वायुना ॥४२॥
तदल्पगत्येन्द्रदिशं प्रचलन्ति नभश्चराः
महद्गतौ स्वल्पगतेर्भानं लोके न जायते ॥४३॥
तस्मात्पूर्वोदयश्चारतः प्रतीच्यां दृश्यते बुधैः[3] ।
पूर्वक्रमाद् ग्रहर्क्षाणां भोगं कुर्वन्ति खेचराः ॥४४॥
चन्द्रादयस्ततः पूर्वैः प्राग्गतिः परिकल्पिता ।
पादोनगाक्षधृतिभू ११८५८।४५। योजनैः सा समा मता ॥४५॥
लंकानिशीशे दिननाथवारे चैत्रे सितादौ ग्रहपातपूर्वं ।
ऋणायनादौ समयानुरोधान्मेषाश्विवक्त्रे प्रथमं बभूव ॥४६॥
सृष्ट्यादेः सृष्टिकल्पांतं भगणाः पूर्वयायिनां ।
रव्यादीनां निरग्रान्स्तान्प्रवदाम्यर्कशास्त्रतः ॥४७॥
कल्पेर्कशुक्रेंदुजपर्यया मता कोटिघ्ननेत्राग्निकृता ४३२०००००० स्त एव ।
प्रोक्ताः कुजार्कोज्यचलोच्चकानां भ्रमास्तु सूर्यादिमहर्षितन्त्रे ॥४८॥

---

(च) १. व्यतता for (व्यता)    २. वक्त्रतः: for (वत्क्रतः)
३. जनैः for (बुधैः)

षड्वह्निदेवेषु नगाद्रि पंच प्रोक्ताः सहस्रेण हता[1] कुजस्य ।

५७७५[2]३३६००० दन्ताष्टयद्[3]गोयमबाहवः स्युः कल्पे सहस्रेण हताः कुजस्य ॥४९॥

२२९६८३२००० रस्राभ्रसप्ताग्नि नवाद्रिभूमयो,

युता हता १७९३७०६०००० श्चांद्रिचलोच्चपर्ययाः ।

द्विबाहुवेदत्तुं गुणा ३६४२२०००० गुरोस्तथा,

युता हताः कल्पभवाश्च पर्ययाः ॥५०॥

खषट्कसप्ताग्नियम द्विस्वा[4]श्वाः शताहताः,

७०२२३७६ ००० शुक्र चलोच्चजाताः ।

खखाष्टषट्वं चरसा युगेश्वो दशाहताः १४६५६८००० सूर्यसूतस्य पर्ययाः ।५१।

गनाष्टरामा ३८७ मृदुतुंगपर्यया रवेश्च कल्पे शशिनोथ तुंगजाः ।

खराशून्या खि[5]गजाष्टवेदाः ४८८२०३००० शताहताः श्रीरविणा प्रयुक्ताः ।५२।

वेदाभ्रदस्राश्च २०४ गजत्तुं रामाः ३६८

ख शून्यरंध्राणि ९०० शराग्नि पंच ५३५ ।

नन्दाग्नयः ३९ कल्पमृदूच्चपर्यया कौजादिकानां रविणा निरूक्ताः ॥३५॥

चन्द्रस्य पातभगणाः खखखाष्टरामद्वि,

द्व्यग्निज्ञोचनमिता २३२२३८००० स्तु कुजस्य कल्पे ।

शक्राश्विनो २१४ थशशिजस्य गजाष्टवेदा

४८८ जीवस्य वेद नगचन्द्र १७४ मिता विलोमाः ॥५४॥

रामाभ्रनन्दा २०३ भृगुजस्य सौरेस्तथा द्विषट्[6]कर्मं ६६२ मितास्तु कल्पे ।

मानानि सौरेंदव सावमानि ब्रुवे तथार्क्षं रवितन्त्ररीत्या ॥५५॥

सूर्योदय द्वितयमध्यगतो हि कालस्तत्सूर्यं सावनदिनं कुदिनं च तत्स्यात् ।

अष्टाश्विनागत्रनगोद्रिनगेषु चन्द्रै १५७७९१७८२८

स्तुल्या भवन्ति धरणी दिवसास्तु कल्पे ॥५६॥

(घ) १. हताः for (हता) २. ५७७५३३३६००० for (५७७५३३६०००)
३. षड्गो for (यद्गो) ४. स्वाश्वाः for (स्वाश्वाः)
५. शून्याश्विगजाष्ठ for (शून्याखिगजाष्ट)
६. द्विषट्क for (द्विषट्कर्मं)

भानांग गजवाजि गुणाश्विदस्रा नागेषुरूपकमिता दिवसा
१५८२२३७८२८ विधोस्तु ।
खाष्टौ खरवाभ्र खगुणाभ्रनृपाः १६०३००००८० रवेश्च मासाः
खखाभ्रखयुगाष्ट कुपंच तुल्याः ५१८४०००० ॥५७॥
अथाधिमासारसरामदेव गोपं च चन्द्रप्रमिता १५९३३३६ स्तु कल्पे ।
तिथिक्षया बाहुशराश्विदस्रनागाभ्रतत्वैश्च २५०८२२ भवन्ति तुल्याः ॥५५॥
भानांभ्रमा यद्भगणैर्विवर्जिताः प्रजायते तद्ग्रहसावनौघः ।
तथा रवींद्वोर्भगणांतरं यद्भवे द्विधोर्मास समुच्चयो वा ॥५६॥
सूर्यमासरहिताः शशिमासाः संभवेदधिकमाससमूहः ।
सावनानि रहितानि च चांद्रैर्जायते वमदिवासमुदायः ॥६०॥

इति भगणाध्यायः ।

अथाहर्गणानयनम्—

सृष्टेर्गतो वर्षगणो रविघ्नश्चैत्रादिमासैः सहितो गतैश्च ।
खरामनिघ्नास्तिथिभिर्विमिश्रः पृथक्तनश्चाधिकमासनिघ्नात् ॥६१॥
आदित्यमासैर्विहृतात्प्रलब्धगताधिकैः खाग्नि हतैस्तु युक्तः ।
चान्द्रो गणोस्मात्पठितावमघ्नाच्चांद्रैर्हृतात्लब्धगतावमैश्च ॥६२॥
विवर्जितः सावनवासरौघः सृष्ट्यादितः स्यात्पुरि रावणस्य ।
निशीथके सिद्धदिनार्द्धके वानगावशेषो रवितो दिनेशः ॥६३॥
अथाधिशेषावमशेषकाभ्यां ग्राह्यं फलं नैव यतस्त्वमांतात् ।
संक्रांतिकालावधिकाधिशेषं तिथ्यतर व्यूदययोः परं च ॥६४॥
स्फुटोधिको न लभ्यतेनुपातश्च लभ्यते ।
इतोन्यथाधिका यदा तदा गताधिमासकात् ॥६५॥
अरूपकात्सरूपा[2]न्विधाय साधयेद् गणं[3] ।
अथा वमाधिशेषके त्यजेत निः प्रयोजने ॥६६॥

---

(घ) १. भानांगजाक्षिगजवाजि for (भानांगगजवाजि)
२. सरूपकान् for (सरूपान्)          ३. साधयेद्गुणं for (साधयेद्गणं)

अहर्गणः स्वैर्भगणैर्विनिघ्नः ख्वहैर्हृतः स्याद् भगणादिको ग्रहः ।
मध्याह्नके सिद्धपुरस्य मध्यः सूर्योदये वा यमकोटिपुर्यां ॥६७॥
सप्ततष्टे गणे चैव वारो यदि न लभ्यते ।
गणं सैकं निरेकं च कृत्वा संसाधयेद् ग्रहात् ॥६८॥
गोक्षास्तथाष्टौ ५९।८ तरणेर्गतिः छून्यांकसप्तेषु गुणाविधोश्च ७९०।३५ ।
चन्द्रोच्चभुक्तिर्ऋतवः कुवेदा ६।४१ रामाः शिवा ३।११ राहुगतिर्त्रिजोमा ॥६९॥
कुवह्नयः षडयमलाः ३१।२६ कुजस्य शोच्चस्य वै पंचजि नारदाश्च २४५।३२
गुरोः शरा ५ भार्गवतुंगभुक्तिःषडंकलिप्ताश्च गजा ९६।८ शनेर्द्वे २ ॥७०॥
कल्पोक्तसौरेन्दवसावनानि ग्रहस्य चक्राणि तथेतराणि ।
भक्तानि कल्पोद्भवसौरवर्षैः सौरैकवर्षप्रभवानि तानि ॥७१॥
गतेष्टवर्षैर्गुणितान्यभीष्टवर्षोद्भवानीह भवन्ति तानि ।
सप्तावशिष्टो द्युगणो दिनाद्यं तदग्रिमः स्याच्च समाधिनायः ॥७२॥
वर्षादितो द्विनगणं कृत्वा साध्या ग्रहास्ततः ।
वर्षारम्भध्रुवैर्युक्ताः स्वाभीष्टास्ते भवन्ति वै ॥७३॥
रविघ्ना गुरोः पर्यया वर्तमानैर्युता राशिभिः षष्ठितष्टावशिष्टाः ।
विपूर्वाजयाद्याश्च संवत्सराः स्युः रवेः संक्रमाच्चांद्रमासाश्च शुद्धाः ॥७४॥
संक्रांतिहीनोधिकमाससंज्ञश्चान्द्रो द्विसंक्रांति युतो वनाख्यः ।
यदा कदाचित्प्रभवेदवश्यं तद्वर्षमध्ये धिकमासयुग्मं ॥७५॥
वेदर्त्तुनागाभ्रगजाभ्र सूर्यनगाष्टचन्द्राः १८७१२०८६४००००[1] प्रयुता[2] हताश्च ।
भवेत्खकक्षा रविरश्मिचारस्ताबन्मितोंतस्तमसावृत्तं हे ॥७६॥
भक्ता ग्रहाणां भगणैः खकक्षा भवेत्स्वकक्षामितिरस्फुटेयं ।
ज्ञशुक्रयोस्तुंगभवा स्वकक्षा तत्रार्कगत्या भ्रमणं तयोश्च ॥७७॥
अथ ग्रहाणां भगणाऽऽश्रितानि वृत्तानि मध्यानि च तच्छ्रुतीश्च[3] ।
वक्ष्येर्कशास्त्रा च्छशिनः क्रमेण भानां ग्रहोर्ध्वस्थित कक्षिकां च ॥७८॥

---

(घ) १. १८७१२०८०८६४०००० for (१८७१२०८६४००००)
२. प्रत्युता for (प्रयुता) ३. तच्छ्रुतीश्च for (तच्छ्रुतीश्च)

खलाभ्र वेदाश्विगुणा ३२४०००० हिमद्यु ते,
विदोंकशून्य द्विगुणाब्धिपंक्तयः ४३२०६।
भृगोर्नगाग्न्यंग युगर्तु षड्यमा २६६४६३७ रवेः खखप्राणशशी सुराऽब्धयः।७६॥
कुजस्य गोभ्रांकरसेंद्रसिधुरा ८१४६९०६, द्यु गांकसप्तेषु
नगाग्निभूशराः ५१३७५७६४। गुरोः शनेरक्षशराश्विसिंधुरारसर्तु
सप्तार्कमिता १२७६६८२५५ च कक्षिका ।।८०॥
खखाभ्रशून्यां कगजांकतत्त्वं २५९८६०००० मिता च पूर्वैः कथिताभकक्षा।
अर्कस्य कक्षा खरसैर्विनिघ्नी यद्वा भकक्षाहि भवेत्समैव ।।८१॥
ऊर्ध्वस्थितस्य महती तदधः स्थितस्य कक्षाल्पिका भवति भागमितिस्तु तद्वत्।
तेनाल्पमण्डलगतो भगणं हि शीघ्रं भुंक्ते महद्वृत्तिगतोतिचिरेण खेटः।८२।
विधोर्मध्यकर्णो कवस्राक्रवाणा ५१२२६,
बुधस्येषुवेदांक वेदर्तु चन्द्राः १६४९४५।
कवेर्भू पुरा मेंदुदस्राब्धयः स्या ४२१३१६,
द्रवेः खाद्रिसर्पाऽब्धिनागर्त्त वश्च ६८४८७०।।८३॥
कुजस्यांकरामेंदुनागाष्टसूर्या १२८८१३९,
गुरोऽस्वर्गदन्तार्क नागप्रमाणाः ८१२३२२१।
शने रामसूर्यागधृत्यभ्रदस्रा २०१८६१२३,
भकर्णाः खखद्विद्विगोरवेंदुवेदाः ४१०९२२००।।८४॥
खखेष्वर्त्त वो ६५००० बिंबविष्कंभमानं,
खरांशोः शशांकस्य खाष्टाब्धयः ४८० स्यात्।
कुजस्याब्धि पंचाद्रयस्त्र्यंशयुक्ता ७५४२०,
बुधस्येषु शक्रादशांशेन हीनाः १४४।५४।।८५॥
गुरोः पंचदंतद्विपा अंघ्रिहीना ८३२४।४५,
भृगोराम तानाभलिप्ता युताश्च ४९३।२७।
शनेरङ्गसप्त्यद्विवेदैदवश्च भवेत्तत्त्वलिप्ता युता १४७७।२५ व्यासमानं।।८६॥

(घ) १. युगांक for (द्युगांक)  २. गुरोः for (गुरोऽ)
३. सप्ताद्रि for (सप्त्यद्रि)  ४. १४७७६।२५ for (१४७७।२५)

भौमादिकानां किल बिंबमानं हिमांशुमध्य श्रवणेन निघ्नं ।
खमध्यकर्णेन हृतं यदाप्तं बिंबप्रमाणं हिमरश्मिगोले ।।८७।।
खवह्नयः पंच युगाश्च ४५ सार्द्धदस्रेषवः ५२।३० शून्यरसा निरुक्ता ।
सार्द्धाद्रिरामाश्च ३७।३० कुजादिकानां तिथ्युद्धृता बिंबकलाः स्वगोले ।।८८।।
त्रिज्या चलश्रवणयोगदलं श्रुतिः स्यात्स्पष्टतया विनिहिताद्युचरस्य कक्षा ।
त्रिज्योद्धृता च भवति स्फुटबिंबकक्षा तेनैव गच्छति यथाग्रहबिंबगोलः ।।८९।।
त्रिज्या गुणा बिंबकला स्फुटेन कर्णेन भक्ता स्फुटबिंबमानं ।
शाकल्यवाक्यादथदृक् प्रतीतेर्ग्राह्यं त्विदं नान्यसमीरितं वै ।।९०।।
अथ ग्रहाणां शशि पूर्वकाणां नीचोच्चकर्णान्परमान्ब्रवीमि ।
श्री सूर्यतन्त्रात्किल योजनाद्यास्तथैव शीघ्रांत्यफलज्यकाश्च ।।९१।।
चन्द्रस्य नीचश्रवणः शराभ्रनगांगवेदा रसदस्रलिप्ताः ४६७०५।२६ ।
ह्रस्येषु शून्याद्रियुगत्रिचन्द्राल्पार्कभागेन युता श्रुतिः स्यात् ।।९२।।
युगघनांकरसाश्विमितो मृगौर्नगकलासहितः २६९१७४।७ श्रवणोऽल्पकः ।
युगशराष्ठगजा क्षरसा रवेर्भकलिकासहितः ६५८८५४।२७ परमाल्पकः ।।९३।।
द्व्यगाभ्ररामाद्रिगजाः ८७३०७२ कुजस्य,
गुरोर्नवांकाष्टदिगग्निसप्त ७३१०८९९ ।
दिगंशकोना रविजस्य सार्द्धं ववडंगवेदांगनभोंकचन्द्राः १९०६४६७१।३० ।।९४।।
द्विपंच सप्तेषुशराः ७५२ शराष्ठकुसायकांकेंदु मितास्तथैव १९५१८५ ।
गजाक्षवेदाग्निनगेषवः ५७३४५८ स्यात्षडष्ट-
नागाभ्रकुपर्वताश्च ७१०८८६ ।।९५।।
अंगाभ्रदन्ताभ्रघनाः [1]२७०३२०६
स्त्रिवेदपंचाक्षवह्न्यंकगजा ८९३५५४३ स्तथैव ।
वेदाश्वपंचाद्रिनभोग्निचन्द्रदस्रा २१३०७५७४ स्तु चन्द्रात्परमोच्चकर्णाः ।।९६।।
भौमस्य शीघ्रांत्यफलज्यका स्याद्वेदाग्निभूखाग्निगजा ८३०१३४ बुधस्य ।

(घ) १. १७०३२०६ for (२७०३२०६)

शून्याष्टवेदाभ्ररसागुरोस्तु ६०४८० वेदाब्धि,
षट्सिद्धनृपाः सपादाः १६२४६८४४।१५ ।।९७।।
भृगोर्युगाष्टा ऽऽश्विनृपाष्टवह्नयः ३०४२८४ शनेस्त्रिखांकाश्वियुगद्विबाहवः ।
२२४२९०३ रवेर्नृपाभ्रांगयमाः प्रकीर्तिता,
२६०१६ युगाब्धिबाणाब्धिमिता हिमद्युतेः ।।९८।।
रूपं भुवः कर्णमिति प्रकल्प्य तन्मानतो ये किल रोमकोक्ताः ।
नीचोच्चकर्णा अथ तान् ब्रवीमि त्रिबार्द्धमानानि च तत्प्रमाणात् ।।९९।।
चन्द्रस्य नीचश्रवणस्त्रिरामाः शक्राश्च विश्वे ३३।१४।१३ पुनरुच्चकर्णः ।
त्रिषट् च वेदाग्नय अक्ष चन्द्रा ६३।३४।१५ ग्रातोच्च[1],
कर्णोश्वरसा नखाश्च ६७।२० ।।१००।।
बुधस्य नीचश्रवणोश्वतर्कयिप्ताश्विनः[2] सप्तकृताः ६७।२२।४७ प्रदिष्टाः ।।
भूपाश्विनोगोशशिनोंगरामा २१६।१९।३६,
स्तदुच्चकर्णः किल रोमकोक्तः ।।१०१।।
शुक्रस्य नीचश्रवणः प्रदिष्टो भूपाश्विनो वेदकृतानभोक्षाः २१६।४४।५० ।
दस्राक्षवेदेंदव अंक चन्द्र[3] १४५२।१९ स्तदुच्चकर्णः कथितः पुराणैः ।।२।।[4]
सूर्यस्य नीचश्रवणोंकपंचशक्रास्तथा वेदगुणाः खरामाः १४५९।[illegible]४।३० ।
तदुच्च कर्णोगगजाक्षचन्द्रा गोवाहवः खांबुधयः प्रदिष्टाः १५८६।२९।४० ।।३।।[5]
भौमस्य नीचश्रवणोब्धिगोक्षचन्द्रास्तथादस्रशरागुणाश्च १५९४।५२।३ ।
तदुच्चकर्णो युगखांगरुद्रा द्वयं खशीतद्युतयः प्रदिष्टाः ११६०४।२।१०।१०।४०[6] ।।
गुरोस्तु ५१[7] नीचश्रवणो भवांगरुद्राः शराब्जाः,
खकृता ११६ ११।१५।४० स्तथैव ।
तदुच्चकर्णो ऽब्धियुगाष्टनाग चन्द्रा खरामाः,
प्रकृतिः १८८४४।३०।२१ प्रदिष्टा ।।१०५।।

---

(ष) १. पातोच्चकर्णो for (ग्रातोच्चकर्णो)
२. माश्विनः for (प्ताश्विनः)
३. चन्द्रा for (चन्द्र)
४. ।।१०२।। for (।।२।।)
५. ।।१०३।। for (।।३।।)
६. ।।१०४।। for (।१०।४०।।)
७. '५१' लुप्त

शनेस्तु नीचश्रवणोक्षयं च गजाष्टचन्द्राः शरवायवश्च १८८५५।५५ ।
तत्तु गजो द्विद्विगुणांगदस्रा नागेषवः ।
पंचगुणाः प्रदिष्टाः २६३२२।५८।३५ ।।१०६।।
भनीचकर्णोष्टरदांगदस्रा अष्टाग्नयोगो निगमाः २६३२८।३६।४६ प्रदिष्टाः ।
तत्तु गजः खाब्धि गुणांगदस्राः पंचाब्धयः सप्त,
कृताः २६३००।४५।४७ प्रदिष्टाः ।।१०७।।
एते ग्रहाणां कथितोच्चकर्णास्तथैव नीचाभिधकर्णकाश्च ।
बिंबार्द्धमानेन युतो नितास्ते परोच्चनीचश्रवणा भवन्ति ।।८।।
खं सप्तचन्द्रामनवो ०।१७।१४ हिमांशोर्व्यासार्द्धमानं किल रोमकोक्तं ।
खंदस्रको वेदगुणा ०।२।३४ बुधस्य खमाकृतिः,
सप्तगुणाः ०।२२।३७ सितस्य ।।६।।
खेरसाः पञ्चशराः शराक्षा ६।५२।५५ भूगोश्विनः पिंडमिताः कुजस्य १।२६।२८ ।
गुरोः शरा वेदकृता द्वयं च ५।४४।२ शनेः शराः,
खांबुधयो युगाब्जाः ५।४०।१४ ।।१०।।
खशून्यखांगप्रमितैश्च योजनैर्भू गोलमानं कथितं तु रोमके ।
खभूमिगोचन्द्रमितं तु तस्य व्यासप्रमाणं गणितोपयुक्तं ।।११।।
खखांगचन्द्रप्रमितैश्च योजनैर्भू व्यासमानं गदितं पुराणैः ।
दशाहता तत्कृतितः पदं स्याद् भूवृत्तमानं किल स प्रमाणं ।।१२।।
लंबज्यकाघ्नं त्रिभजीवयाप्तं भवेत्स्वदेशे परिधिश्च तेन ।
देशान्तरघ्नीखचरस्य भुक्तिर्विभाजिता यत्कलिकादिलब्धं ।।१३।।
देशांतराख्यं स्वमृणं ग्रहे स्याद्रेखा प्रदेशात्परपूर्वभागे ।

(घ) १. पंच for (यंच) २. ३८।४६ for (३६।४६)
३. १०८ for (८) ४. १०६ for (६)
५. ११० for (१०) ६. १११ for (११)
७. ११२ for (१२) ८. ११३ for (१३)

रक्षोनिवासात्किल मेरुलग्नं सूत्रं भवेन्मध्यमरेखिका सा ॥१४॥[1]

उन्मीलनाच्च शशिनो गणिताद्यदि प्राग्वृत्तुल्यता स्वनिलयं भवति प्रतीच्यां ।

प्राच्यामतीत्य गणितागतमेवमत्र सम्मीलनादपि तदंतरनाडिका स्युः ॥१५॥[2]

ताभिर्हतः स्वपरिधिः स्वरसैर्विभक्तो देशांतरं भवति तत्किल योजनाद्यं ।

वारप्रवृत्तिरधिके भवति क्षपार्द्धे प्राक्न्यूनकेत्वपरकेंतरनाडिकाभिः ॥१६॥[3]

मेषान्निरक्षोदयजासवो ये स्फुटार्कतो मध्यरवेः कलाश्च ।

तदन्तरघ्नी द्युनिशा सुभक्ता गतिर्यदाप्तं कलिकादिकं च ॥१७॥[4]

कलागणात्प्राणगणेधिकोने ऋणं धनं दोरुदयांतराख्यं ।

तत्संकृतो मध्यखगो निरक्षे स्याद्गर्भभूजे स्फुटभास्करे हि ॥१८॥[5]

अथ गोलबन्धप्रकारमाह—

अथ गोलं प्रवक्ष्यामि दृष्टांताहं सुवृत्तजं ।

यस्य विज्ञानतो वेत्ति सम्यग्गणिवासनां ॥१९॥[6]

ताम्रवंशादि वृत्तैश्च खगोलं स्वीयदेशजं ।

बध्वा स्थिरं तदन्तस्तु भंगोलं कारये स्थिरं ॥२०॥[7]

पूर्वापरं च याम्योदक्कोणकद्वितयं तथा ।

एतद्योगौ निजोर्ध्वाधः संस्थितौ स्वस्तिकाभिधौ ॥२१॥[8]

स्वस्तिकाद्यन्नवत्यंशैर्वृत्तं स्वक्षितिजं भवेत् ।

तद्याम्य सौम्ययोगौ हि गदितौ समसंज्ञकौ ॥२२॥[9]

ध्रुवचिह्नं ततोक्षांशैरूर्ध्वं सौम्येत्वपागधः ।

तच्चिह्नकीलकप्रोतौ कार्यौ स्वाधारसंस्थितौ ॥२३॥[10]

(घ) १. ११४ for (१४) २. ११५ for (१५)
३. ११६ for (१६) ४. ११७ for (१७)
५. ११८ for (१८) ६. + ॥११९॥ +
७. १२० for (२०) ८. १२१ for (२१)
९. १२२ for (२२) १०. १२३ for (२३)

ध्रु द्व भगोलं तु कृत्वा याम्योत्तरे ध्रुवात् ।
...नांशैश्च भवेत्तया चिह्नं कदम्बयोः ॥२४॥[1]
ध्रुवकीला[2] उभौ देयौ वृत्तांतर्निःसृतौ दृढौ ।
...: प्रोतं भगोलस्य याम्योदगयनाभिधं ॥२५॥[3]
...कीलकेन्द्रात्खांकैस्तु वृत्तं तद्विषुवाभिधं ।
...द्यु रात्रवृत्तानि कुर्यात् द्यु ज्यांशकैर्बुधः ॥२६॥[4]
कदम्बकीलकप्रोतं गोलेंतः शरवृत्तकं ।
...त्ययं ध्रुववृत्तं च ध्रुवकीलगतं बहिः ॥२७॥[5]
...न्तस्य कदम्बात् यद्वृत्तं खांकभागकैः ।
क्रांतिवृत्तं तदेव स्यादपमाभिधमण्डलं ॥२८॥[6]
...संधौ तु संपातौ विषुवत्क्रांतिवृत्तयोः ।
...गत्या चलितौ प्राक्पश्चाद् भवतस्तदा ॥२९॥[7]
कदम्बभ्रमवृत्तं च भगोलध्रुवचिह्नतः ।
कुर्यात्परापमांशैश्च गोलतत्त्वविशारदः ॥३०॥[8]
...वृत्तेऽक[9] विभागाश्च कृत्वा द्वादशराशयः ।
...नीयास्तया भानि समभागानि च क्रमात् ।३१॥[10]

इति गोलवेधः[11] ।

अयनक्रान्ति वृत्तं च कदम्बद्वयमेव च ।

---

(ग) १. १२४ for (२४)
२. कीलावुभौ for (कीला उभौ)
३. १२५ for (२५)
४. १२६ for (२६)
५. १२७ for (२७)
६. १२८ for (२८)
७. १२९ for (२९)
८. १३० for (३०)
९. ऽर्क for (ऽक)
१०. १३१ for (३१)
११. गोलवन्धः for (गोलवेधः)

यास्योत्तरं च विज्ञेयं वेधार्थं[1] वृत्तपंचकं[2]।

**अथैषां क्रमेण टीका[3]—**

अथ ब्राह्मं दिव्यं तथा पित्र्यमित्यादि आयुषोर्द्धं गतमित्यंतं श्लोकाः सुगमाः। ततः षण्मनवः स्वारोचिषादयो गताः। वर्त्तमानस्य वैवस्वतमनोः सप्तविंशतियुगानि यातानि। वर्त्तमानस्याष्टाविंशतितमयुगस्य कृतत्रेताद्वापर-युगात्मकमंघ्रित्रयं। शालिवाहनशकादौ कलेर्गतवर्षाणि नंदाद्रीन्दुगुण ३१-७९ मितानि। एषां योगः षण्मनूनां सप्तसंधिवर्षैः सप्तगुणितकृतवर्षसमेयु॑नः। ज्ञातः शकादौ वर्षगणः ॥१९७२९४७१८९ अयमेतैः सृष्टिवर्षैः १७०६४००० हीनः ज्ञातो[3] युतिकालाच्छकादिपर्यंतं वर्षगणः १९५५८८३१८९ यतः ब्रह्मदिनादारभ्य एतैः सृष्टिवर्षैः सर्वग्रहपातमंदोच्चादीनां मेषादौ योगो जातः।

अथ च भचक्रं षष्टिघटीभिः प्रत्यग्गत्या एकं परिवर्त्तं करोति। ग्रहास्तु तदल्पगत्या स्वस्वगत्या प्राक्चलंति। अतो भूपृष्ठस्थानां पूर्वोदयः पश्चिमास्तश्च प्रत्यहं भवति। ग्रहाणां कक्षाभेदेन कलागतिस्तु भिन्ना भिन्नास्ति। योजनगतिस्तु सर्वेषां पादोनगोक्षधृतिभूमिता सर्वेषां समास्ति। कस्मिन्काले सर्वेषां युतिर्जाता इत्यपेक्षायामाह—लंकानिशीथेति। लंकार्द्धरात्रे चैत्रसितप्रतिपदि कृष्णायनादौ ग्रहमंदोच्चगतादीनां मेषादौ योगो जातः। पुनस्तादृशो योगो येन कालेन भवति स कालः कल्पसंज्ञः। तद्वर्षाणि कोटिगुणितारदाब्धयः भवंति। तस्मिन्काले ग्रहाणां मंदोच्चादीनां च कियंतो भगणा भवंतीत्यपेक्षायामाह। कल्पेऽर्कं-शुक्रेंदुजेत्यादिभिरेकादशश्लोकैः। एते श्लोकाः सुगमार्थाः। अत्रोपपत्तिस्तु—एतावति काले एतावत्प्रमाणा भगणा भवंतीत्यागमप्रामाण्येनैव। अत्र भास्कराचार्यैः स्फुटग्रहं मध्यखगं प्रकल्प्येत्यादिनोपपत्तिरुक्तास्ति, तन्मंदजनप्रतारण-मात्रमेव। यतस्तेन मंदोच्चं परममंदफलं परमशीघ्रफलं चागमप्रामाण्येनैव गृहीतं। अर्द्धजरतीयन्यायः समीचीनो न भवति। अत्रास्माभिः परममंदफ-

---

(च) १-२ 'वृत्त – टीका' स्याही पोत कर मिटाया हुआ।

३. जातो for (ज्ञातो)

म्नानि परमशीघ्रफलानि मंदोच्चानि मध्यमाश्च वेधेनैव निष्कासिताः स्तदग्रे वक्ष्यामः।

अथ कल्पे सावनान् भभ्रमान् चांद्रदिवसान् रविमासान् चाधिमासानवमदिवसांश्च सूर्योदयद्वितयमध्येत्यादि श्लोकैराह—एते श्लोकाः सुगमार्थाः। भानांसभ्रमेति भानां भ्रमाः यद्भगणैर्विवर्जितास्तस्य कुदिनानि भवंति। रवींदुभगणांतरं चंद्रमासा। सूर्यमासशशिमासांतरं अधिमासा भवंति। सावनचान्द्रदिनांतरं क्षवमदिनानि भवंति।

इति भगणाध्यायः।

अथाहर्गणानयनमाह—सृष्टेर्गतो वर्षगण इत्यादिना। सृष्टेर्गतो वर्षगणः द्वादशगुणितश्चैत्रादिगतमासैर्युतः कार्यः। पुनस्त्रिशन्निघ्नो गततिथियुतश्च कार्यः। पुनर्द्विधा स्थाप्यः। ततोस्मादधिमासगुणिता द्रविमासभक्ताल्लब्धाधिमैस्त्रिशद्गुणितैः पृथक्स्थो युक्तः कार्यः। अयं चांद्रदिनगणो भवति। अयमपि पृथक्स्थाप्यः। अस्मात्कल्पावमगुणितात्कल्पचांद्रभक्ताल्लब्धावमैः पृथक्स्थो रहितः कार्यः सलंका निशीथे ऽहर्गणो भवति। अयं सप्ततष्टः शेषं रवेर्वारः गतः स्यात्। अत्रोपपत्तिः—गतवर्षगणो रविगुणितो इष्टवर्षादौ गतरविमासगणो भवति। चैत्रादिचांद्रगतमासतुल्यै रविमासैरयं युक्तश्चेद्गतसंक्रान्तिपर्यंतं रविमासगणो भवति। अयं त्रिशद्गुणितः गतसंक्रान्तिकालीनः सौरदिनगणो भवति। तस्य चांद्रदिनीकरणार्थमधिमासानयनं कार्यं। तद्यथा। कल्पसौरैः कल्पाधिमासा लभ्यंते तदेष्टसौरैः किमिति अनुपातेन लब्धकेवलाधिमासैस्त्रिशद्गुणितैर्युक्तः सौरगणः अमांते चांद्रगणो भवति। कुतः। अमांतसंक्रान्तिकालपर्यंतं अधिमासशेषं भवति। सावयवाधिमासास्त्रिशद्गुणितास्तत्र सौराहर्गणे योज्यंते, तदा संक्रान्तिकालीनश्चांद्राहर्गणो भवति। गणितसौकर्यार्थमपेक्षितो मांतकालीनो तोलाद्यवार्थं निरवयवा एवाधिमास्त्रिशद्गुणिताः सौरदिनेषु योजिताः। पुनस्तत्रगततिथयो योज्या इदं युक्तमेव। अयं चांद्रगण इष्टतिथ्यंते भवति। ननु पूर्वमेव गततिथयो योजितास्तेन किंचिदधिमासशेषेन्तरं पतिष्यति सत्यं। अधिमासशेषस्य प्रयोजनाभावान्न किंचिदहर्गणेंतरं पतिष्यति।

(च) १. रविमासांश्च for (रविमासान् च)

अथ चांद्राहर्गणस्य सावनाहर्गणकरणार्थं अवमानयनं । तद्यथा–कल्पचांद्रैः कल्पावमानि लभ्यंते, तदेष्टचान्द्रैः किमिति लब्धावमदिनै रहितश्चांद्रोगणः लंकार्द्धरात्रेऽहर्गणो भवति, यमकोटिसूर्योदये च । अत्राप्यवमशेषं त्यक्तं । यतस्तिथ्यंतसूर्योदयमध्ये सदैवावमशेषं भवति । अपेक्षितस्तु रव्युदये तो ऽवमशेषं त्यक्तं ।

अथाधिमासावमशेषाभ्यां फ कुतो न गृहीतं इत्याशंकायामाह । संक्रान्ति कालेति—सुगमं गतार्थं च । तदुक्तं भास्कराचार्यैः । वर्षविधेः संक्रमकालतः प्राक्सदैव तिष्ठत्यधिमासशेषं । तिथ्यंतसूर्योदय ययोस्तु मध्ये सदैव तिष्ठत्यवमावशेषमिति ।

अथ किंचिदुच्यते । स्फुटोधिक इति—यदा स्पष्टाधिमासो न लब्धः गणितेन लब्धः तदा निरेकानधिमासान् कृत्वाहर्गणं साधयेत् । स्पष्टाधिमासो लब्धः गणितागतो न लब्धः तदा सैकानधिमासान्कृत्वा ऽहर्गणं साधयेत् । सप्ततष्टे गणे चेद्वारो नायाति तदा सैकं निरेकं वागणं कृत्वा ग्रहान्साधयेत् ।

अथ मध्यमानयनमाह । अहर्गणः स्वैर्भगणैरिति—अहर्गणः स्वैः स्वैः कल्पभगणैर्गुणितः कल्पकुदिनैर्भक्तः भगणादिको मध्यमग्रहः स्यात् । अयं लंकानिशीथे यमकोटिसूर्योदये सिद्धपुरमध्याह्ने मध्यमो भवति । अत्रोपपत्तिस्त्रैराशिकेन । कल्पकुदिनैः कल्पस्वस्वभगणा लभ्यंते । तदेष्टकुदिनैः किमिति । अत्र सर्वत्र त्रैराशिकं नाम निष्पत्तिः । कल्पकुदिनानां कल्पभगणानां च या निष्पत्तिरस्ति सैवेष्ट[2] भगणा अज्ञाताः सन्ति $\begin{matrix} \text{क० कुदि} & \text{क० भग} \\ \text{इ० कुदि} & \text{इष्टभगणाः} \end{matrix}$ । अत्र द्वितीयतृतीययोः कल्पभगणेष्टकुदिनयोर्घातः । प्रथमेन कल्पकुदिनैर्भक्तः चतुर्थमिष्टभगणा भवंति । एवं सर्वत्र त्रैराशिकोपपत्तिरूहनीया ।

अथ रव्यादीनां कलाद्यां गतिमाह । गोक्षास्तथाष्टावित्यादिना सुगमार्थाः ।

---

(घ) १. + सावयवावमशोधने तिथ्यंतेऽहर्गणो भवति +

२. + कुदिनानामिष्टभगणानां चास्ति, अत्रेष्ट +

अथ वर्षादौ ध्रुवकानाह—कल्पोक्तेत्यादिना । कल्पीयसौरदिनचांद्रदिन-सावनदिनानि तथाधिमासावमदिनानि तथा ग्रहचक्राणि कल्पसौरवर्षैर्भक्ता-न्येकवर्षीयानि भवंति । एतान्यभीष्टवर्षैर्गुणितानि अभीष्टवर्षादौ भवंति । तत्र सावनदिनानि सप्ततष्टानि दिनादिको वाराद्यो ऽब्दपो भवति । यदि वर्षाऽऽरं-भादहर्गणः कृतश्चेदब्दपाग्रिमवाराद् गणना कार्या ।

अथ वर्षा ऽऽदितो ग्रहानयनमाह—वर्षादित इति । वर्षादितोभीष्टति-थिपर्यंततिथयो विगणय्य ग्राह्याः । यद्यधिमासश्चेत्तस्यापि तिथयो ग्राह्याः । ताः स्वचतुःषष्ट्यंशहीना अहर्गणः स्यात् । अहर्गणः सप्ततष्टो ऽब्दपाग्रिमवारा-द्वारः स्यात् । यदि वारो न मिलति तदा गणः सैको निरेको वा कार्याः[1] ।

अथाहर्गणेन स्वस्वगतिर्गुणनीया यद्राश्यादिकं भवेत्तद्वर्षारंभध्रुवैः युक्तं मध्यमग्रहो भवति ।

इति मध्यमग्रहानयनम् ।

अथ संवत्सरानयनमाह—रविघ्नेति । गुरोर्यातभगणाः द्वादशगुणाः षष्ठि-तष्टाः विजयाद्याः संवत्सरा भवंति । यतः सृष्ट्यादौ विजयसंवत्सर आसीत् । चांद्रसंवत्सरात्तु[2] कल्पादौ प्रमाथी आसीत् । कलियुगादावपि गुरुमानेनविजयसंव-त्सरश्चांद्रमानेन प्रमाथी संवत्सर आसीत् । तस्मात् कलिगतवर्षाणि षष्ठितष्टानि प्रमाथीतो चांद्रसंवत्सरः स्यात् । सार्द्धाष्टिषष्ठि[3]वर्षैर्गुरुसंवत्सरमानवमानसंवत्सरांतरं एकाधिकं भवति । यथा कलियुगादौ प्रमाथी संवत्सरः विजयसंवत्सरयोरंतरं चतुर्दशमितमासीत् । ततः सार्द्धाष्टषष्ठिवर्षैः पंचदशमितांतरं जातः । एवं च षष्ठि-मितमंतरं भूत्वा पुनरेकाद्यमंतरं भवति । अधुवा वर्त्तमानशके १६५३ मनुमानेन साधारणसंवत्सरोस्ति । गुरुमानेन दुर्मतिसंवत्सरः । अनयोरंतरं दशमितमस्ति । अग्रे एकादशमितं भविष्यति । इति सुबुद्धिभिर्ज्ञेयं । यस्मिन् चांद्रमासे रविसंक्रमो भवति स मासः शुद्धश्चैत्रादिसंज्ञो भवति ।

(घ) १. कार्यः for (कार्याः) २. संवत्सरस्तु for (संवत्सरात्तु)
३. षष्टि for (षष्ठि)

अथाधिकमासावममासयोर्लक्षणमाह—संक्रांतिहीन इति संक्रान्तिद्वयं यस्मिन् भवति स न्यूनमाससंज्ञो भवति । अयं न्यूनमासस्तु कदाचिद्भवति तत्रापिकार्त्तिकादिमासचतुष्टय एव भवति नान्यत्र । तस्मिन्वर्षे ऽधिमासद्वयं भवति ।

अथ खकक्षामाह—वेदर्त्तुनागाभ्रेत्यादिना । सुगमार्थं । इयं स्वकक्षा[2]- ग्रहाणां भगणैर्भक्तामध्यमास्व स्वकक्षा भवति[3]। तत्र तयोर्भ्रमणं रविगत्या भवति ।

अथ नक्षत्राणां ग्रहाणां च मध्यकक्षास्तद्भूतीश्चंद्रात्कक्षाक्रमेणाह—खखाभ्रवेदाश्विगुणेति । सुगमार्थानि । पूर्वं चंद्रस्य ततो बुधस्य ततः शुक्रस्य ततो रवेः ततः कुजस्य ततो गुरोः ततः शनेः ततः सर्वोपरिष्ठाद्भकक्षा । अथवार्ककक्षा षष्टिगुणिता भकक्षा भवति । ऊर्ध्वस्थितस्येति । ऊर्ध्वस्थितस्य ग्रहस्य महती कक्षा भवति । अधः स्थितस्य स्वल्पा भवति । तस्मान्महद्वृत्तस्थो ग्रहः भगणभोगं महता कालेन करोति । यथाशनिस्त्रिंशद्वर्षैर्भगणभोगं करोति । स्वल्पवृत्तस्थो ग्रहः स्वल्पेन कालेन भगणभोगं करोति । यथा चन्द्रो मासैकेन भगणभोगं करोति ।

अथ मध्यमकर्णानाह[4]—रवेर्मध्यकर्णोऽकदस्रेत्यादिना । श्लोकाः सुगमार्थाः ।

अथ सूर्याद्योजनात्मकानि बिंबान्याह । खखष्वर्त्तव इति । सुगमार्थं ।

अथ चन्द्रगोले भौमादिकानां बिंबानयनमाह—भौमादिकानां किलेति । चन्द्रगोले आनीतं भौमादिकानां बिंबमानं पंचदशभक्तं कलामानं भवति ।[5]

---

(घ) १. + संक्रान्तिहीनो मास अधिकसंज्ञो भवति +
२. ख for (स्व)
३. + ज्ञशुक्रयोस्तु शीघ्रोच्च कक्षैव कक्षा भवंति +
४. मध्यकर्णानाह for (मध्यमकर्णानाह)
५. + यतस्तत्र पंचदशयोजनैरेका कला भवति +

अथ स्पष्टकक्षानयनमाह—त्रिज्याचलश्रवणेति। त्रिज्याशीघ्रकर्ण योगार्द्धं स्पष्टकर्णो भवति। मध्यकक्षास्पष्टकर्णगुणा त्रिज्या भक्ताफलं स्पष्टकक्षा भवति। अन्यैराचार्यैः शीघ्रकर्णेनैव स्पष्टकक्षा आनीतास्ति सा समीचीना भवति। यतस्तत्र कक्षानां सांकर्यं भवति।

अथ भौमादिकानां स्पष्टबिंबानयनमाह—त्रिज्यागुणा बिंबकर्णेति। बिंबकलास्त्रिज्यागुणाः स्पष्टकर्णभक्ताः स्फुटबिंबमानं भवति। तदुक्तं विष्णु धर्मोत्तरे शाकल्येन। त्रिचतुःकर्णयोगार्द्धं स्फुटकर्णोऽस्य मस्तके। ग्रहः संचरतीति।

अथ चन्द्रादिग्रहाणां परमनीचोच्च कर्णानाह—चन्द्रस्य नीचश्रवण इत्यादिना। श्लोकाः सुगमार्थाः।

अथ भौमादिकानां योजनात्मकाः शीघ्रांत्यफलज्यका आह–भौमस्य शीघ्रांत्यफलज्येत्यादिना। श्लोकाः सुगमार्थाः।

अथ सूर्यचन्द्रयोर्योजनात्मके मांद्यांत्यफलज्ये आह—रवेनं पाभ्रांगयमा इति। सुगमार्थं।

अथ यवनाचार्यमतेन चन्द्रान्नीचोच्चकर्णानाह—रूपंभुव, इति। भूकर्णस्य रूपमितमानं प्रकल्प्य तन्मानेन ये नीचोच्चकर्णा भवन्ति, तान्तत्प्रमाणेन बिंबमानं च व्रदामि। चन्द्रस्य नीचश्रवणेत्यादिभिः। श्लोकाः सुगमार्थाः। अत्र रविणा षोडशशत १६०० परिमितः भूव्यास उक्तस्तत्परिधिस्तु व्यासवर्गाद्दशगुणान्मूलं भूपरिधिः स्फुट इत्यनेन प्रकारेण स्थूलं भूपरिधिमानमुक्तं इदं तत्त्वविवेककारेण कमलाकरज्योतिर्विदा सूक्ष्मत्वेनांगीकृत्य सर्वत्र व्यासात्परिध्यानयने अयं प्रकारः स्वीकृतः स्वग्रन्थे उक्तमपि रूपमिते व्यासे दशमूलमितः परिधिरिति। अन्यच्च। व्यासे भनन्दाग्निहते विभक्ते खबाणसूर्यैः परिधिस्तु सूक्ष्म इत्यस्मिन् समीचीन सूक्ष्मप्रकारे भास्कराचार्योक्ते दूषणमपि दत्तम्। तदर्थं सम्राट् श्री

(घ) १-२ 'अत्र रविणा—सम्राट् श्री' लुप्त

राजाधिराजजयसिहदेवैः सवाईजयपुरे स्वकृतयन्त्रशालायां शिल्पिभिः क्षेत्रज्ञैर्ज्योतिर्विद्भिश्च समेत्य निश्चयः कृतः। तेन व्यासे भनन्दाग्निहते विभक्ते खबाणसूर्यैः परिधिस्तु सूक्ष्म इत्ययं भास्कराचार्योक्तः प्रकारः समीचीनः।

इति सिद्धम्[२]।

**अत्रोपपत्तिः—**

सर्वकक्षाणां भूपरिध्युपयोगित्वादादौ भूपरिध्युपपत्तिरुच्यते। पुरीरक्षसां देवकन्याथकांचीसितः पर्वतः पर्यलीवत्सगुल्मं। पुरीचोज्जयिन्याह्वयागर्गराटं कुरुक्षेत्रमेरुभुवो मध्यरेखा। एतेष्वन्यतमे रेखानगरे याम्योत्तरभित्ति यन्त्रेण वेधेनाक्षांश निश्चयः कार्यः। पुनस्तत उत्तरतः पञ्चाशत्क्रोशाधिकान्तरे रेखानगरे एव तेनैव यन्त्रेणाऽक्षांश निश्चयः कार्यः। अनयोरन्तरं कार्यं। नगरान्तरयोजनानि भांशैर्गुण्यानि अक्षांशान्तरेण भाज्यानि फलं भूपरिधिर्भवति। पुनरस्मात्खबाणसूर्यै १२५० र्हताद्भनन्दाग्नि ३९२७ भक्ताल्लब्धं भूव्यासो भवति। भूपरिधिस्तु यवनैः षट्सहस्रमितो निश्चितोस्ति।

अथ यवनैर्भूकर्णो योज[३]बाहुल्याद्रूपमितमेवमानं कल्पितं। तेन मानेन कक्षाः कर्णाश्चानेयाः। अत्र तु कक्षाणां प्रयोजना भावात्कर्णा एव लिखिताः। कक्षास्तु तैरुपर्य्युपरिसंलग्ना एव कल्पिताः।

अथ पौर्णमास्यां याम्योत्तरभित्तियन्त्रेण याम्योत्तरवृत्तस्थस्य चन्द्रस्य वेधेन नतांशाः ग्राह्याः। पुनर्गणिते[४] च ग्राह्याः। अनयोरन्तरं दृग्लम्बनं भवति क्षेत्रं। अस्य ज्या कार्या। पुनर्वेधितनतांशज्यारूपगुणा दृग्लम्बनज्या भक्तालब्धं योजनात्मकः कर्णो भवति। पुनरयं परममन्दकर्णेन ६५।११ गुण्यः इष्टमन्दकर्णेन भाज्यः फलं परमोच्चकर्णो भवति। स चापं[५] ६३।३४।१५ पुनर्वेधसिद्धः कर्णः परमनीचकर्णेनानेन ३४।४ गुणितः वेधकालिकेष्टमन्दकर्णेन भक्तः फलं परमनीच-

(घ) १-२ 'भनन्दाग्नि—सिद्धम्' लुप्त
३. योजन for (योज)
४. पुनर्गणितेन for (पुनर्गणिते)
५. चायं for (चापं)

कर्णो भवति । एतदन्तरमिता चन्द्रकक्षायाः पुष्टताऽस्ति । चन्द्रपातोच्चकर्णस्तु । ६७।२० एतावन्मितोस्ति । अयं बुध बिंबार्द्धेनानेन ०।२।३४ युतः ६७।२२।४४ अयं बुधस्य परमनीचकर्णो भवति । अयं परमोच्चकर्णगुणः परमनीचकर्णभक्तः योजनात्मकः परमोच्चकर्णो भवति । २२६।१९।३६ अयं शुक्रबिंबार्द्धेनानेन ०।२२। ३७ युतः २२६।४२।१३ किंचिदन्तरं कक्षयोरपेक्षितं । तेन किंचिदधिको लिखितः २२६।४४।५० अयं शुक्रनीचकर्णः । पुनरस्मादनुपातेन शुक्रोच्चकर्णः साध्यः[1] । पुनरयं प्रथमप्रमाणनक्षत्र बिंबार्द्धयुतो जातो भकर्णः तदेवमुपपन्नं यथोक्तं ।

अथ बिंबार्द्धमानान्याह—खंसप्तचन्द्रेत्यादिना । श्लोकाः सुगमार्थः[2] ।

अथ भूपरिधिमानमाह—खशून्यखांगेति । सुगमार्थं ।

अथ सौरोक्तं भूव्यासमाह—खरगांग चन्द्रेति । सुगमार्थं ।

अथ स्पष्ट भूपरिध्यानयने देशान्तरं चाह—लम्बज्यकाघ्नमिति । भूपरिधिमानं लम्बज्यया गुण्यं त्रिज्यया भाज्यं स्वदेशे स्पष्टं[3] परिधिर्भवति । ग्रहभुक्ति-र्देशान्तरेण गुण्या स्पष्टपरिधिना भाज्या फलं कलात्मकं देशान्तरं भवति । तद्ग्रहे स्वं कार्यं स्वदेशे रेखा[4]प्रदेशात्पश्चिमस्थे सति । पूर्वस्थे ऋणं कार्यं ।

अथ रेखामाह—रक्षो निवासादिति । लङ्कातोमेरुगतं सूत्रं मध्यरेखा भवति ।

अथ स्वदेशः[5] पूर्वतो[6] वा पश्चिमतोस्तीति ज्ञानायोपायमाह—उन्मीलनाच्च-

---

(घ) १. + पुनरयं शुक्रोच्चकर्णः सूर्यबिंबार्द्धेनानेन ६।५३ युतो जातः सूर्यनीचकर्णः पुनरनुपातेन सूर्योच्चकर्णः साध्यः । अयं भौमबिंबार्द्धेन युतो जातो भौमनीचकर्णः पुनरस्माद्भौमोच्चकर्णः साध्यः । अयं गुरुबिंबार्द्धयुतो जातो गुरुनीचकर्णः । पुनरस्माद्गुरुच्चकर्णः साध्यः । अयं शनिबिंबार्द्ध युतो जातः शनिनीचकर्णः । पुनरस्माच्छनेरुच्चकर्णः साध्यः ।+

२. सुगमार्था. for (सुगमार्थः) ३. स्पष्ट for (स्पष्टं)

४. रेप्रदेशात् for (रेखा प्रदेशात्) ५. स्वदेशेः for (स्वदेशः)

६. सूर्वतो for (पूर्वतो)

शशिन इति। यदा खग्रासो भवति तदा स्वदेशे देशान्तरफलदानं विना गुणितं कृत्वोन्मीलनकालः साध्यः; यद्युन्मीलनं गणितागतकालात्पूर्वं भवति तदा स्वदेशे-रेखातः पश्चिमस्यामस्ति। यद्युन्मीलनं गणितागतकालानन्तरं भवति तदा रेखा-प्रदेशात्स्वदेशः पूर्वतोस्तीति ज्ञेयं। गणितागतकालदृक्कालयोरन्तरं घघाद्यं देशा-न्तरं भवति। इदं स्पष्टभूपरिधिना गुण्यं षष्ठ्या भाज्यं देशान्तरयोजनानि भवन्ति।

अथ वारप्रवृत्तिमाह—वारप्रवृत्तिरिति। प्राग्देशे स्वनिशार्द्धे देशान्तरपलै-र्न्यूने वारप्रवृत्तिर्भवति। पश्चाद्देशे स्वनिशार्द्धे देशान्तरपलै[2]रधिके वारप्रवृत्ति-र्भवति।

अथोदयान्तरभुजान्तरयोरानयनमाह—मेषान्नि[3]रक्ष्वे इति। स्पष्टार्कतो निरक्षासवो ग्राह्याः मध्यार्कस्य कला ग्राह्याः। अनयोरन्तरं ग्रहगत्या गुणनीयं अहोरात्रासुभिर्भाज्यं फलं कलाद्यं ग्रहे संस्कार्यं। यदि मध्यार्ककला असुभ्योधिका भवन्ति तदा ऋणं कार्यं न्यूनास्तदा धनं कार्यं। इत्युक्तप्रकारेण फलत्रयसंकृतो ग्रहः स्वक्षितिजे रविबिंबे सति भवति।

इति मध्यमाधिकारस्य टीका।

**अथ गोलवंधमाह—**

गोलवधं प्रदक्ष्यामीत्यादिभिश्चतुर्दश श्लोकैः। श्लोकास्तु सुगमार्थाः।
राजाधिराज प्रभुतोषणार्थे सम्राट् जगन्नाथ कृते सुशिल्पे।
सिद्धान्त संम्राजि महागभीरे मध्यक्रियाध्याय अगात्समाप्तिं॥

इति मध्यमाधिकारः सटीकः सोपपत्तिकः संपूर्णः।

अथ स्पष्टाधिकार आरभ्यते। तत्रादौ सर्वोपयोगित्वाद्राशित्रयस्य प्रत्यंश-जीवा कोष्ठका लिख्यन्ते॥ श्री ८।८।८॥

---

(घ) १. विनाग for (विनागु)　　२. पलन्यूने for (पलैंन्यूने)
३. मेषाग्निरक्षे for (मेषान्नरक्ष्वे)

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० |
| १ | २ | ३ | ४ | ५ | ६ | ७ | ८ | ९ | १० |
| २ | ५ | ८ | ११ | १३ | १६ | १८ | २१ | २३ | २५ |
| ४९ | ३८ | २४ | ७ | ४५ | १८ | ४३ | १ | ९ | ८ |
| ४३ | १७ | ३४ | २३ | ३८ | ८ | ४६ | २३ | ५० | ० |
| १५ | २९ | ० | ५४ | २६ | ५३ | ४१ | २३ | ४० | २३ |
| १ | १ | १ | १ | १ | १ | १ | १ | १ | १ |
| २ | २ | २ | २ | २ | २ | २ | २ | १ | १ |
| ४९ | ४६ | ४३ | ३८ | ३३ | २५ | १८ | ८ | ५८ | ४८ |
| ११ | १२ | १३ | १४ | १५ | १६ | १७ | १८ | १९ | २० |
| ११ | १२ | १३ | १४ | १५ | १६ | १७ | १८ | १९ | २० |
| २६ | २८ | २९ | ३० | ३१ | ३२ | ३२ | ३२ | ३२ | ३१ |
| ५४ | २८ | ४९ | ५५ | ४४ | १७ | ३२ | २७ | २ | १६ |
| ४४ | ५५ | २५ | ७ | ५४ | ४० | ७ | ४० | ४३ | २१ |
| ३५ | ३१ | ४० | ४६ | ४९ | ८ | १८ | १५ | १७ | २३ |
| १ | १ | १ | १ | १ | १ | ० | ० | ० | ० |
| १ | १ | १ | ० | ० | ० | ५९ | ५९ | ५९ | ५८ |
| ३४ | २१ | ६ | ४९ | ३३ | १५ | ५५ | ३५ | १४ | ४४ |
| २१ | २२ | २३ | २४ | २५ | २६ | २७ | २८ | २९ | ३० |
| २१ | २२ | २३ | २४ | २५ | २६ | २७ | २८ | २९ | ३० |
| ३० | २८ | २६ | २४ | २१ | १८ | १४ | १० | ५ | ० |
| ७ | ३५ | २७ | १५ | २५ | ८ | २१ | ५ | १८ | ० |
| २८ | १ | ५५ | ६ | ३२ | १० | ५६ | ५१ | ५२ | ० |
| ३८ | २७ | २६ | ५४ | ४० | ४ | ४३ | २७ | ४१ | ० |
| ० | ० | ० | ० | ० | ० | ० | ० | ० | |
| ५८ | ५७ | ५७ | ५७ | ५६ | ५६ | ५५ | ५५ | ५४ | |
| २८ | ५२ | ४८ | १० | ४३ | १३ | ४४ | १३ | ४२ | |
| ३१ | ३२ | ३३ | ३४ | ३५ | ३६ | ३७ | ३८ | ३९ | ४० |
| ३० | ३१ | ३२ | ३३ | ३४ | ३५ | ३६ | ३६ | ३७ | ३८ |
| ५४ | ४७ | ४० | ३३ | २४ | १६ | ६ | ५६ | ४५ | ३४ |
| ८ | ४२ | ४२ | ५ | ५२ | १ | ३२ | २२ | ३३ | २ |
| १३ | ३३ | १ | ४० | ३० | ३६ | २ | ५२ | १९ | ७ |
| २७ | ४० | ५४ | २ | ३७ | ५२ | ४२ | ४३ | १६ | २५ |
| ० | ० | ० | ० | ० | ० | ० | ० | ० | ० |
| ५३ | ५३ | ५२ | ५१ | ५१ | ५० | ४९ | ४९ | ४८ | ४६ |
| ३६ | ० | २३ | ४७ | ९ | ३१ | ५० | ११ | २९ | ४७ |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| ४१ | ४२ | ४३ | ४४ | ४५ | ४६ | ४७ | ४८ | ४९ | ५० |
| ३९ | ४० | ४० | ४१ | ४२ | ४३ | ४३ | ४४ | ४५ | ४५ |
| २१ | ८ | ५५ | ४० | २५ | ९ | ५२ | ३५ | १६ | ५७ |
| ४८ | ५२ | ११ | ४६ | ३५ | ३७ | ५२ | १८ | ५७ | ४५ |
| ४५ | १२ | ३८ | १२ | ३ | २३ | २३ | १६ | १६ | ३५ |
| १ | ४० | ४५ | २९ | ५३ | ४९ | ५८ | ४६ | १० | १८ |
| ० | ० | ० | ० | ० | ० | ० | ० | ० | ० |
| ४७ | ४६ | ४५ | ४४ | ४४ | ४३ | ४२ | ४१ | ४० | ३९ |
| ४ | १९ | ३५ | ४८ | २ | १५ | ३६ | ३९ | ४८ | ५८ |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| ५१ | ५२ | ५३ | ५४ | ५५ | ५६ | ५७ | ५८ | ५९ | ६० |
| ४६ | ४७ | ४७ | ४८ | ४९ | ४९ | ५० | ५० | ५१ | ५१ |
| ३७ | १६ | ५५ | ३५ | ८ | ४४ | १९ | ५२ | २५ | ५७ |
| ४३ | ५० | ५ | २७ | ४६ | ३२ | १२ | ५८ | ४८ | ४७ |
| ३१ | १९ | १६ | ४० | ५० | ६ | ५० | २३ | ८ | १९ |
| ४० | २२ | १३ | १५ | ३० | ५६ | ३४ | २० | १३ | १४ |
| ० | ० | ० | ० | ० | ० | ० | ० | ० | |
| ३९ | ३८ | ३७ | ३६ | ३५ | ३४ | ३३ | ३२ | ३१ | |
| ७ | ४५ | २२ | २९ | ३६ | ४० | ४६ | ५० | ५९ | |

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| ६१ | ६२ | ६३ | ६४ | ६५ | ६६ | ६७ | ६८ | ६९ | ७० |
| ५२ | ५२ | ५३ | ५३ | ५४ | ५४ | ५५ | ५५ | ५६ | ५६ |
| २८ | ५८ | २७ | ५१ | २२ | ४० | १३ | ३७ | ० | २२ |
| ३७ | ३६ | ३७ | ३९ | ४२ | ४५ | ४९ | ५१ | ५३ | ५३ |
| ५१ | ४० | २४ | ३० | २८ | ४९ | २ | ४२ | २२ | ५६ |
| २४ | ४८ | ३३ | १० | ५१ | ८ | ५४ | ४५ | २० | २२ |
| ७१ | ७२ | ७३ | ७४ | ७५ | ७६ | ७७ | ७८ | ७९ | ८० |
| ५६ | ५७ | ५७ | ५७ | ५७ | ५८ | ५८ | ५८ | ५८ | ५९ |
| ४३ | ३ | २२ | ४० | ४७ | १३ | २७ | ४१ | ५३ | ५ |

(घ) १. ३२ for (३५)

| | | | | | | | | | |
|---|---|---|---|---|---|---|---|---|---|
| ५२ | ४८ | ४१ | ३९ | ३९ | ३ | ४३ | १९ | ५१ | १८ |
| ० | १२ | ४९ | ३१ | ५८ | ४२ | ५२ | ५२ | २८ | २८ |
| ४४ | २७ | ३८ | ३५ | ४३ | ३७ | २ | ५४ | ५८ | २९ |
| ८१ | ८२ | ८३ | ८४ | ८५ | ८६ | ८७ | ८८ | ८९ | ९० |
| ५९ | ५९ | ५९ | ५९ | ५९ | ५९ | ५९ | ५९ | ५९ | ६० |
| १५ | २४ | ३३ | ४० | ४६ | ५१ | ५५ | ५७ | ५९ | ० |
| ४० | ५७ | ९ | १६ | १८ | १३ | ३ | ४८ | २७ | ० |
| | | | | | | १ | २ | ३ | ४ |
| ४० | ५४ | ५८ | ४३ | ३ | ५५ | ४६ | ७ | ७ | ० |
| ५४ | ० | ८ | ४६ | १७ | ५ | ७ | ५ | ४५ | ० |

अथ ज्याकोष्ठकेभ्यो जीवानयनं —

ज्यकाभुजांशप्रमकोष्टकाधो पृथक् तदेष्यांतरकेन निघ्नं ।
कलादिकं षष्ठिविभाजितं च फलेन युक् सा भुजसिजिनी स्यात् ॥१॥
ज्ञातज्यकायाः प्रविशोध्य जीवां शेषं विनिघ्नं खरसैर्हृतं च ।
या तैष्पजीवांतरकेन लब्धं विशुद्धजीवांकयुतं धनुः स्यात् ॥२॥
सुगमार्थे पद्ये

अथ मन्द परिधीनाह—

रवेर्मंदनीचोच्चवृत्तस्य भागाः पयोधींदवो रात्रिनाथस्य दन्ताः ३२ ।
शराश्वाः ७५ खरामाः ३० सुरा ३३ भास्करा १२ श्च,
नवांभोधयो ४९ युग्मकांते कुजादेः ॥३॥
सुगमार्थं ।

अयुग्मांत केखाश्विलिप्ता विहीनारवेः शीतरश्मेश्च पूर्वैर्निरुक्तः ।
गुणाश्वा ७३ गजाक्षा ५८ रदा ३२ भूभुंव ११ श्च,
गजांभोधयो ४८ मंदभागाः कुजादेः ॥४॥
सुगमार्थं पद्यं ।

(घ) १. + ५८ +  २. + २ +

अथ शीघ्र परिधीनाह—

युग्मांतके शीघ्र परिध्यकांशा, अर्थाग्निदस्रा[1] गुणराम चन्द्राः १३३ ।
खाश्वा[2] द्विषड्लोचन[3]संमितारच, नन्दाग्नयः स्युः क्षितिजादिकानां ।।५।।

सुगमार्थं पद्यं ।

| सू० | चं० | मं० | बु० | बृ० | शु० | श० | |
|---|---|---|---|---|---|---|---|
| १४<br>० | ३२<br>० | ७५<br>० | ३०<br>० | ३३<br>० | १२<br>० | ४६<br>० | युग्मांते |
| १३<br>४० | ३१<br>४० | ७२<br>० | २८<br>० | ३२<br>० | ११<br>० | ४८<br>० | विषमांते |
| २<br>२० | ५<br>२० | १२<br>३० | ५<br>० | ५<br>३० | २<br>० | ८<br>१० | पु० अं०<br>ज्या |
| २<br>१६<br>४० | ५<br>१६<br>४० | १२<br>०<br>० | ४<br>४०<br>० | ५<br>२०<br>० | १<br>५०<br>० | ८<br>०<br>० | ओ० अं०<br>ज्या० |

| | मं० | बु | बृ | शु | श० |
|---|---|---|---|---|---|
| युग्मे | २३५ | १३३ | ७० | २६२ | ३६ |
| ओजे | २३२ | १३२ | ७२ | २६० | ४० |
| [4] पु० अं०<br>फलज्या | ३६<br>१० | २२<br>१० | ११<br>४० | ४३<br>४० | ६<br>३० |
| [5] ओ० अं०<br>ज्या | ३८<br>४० | २२<br>० | १२<br>० | ४३<br>२० | ६<br>४० |

(घ) १. + २३५ + (अर्थाग्नि) रेखांकित नीचे २३५

२. - - ७० + उपर्यंकित ३. + २६२ + उपर्यंकित

४. युग्मे क अं ज्या } for (पु० अं० फलज्या)

५. ओजे फलं अं ज्या } for (ओ० अं० ज्या)

अयुग्मकांते[3] चल वृत्तभागा यमाग्नि[1]दस्रा यमराम[2]चंद्राः ।
खाश्वाः खषड्लोचनका २६० स्तथैव,
खांभोधयो ४० भूमिसुतात्प्रदिष्टाः ॥६॥

सुगमार्थं पद्यं ।

**अथ मन्दशीघ्रपरिधि भागकोष्ठकाः[4] ।**

अथ रव्यादीनां मन्दोच्चान्याह—
द्वयं सप्तचंद्रा नृपाश्चंद्र बाणाभपूर्वं रवेर्मंदतुंगं प्रदिष्टं ।
कुजस्याब्धयो दिग् द्वयं दस्रदस्रौ तथाज्ञस्य सप्ताभ्रचन्द्राश्च पिंडाः ॥७॥
गुरोः पंच चन्द्राश्विनः स्वश्च तर्काभ्रगोर्द्वौ नवाब्जाः कुपंचत्रिदस्राः ।
शस्सप्ततर्काश्विनः सप्तरामाः खरामा अथो वच्मि पातान् कुजादेः ॥८॥
रूपं खचंद्राश्च गुणा द्विदस्रा भौमस्य पातः किल सांप्रतोयं ।
शून्यं नखा भूमिकृता बुधस्य द्वौ गोभुवः खांबुधयो गुरोश्च ॥९॥
शुक्रस्य भूर्गोनयनाः कुवेदाः शनेस्त्रयं शून्यभुवोक्षिदस्राः ।
ज्ञशुक्रयोः पातभवौ ध्रुवौ च स्वशीघ्रकेन्द्रेण युतौ स्फुटौ स्तः ॥१०॥

अथ रव्यदीनां मन्दोच्चानि भौमादीनां पाताश्च कोष्ठेषु लिख्यंते ।[5]

| सू० | चं० | मं० | बु० | बृ० | शु० | श० |
|---|---|---|---|---|---|---|
| २ | | ४ | ७ | ५ | २ | ७ |
| १७ | | १० | १० | २१ | १९ | २६ |
| १६ | | २ | २७ | २१ | ५१ | ३७ |
| ५१ | | २२ | ४५ | ६ | २३ | ३० |

| मं० | बु | बृ | शु | श |
|---|---|---|---|---|
| १ | ० | २ | १ | ३ |
| १० | २० | १९ | १९ | १० |
| ३ | ४१ | ४० | ४० | २१ |
| २२ | १९ | १८ | ३३ | ३६ |

(घ) १. + २३२ + उपर्यंकित २. + १३२ +
३. + ७० +
४. यहां पर दी गई सारणी पिछले पृष्ठ ११९१ पर अंकित है।
५. यहां पर दी गई सारणी इसी पृष्ठ ११९२ पर अंकित है।

एते श्लोकाः प्रकटार्थाः—

**अथ मन्दकेन्द्रचलकेन्द्रयोरानयनमाह—**

**मन्दतुरंगरहितः खचरः स्यान्मंदकेन्द्रमथ चंचलतुंगं ।**
**खेचरेण रहितं चलकेन्द्रं त्रित्रिभैः कृतपदानि च चक्रे ।।११।।**
**ओजयुग्ममिति तानि भवन्ति या तमोजचरणे च भुजः स्यात् ।**
**एष्यकं समपदे किल बाहुर्भत्रयं तदयुतं किलकोटिः ।।१२।।**
**जूकमेषवदने मृदुकेन्द्रे मांददोर्भवफलं धनमस्वं ।**
**शीघ्रजं फलमतो विपरीतं प्राक्तनैर्निगदितं निजतन्त्रे ।।१३।।**

एतेषां पद्यानामर्थः ।

मन्दोच्चरहितो ग्रहः मन्दकेन्द्रं भवति ।

अथ शीघ्रोच्चं ग्रहेण रहितं शीघ्रकेन्द्रं भवति । केन्द्रस्य राशित्रयेण एकैकं पदं भवति । एवं चक्रे चत्वारि पदानि भवन्ति । ओजयुग्ममिति प्रथमं पदं विषमं द्वितीयं समं तृतीयं विषमं चतुर्थं समं एवमोजे चरणे प्रथमतृतीयपदयोर्यातं भुजः स्यात् । द्वितीयचतुर्थपदयों एष्यं भुजः स्यात् । भुजरहितं त्रिभं कोटिर्भवति ।

अथ केन्द्रवशात्फलस्य धनर्णतामाह —जूकमेषवदने इति मन्दकेन्द्रे तुलादिके सति मन्दफलं धनं भवति । मेषादिके[१] ऋणं भवति । शीघ्रकेन्द्रे मेषादिके शीघ्रफलं[२] भवति । तुलादिके सति ऋणं भवति ।

**अथ परिधिस्पष्टीकरणमाह—**

**ओजांतयुग्मांत परिध्यकांशविश्लेश[३]निघ्नी निजदोर्लवज्या ।**
**त्रिज्योद्धृता युग्मवृतावृणं स्वमोजाधिकोने परिधिः स्फुटः स्यात् ।।१४।।[४]**

अस्यार्थः—ओज युग्मांतपरिध्यन्तरेण स्वभुजज्या गुण्या मन्दपरिध्यंतरं चेन्मन्द[५]दोर्ज्या ग्राह्या शीघ्रं परिध्यन्तरं चेछीघ्रकेन्द्रदोर्ज्या ग्राह्या, त्रिज्या भक्ताफलं युग्मांत परिधौ ओजाधिके सति ऋणं कार्यं, ओजोनेधनं कार्यं परिधिः स्पष्टः स्यात् ।

(घ) १. + सति +                                  २. + धनं +
१. विश्लेष for (विश्लेश)                    ४. ।।१४।। for (१४)
५. + केन्द्र +

अथ स्पष्टपरिधेर्मांदांत्यफलज्याशीघ्रांत्यफलज्यानयनं ततो भुजफलकोटिफलानयनं चाह—

**स्पष्टीकृतस्य परिधेः खलु षष्ठुकांशः षष्ट्यामिते त्रिभगुत्यफलस्य जीवा।**
**स्पष्टतया[1] विनिहृते भुजकोटिजीवे त्रिज्योद्धृते च भुजकोटिफले भवेतां ॥१५॥**

अस्यार्थः—षष्ठिमितत्रिज्यायां स्पष्टपरिधेः षष्ठांशः अंत्यफलस्य जीवा स्पष्टा स्यात् तथा[2] गुणिते भुजकोटिजीवे त्रिज्याभक्ते भुजकोटिफले भवेतां।

अत्रोपपत्तिः—त्रैराशिकेन भांशपरिधौ षष्ठिमिता त्रिज्या[3] तदा मन्दपरिधिना वा शीघ्रपरिधिना किमिति अत्र षष्ट्या भांशानामपवर्त्त कृते सति हरस्थाने षड् भवन्ति। तदेवमुपपन्नं परिधिषष्ठांशोन्त्यफलज्या भवतीति पुनरनुपातः त्रिज्यया यद्यंत्यफलज्या लभ्यते तदेष्टया दोर्ज्यया इष्टकोटिज्यया च किमिति[4]।

**अथ शीघ्रकर्णानयनमाह—**

**त्रिभज्यका कोटिफलज्ययोश्च, योगोंतरं नक्रकुलीरकेन्द्रे।**
**शीघ्रेऽथ तद्दोः फलवर्गयोगान्मूलं चलः स्याछ्रवणः फलार्थं ॥१६॥**

अस्यार्थः—शीघ्रकेन्द्रे मकरादिगे सति त्रिज्याकोटिफलज्ययोर्योगः कार्यः, कर्कादिके सति ऋणं[5] कार्यं।

अथ योगवर्गस्य वांतरवर्गस्य भुजफल वर्गेण[6] योगः कार्यः, तस्मान्मूलं ग्राह्यं सफलार्थं शीघ्रकर्णः स्यात्।

---

(घ) १. स्पष्टा for (स्पष्ट)
२. तया for (तथा) ३. + लभ्यते +
४. + फलं इष्टभुजफलं इष्टकोटिफलं च भवति +
५. अन्तरं for (ऋणं) ६. वर्गेन for (वर्गेण)

**अथ शीघ्रफलानयनमाह—**

**द्राग्दोः फलात्त्रिज्यकया विनिघ्नात्कर्णोद्धृताल्लब्धधनुर्लवाद्यं ।**

**शीघ्रं फलं स्यान्मृदुदोः फलस्य, चापं बुधैर्मंदफलं निरुक्तं ॥१७॥[1] [2]**

अस्यार्थः—शीघ्रभुजफलात्त्रिज्या गुणात्कर्ण भक्ताल्लब्धफलस्य धनुर्ल-वाद्यं शीघ्रफलं स्यात्, मन्दभुजस्य चापं मन्दफलं स्यात् ।

अत्रोपपत्तिः—शीघ्रकर्णाग्रे भुजफलं [3]त्रिज्याग्रे किमिति फलस्य धनुः शीघ्र-फलं भवतीत्युपपन्नं । अत्र मंदफलसाधनार्थं मन्दकर्णो रविणा स्वल्पांतरत्वान्नोक्तः, सोत्रावश्यमपेक्षितः । तं विना मध्ये शीघ्रफलस्यार्द्धमित्यस्योपपत्तिर्न सिध्यति ।

[4]अथ शीघ्रकर्णं विनैव फलानयनं—तद्यथा, स्पष्टकोट्या भुजफलं लभ्यते । तदा त्रिज्यया किमिति फलस्य छायासु चापं शीघ्रफलं भ[5]वति ।

**अथ फलदानक्रममाह—**

**मध्ये चलार्द्धं किलमांदमर्द्धं दत्त्वा ततो मन्दफलं समस्तं ।**

**मध्यग्रहे तत्र फलं चलं च सर्वं प्रदेयं द्युचरः स्फुटः स्यात् ॥१८॥[6]**

अस्यार्थः—आदौ मध्यग्रहे शीघ्रफलार्द्धं देयं, ततो मन्दफलार्द्धं शीघ्र-फलार्द्धं संस्कृते देयं, एवं फलद्वयसंस्कृतान्मंदफलं समस्तं मध्यग्रहे देयं, तस्माच्छीघ्र-फलं सम्पूर्णं मन्दस्पष्टे देयं, ग्रहः स्पष्टः स्यात्[1]।

अथ मन्दकर्णमंगीकृत्यार्द्धफलवासनोच्यते—अभीष्टत्रिज्यामितकर्कटेन कक्षावृत्तं कार्यं, तत्रोच्चनीचगा रेखा कार्या, तिर्यग्रेखा च कार्या, ऊर्ध्वरेखावृत्तसंपाते

---

१. ॥१७॥ for (१७)

२. + अथ शीघ्रकर्णं विनैव फलानयनम्—तद्यथा स्पष्टकोट्या भुजफलं लभ्यते तदा त्रिज्यया किमिति फलस्य छायासु चापं शीघ्रफलं भवति +

३. + तदा +


४-५. 'अथ—भवति' लुप्त (नोट—यह वाक्य इस प्रति में पहले आ चुका है—इसी पृष्ठ पर फुटनोट २ में अंकित है ।

६. ॥१८॥ for (१८)

उच्चं अधः संपाते नीचं चांकनीयं, उच्चाद्वृत्ते मन्दकेन्द्रं दत्त्वा चिह्नं कार्यं, चिन्ह्वान्मांद्यांत्यफलज्यया मन्दपरिधिः कार्यः, तत्केन्द्रभूकेन्द्रस्पष्टा रेखा लघुवृत्तपालिपर्यंतं कार्या। तत्राप्यूर्ध्वपालिरेखा संपाते उच्चं अधः पालि रेखासंपाते नीचं चांकनीयं[1], मन्दपरिधौ भांशाः कल्पनीयाः, तत्राप्युच्चान्मंदकेन्द्र विलोमदिशि दत्वा चिह्नं कार्यं। अस्माच्छीघ्रांत्यफलज्यार्द्धेन शीघ्रपरिधिः कार्यः, अत्र शीघ्रांत्यफलज्यामन्दपरिधित्रिज्यामानेन ग्राह्या न तुमहत्त्रिज्यामानेन मन्दपरिधिशीघ्रपरिधिकेन्द्रगता रेखा उपरिशीघ्रपरिधिपालौ यत्र लगति तत्र शीघ्रोच्चं कल्पनीयं, उच्चाच्छीघ्रकेन्द्रं प्रथममन्दकेन्द्रविलोमदिशि दत्त्वा चिह्नं कार्यं, तच्चिह्नान्मन्दपरिधिकेन्द्रपर्यंतं रेखा कार्या, स शीघ्रकर्णो भवति। मन्दपरिधौ शीघ्रकर्णोच्चरेखयोरन्तरे शीघ्रार्द्धफलं भवति इत्यनेन [2]मन्दकेन्द्रमेकफलं संस्कृतं जातं, पुनः [3]शीघ्रकर्णो मन्दपरिधौ यत्र लग्नस्तत्र तथैव [4]मांदांत्यफलज्यार्द्धेन मंदपरिधिः कार्यः, अत्रोच्चरेखा तु शीघ्रकर्णं एवास्ति। अत्रापि पूर्ववदुच्चं कल्पयित्वा मन्दकेन्द्रं प्रथममन्दकेन्द्रदिशि दत्त्वा चिह्नं कार्यं, तच्चिह्नादबृहन्मंदकेन्द्रपरिधि[5]केन्द्रपर्यंतं रेखा कार्या, स मंदकर्णो भवति। स [6]मंदकर्णो बृहन्मंदपरिधि पालौ यत्र लग्नस्तच्चिह्नशीघ्रकर्णांतरे मांदार्द्धफलं ज्ञेयं इत्यनेन बृहन्मंदपरिधौ मन्द-

---

(घ) १. कल्पनीयं for (चांकनीयं)
२. 'मन्द' लुप्त
३. शीघ्रकर्णः for (शीघ्रकर्णो)
४. मांद्यांत्यफलं for (मांदांत्यफल)
५. 'केन्द्र' लुप्त
६. मन्दकर्णः for (मन्दकर्णो)



केन्द्रं फलद्वयसंस्कृतं जातं, तस्य दोर्ज्यां कोटिज्यां विधाय मन्दकर्णः साध्यः, तस्मान्मंदफलमानेयं तन्मध्यमग्रहे[1] संस्कार्यं, स मन्दस्पष्टो भवति। मन्दकर्णः कक्षावृत्ते यत्रलग्नस्तत्र मन्दस्पष्टचिह्नं ज्ञेयं, तस्माच्चिन्हाच्छीघ्रांत्यफलज्यया वृत्तं कार्यं, तस्योर्ध्वाधररेखा तु मन्दकर्णं एव भवति । मन्दस्पष्टशीघ्रोच्चांतररूपं शीघ्रकेन्द्रं पूर्वदिशि दत्त्वा दोर्ज्या कोटिज्या च कार्या दोः फलं कोटिफलं चानेयं, कोटिफलं कर्कादिकेन्द्रे त्रिज्यायां शोध्यं, मकरादिकेन्द्रे योज्यं यतो मकरादिकेन्द्रे कोटिफलं त्रिज्याग्रादुपरि भवति। कर्कादिकेन्द्रे त्रिज्याग्रादधो भवति। एवं कृते स्पष्टा कोटिर्भवति। स्पष्टकोटि वर्गभुजवर्गयोगपदं[2] कर्णो भवति। कुतः जात्यक्षेत्रत्वात् पुनरागतं भुजफलं कर्णाग्रे भवति, तस्य धनुःकरणार्थमनुपातः क्रियते, कर्णाग्रे इदं तदा त्रिज्याग्रे किमिति लब्धफलस्य चापं कक्षावृत्ते मन्द कर्णशीघ्रकर्णांतरे शीघ्रफलं भवति। यत्र शीघ्रकर्णः कक्षावृत्ते लग्नस्तत्र स्पष्टो ज्ञेयः, तदेवमुपपन्नं मध्ये शीघ्रफलस्यार्द्धमिति।

अथ प्रकारांतरेणोच्यते—शीघ्रफलार्द्धमन्दफलार्द्धसंस्कृतग्रहान्मन्दकेन्द्रमानीय पुनर्मंदशीघ्रफलाभ्यामसंस्कृतमध्यग्रह एव संस्कारः कृतोस्ति, तेनेदं ज्ञायते, ग्रहमन्दोच्चस्य शीघ्रफलार्द्धमन्दफलार्द्धाभ्यां मन्दशीघ्रफलसंस्कार उक्तो भवति । तत्र मन्दोच्चस्य ग्रहशीघ्रफलार्द्धतुल्यमेव मन्दफलं ग्रहमन्दफलार्द्धतुल्यमेव शीघ्रफलं भवति। एवं ग्रहशीघ्रपरिध्यर्द्धतुल्यो मन्दपरिधिर्ग्रहमन्दपरिध्यर्द्धतुल्यः शीघ्रपरिधिश्च ग्रहमन्दोच्चस्य भवतः, तत्र ग्रहान्मन्दोच्चो मन्दगतित्वाद् ग्रहपृष्ठतो वस्तुतो गणनीयः। शीघ्रोच्चोपि ग्रहापेक्षया शीघ्रगतित्वात्पूर्वभाग एव नियमेन गणनीयः। तत्र शीघ्रोच्चस्य ग्रहाच्छीघ्रगतिकत्वाच्छीघ्रोच्चाद् ग्रहं दूरीकृत्य परमार्थतः शीघ्रकेन्द्रं विज्ञेयं। एवं मन्दोच्चस्य मन्दगतिकत्वाद् ग्रहान्मन्दोच्चं निराकृत्य परमार्थतः मन्दकेन्द्रं विज्ञेयं। तत्र ग्रहमन्दोच्चे एव मन्दफलशीघ्रफलसंस्कारः कर्त्तव्यो भवति। ग्रहकेन्द्रस्य स्पष्टस्य परिधिज्ञानाय परन्तु ग्रहमन्दोच्चार्थमपि मन्दोच्चशीघ्रोच्चभगणतत्परिधि परिमाणादि कथने ग्रन्थगौरवापत्तेर्ग्रहमन्दशीघ्रफलार्द्धत एव लाघवेन कार्यस्याव्यभिचारेण सिद्धे मंदपरिधि-

(घ) १. मध्यग्रहे for (मध्यमग्रहे)          २. योगवर्गपदं for (वर्ग योगपदं)

जशीघ्रपरिधिजफलयोरर्द्धीकृतयोरेकरूपतया वैषम्याभावात्तयोर्मंदोच्चे संस्कारे क्रियमाणे मन्दोच्चीयमन्दोच्चशीघ्रोच्चतत्परिध्यादिगणनक्रियाभ्यावृत्त्या गौरवापत्तेर्लाघवान्मंदग्रह[2] एव शीघ्रमन्दार्द्धफलयोर्यथामर्यादं संस्कारे कृते सति मांदकेन्द्रस्याव्यभिचारेण सिद्धे मध्य ग्रह एव संस्कारद्वयं यथायोगं धनर्णत्वेन समाहृतं। एवं च तत्र ग्रहे मांदं शैघ्रं फलं धनं चेमन्दोच्चे[3] ऋणमेव ग्रहे ऋणं चेन्मंदोच्चे धनमेवेति। मन्दोच्चविपरीतो ग्रहसंस्कारो ग्रहविपरीतो मन्दोच्चे इति भवति। तथा सत्येव केन्द्रस्याव्यभिचारेण सिद्धेः; एवं ग्रहशीघ्रोच्चभगणाः ग्रहमन्दोच्चग्रहभगणाभ्यामूनाः ग्रहमंदोच्चस्य[4] प्रत्यग्गतेर्भगणा भवन्ति। एवं ग्रह भगणा एव ग्रहमन्दोच्चस्य शीघ्रोच्चभगणा भवन्ति, एवं च ग्रहमन्दोच्चस्य मन्दशीघ्रपरिधी मन्दशीघ्रोच्चौ तद्भगणाश्चेह मध्ये शीघ्रफलस्यार्द्धं मांदमर्द्धं फलं तथा इत्यनेन सूचिता भवतीति विवेचनीयं।

अथ धनर्णतोपपत्तिः—कक्षावृत्ते मंदपरिधिकेन्द्रं मंदकेन्द्रगत्या पूर्वतो गच्छति। मंदपरिधिगतकेन्द्रं स्वस्थान एव मंदकेन्द्रगत्या पश्चिमतो भ्रमति। तेन मंदकर्णो मेषादिकेन्द्रे मध्यमात्पश्चिमत एव भवति। तुलादिकेन्द्रे पूर्वत एव भवति। अतो मंदफलं मेषादावृणं[5] तुलादौ धनं भवति। शीघ्रपरिधिकेन्द्रं मंदस्पष्टगत्या पूर्वतो गच्छति, शीघ्रपरिधिपालौ ग्रहबिंबं शीघ्रकेन्द्रगत्या पूर्वतो भ्रमति। शीघ्रकर्णरेखा मंदकर्णरेखातो मेषादिकेन्द्रे अग्रत एव भवति। तुलादिकेन्द्रे पृष्ठत एव भवति। तेन शीघ्रफलं मेषादौ धनं तुलादावृणं भवतीत्युपपन्नं।

अथ फलचतुष्टयं भौमादि पंचग्रहाणां देयं सूर्यचन्द्रयोस्तु।

**मन्दफलमेव देयमित्याह—**

**उक्तप्रकारेण खलु स्फुटत्वं भौमादिकानां गणकैर्विधेयं।**
**मान्दं फलं केवलमेव देयं तिग्मद्युतेश्चापि निशाकरस्य ॥१६[6]॥**

अदः पद्यं स्पष्टार्थं।

(घ) १. णनक्रिया for (गणनक्रिया) २. मध्यग्रह for (मन्दग्रह)
३. चेन्मन्दोच्चे for (चे मन्दोच्चे) ४. ग्रहमन्दमन्दोच्चस्य for (ग्रहमन्दोच्चस्य)
५. मेषादौ ऋणं for (मेषादावृणं) ६. ॥१६॥ for (१६)

अथ गतिस्पष्टीकरणमाह—मंदोच्चभुक्तिविधुमध्यभुक्तेर्विशोध्य दोर्ज्या विवरादि कृत्वा फलं पुरावत्स्वमृणं गतौ स्यान्मदस्फुटा कर्किमृगादि[1] [2] अस्याः दोर्ज्यांतरं साध्यं। तद्यथा अद्यतनमंदकेन्द्रभुजस्तु ज्ञात एवास्ति। तस्य दोर्ज्यापि ज्ञातास्ति, श्वस्तनमंदकेन्द्राद् भुजं विधाय दोर्ज्या कार्या, तदंतरं मांदांत्यफलज्यागुणं त्रिज्याभक्तं गतिमंद फलं भवति, तत्फलं मध्यगतौ कर्कादिकेन्द्रे धनं मकरादिकेन्द्रे ऋणं कार्यं, मन्दस्पष्टा गतिर्भवति। एवं सर्वेषां मंदस्पष्टा गतिः कार्या।

अथ धनर्णतोपपत्तिः—अद्यतनश्वस्तनमध्यग्रहयोरंतरं मध्यमा गतिर्भवति। मंदस्पष्टयोरंतरं मंदस्पष्टा गतिर्भवति। फलयोरंतरं गतिफलं भवति। तत्र मेषादेः कर्कादिपर्यंतं फलमृणं भवति। कुतः अद्यतन ऋणफलात् श्वस्तनमृणफलमधिकमस्ति। अनयोरंतरे क्रियमाणे फलांतरमृणशेषमेव भवति, एवं मकरादेर्मेषादिपर्यंतमद्यतनधनमंदफलात् श्वस्तनं धनमंदफलमूलं[3] भवति। संशोध्यमानं स्वमृणत्वमेतीत्यनेनांतरे क्रियमाणे ऋणमेवावशिष्यते[4]। तेन मकरादेः कर्कादिपर्यंतं गतिफलमृणं भवतीत्युपपन्नं। एवं कर्कादेस्तुलादिपर्यंतमद्यतनऋणफलात् श्वस्तनमृणफलं न्यूनं भवति। तत्र शोधने क्रियमाणे धनशेषं भवति। एवं तुलादेर्मकरादिपर्यंतमद्यतनधनफलात् श्वस्तनधनफलमधिकं भवति। तयोरन्तरे धनशेषमेव तेन कर्कादेर्मकरादिपर्यंतं गतिफलं धनं भवतीत्युपपन्नं।

**अथ स्पष्टशीघ्रगतिसाधनमाह—**

**स्पष्टाशुकेन्द्रस्य गतिः फलस्य कोटिज्यकाशु श्रवणांतरेण।**
**गुण्याशुकर्णेन विभाजिता च फलं स्वमस्वं च मृदस्फुटायां ॥२१॥[5]**
**फलस्य कोटचंशकर्किजिनीतः कर्णोधिकोने च गतिः स्फुटा स्यात्।**
**यदा न शुध्येद्विपरीतशुद्धौ शेषं भवेद्वक्रगतिर्ग्रहस्य ॥२२॥**
**दिनांतरालस्फुटखेटयोर्यद्विश्लेषशेषं सजवो भवेद्वा।**

---

(घ) १. कर्कि for (कर्कि)
२. +केन्द्रे ॥२०॥ अस्यार्थः। चन्द्र मन्दोच्चगतिं मध्यचन्द्र भुक्तेर्विशोध्य शेषं चन्द्रस्य मतकेन्द्रगतिर्भवति। अन्येषां ग्रहाणां मध्यगतिरेव मंद केन्द्रगतिरस्ति। +
३. मूनं for (मूलं)
४. ऋर शेषमेवावशिष्यते for (ऋणमेवावशिष्यते)
५. ॥२१॥ for (२१)

अस्यार्थः—स्पष्टशीघ्रकेन्द्रगतिः फलकोटिज्याशीघ्रकर्णांतरेण गुण्या शीघ्रकर्णेन भक्ता फलं फलकोटिज्यातः कर्णेऽधिके मंदस्पष्टगतौ धनं कार्यं। फलकोटिज्यातः कर्णे ऊने ऋणं कार्यं, गतिः स्पष्टा भवति। यदा फलं गतौ न शुध्येत्तदा मंदस्पष्टगतिरेव तत्र शोध्या शेषं ग्रहस्य वक्रगतिर्भवति। दिनांतरालस्पष्टखेटयोर्विश्लेषे यच्छेषं साग्रहस्य गतिर्वा भवति।

अत्रोपपत्तिः—शीघ्रफलकोटिज्या कर्णांतरपरमत्वे गतिफलपरमत्वं फलकोटिज्या कर्णांतरा भावे गतिफलाभावः मध्ये तु[1] पातः फलकोटिज्या कर्णांतरपरमत्वमुच्चसमे ग्रहे अंत्यफलज्यातुल्यं भवति। फलस्याभावात्फलकोटिज्या त्रिज्या तुल्या भवति, गतिफलं[2] च परमं भवति। तद्यथा—अद्यतनश्वस्तनकेन्द्रदोर्ज्यांतरमंत्यफलज्यागुणं त्रिज्याभक्तं गतिफलं भवति। पुनरनुपातः अंत्यफलज्यातुल्येन फलकोटिज्या कर्णांतरेणेदं तदेष्टेन फलकोटिज्या कर्णांतरेण किमिति पुनरनुपातः, कर्णाग्रे इदं तदा त्रिज्याग्रे किमित्यत्र तुल्ययोरंत्यफलज्ययोस्त्रिज्ययोश्च नाशे कृते केन्द्रगतिः फलकोटिज्या कर्णांतरगुणा कर्णभक्ता भवतीत्युपपन्नं। सूर्यसिद्धांतोक्तगतिफलानयनप्रकारे त्रिज्याकर्णांतरं गृहीतमस्ति।

तद्यथा—

**मन्दस्फुटीकृतां भुक्तिं प्रोह्य शीघ्रोच्चभुक्तितः,**
**तच्छेषं विवरेणाथ हन्यात्त्रिज्यांत्यकर्णयोः ।।१।।**[3]
**चलकर्णहृतं भुक्तौ कर्णे त्रिज्याधिके धनं,**
**ऋणमूनेऽधिके प्रोह्य भुक्तिं वक्रगतिर्भवेत् ।।२।।**

अत्र त्रिज्या कर्णांतरस्थाने फलकोटिज्या कर्णांतरमेव व्याख्येयं, अनेनार्थेन कृतत्तुंचन्द्रेत्यादिसौरोक्तवक्रकेन्द्रेषु भौमादीनां गतिः शून्यमायाति। त्रिज्याकर्णांतरे गृहीते गतिः शून्यं नायाति। अत्रोच्चसमे मध्यमे उदाहरणं भौमस्य वक्रकेन्द्रांशाः १६४ भुजः ०।१६ अस्य ज्या १६।३२।१८ भुजफलं १०।४७।४५ कोटिफलं ३७।३७।१६[4] कर्कादिकेन्द्रत्वात्त्रिज्यायां शोधितं शेषवर्गभुजफलवर्गयोगपदं कर्णः २४।४८ अत्र मध्यगतितुल्येव मंदस्पष्टगतिर्गृहीता।

---

(म) १. मध्येनुपातः for (मध्ये तु पातः) २. + परमं +
३. ।।१।। for (१) ४. ३७।३६।१६ for (३७।३७।१६)


अथ भौमशीघ्रकेन्द्रगतिः २७।४२ फलकोटिज्याकर्णांतरेणानेन २८।२६ गुणिता ७८७।३६ कर्णेनानेन २४।४८ भक्तालब्धं गतिफलं ३१।४१ फलकोटिज्यातः कर्णस्य न्यूनत्वाज्जातमृणफलं, अस्य मध्यगतेश्चांतरं[1] जाता गतिः शून्यं तस्मात्त्रिज्याकर्णांतरस्थाने फलकोटिज्या कर्णांतरमेव ग्राह्यं । एतादृशं सौराशयमविदित्वा यथावत्स्थितं व्याख्यानमंगीकृत्य कमलाकरेण तत्त्वविवेके भास्कराचार्यस्य दूषणं दत्तं तदसत् भास्कराचार्येण सौराशयानुसारेणैव गणितं निबद्धं कोटिफलघ्नीत्यादिना ।

**अथ सौराक्तान्वक्रमार्गचलकेन्द्रांशानाह—**

**कृतर्त्तुचन्द्रैः १६४ युगवेद चन्द्रैः १४४,**
**खरामचन्द्रै १३० हुतभुङ्नरेन्द्रै १६३ २३ ।**
**शरेषु चन्द्रै १५५ इचल केन्द्रभागैः स्युर्वक्रिणोभूमि-**
**सुतादयश्च स्वैर्वक्रभागैर्भगणांशशुद्धैः,**
**स्युर्मार्गिणस्ते खचराश्चलांशैः ॥२४॥[2]**

अस्यार्थः—कृतर्त्तुचन्द्रादयो यदा भौमादिकानां शीघ्रकेन्द्राशाः स्युस्तदा तैर्यथाक्रमं वक्रिणो ज्ञेयाः, एतैरेव भागैर्भगणांश ३६०[3] शुद्धैः समाः यदा भौमादिकानां चल केन्द्रांशा भवन्ति । तदा ते मार्गिणो भवन्तीति ज्ञेयं । एते केन्द्रांशा इदं गतिफलं सौरतन्त्रादिषु लिखितत्वाल्लिखितं यदा स्पष्टयोरन्तरं क्रियते तदैतेषु केन्द्रांशेषु गतिः शून्यं न भवति । भौमस्य गतिमन्दफलाभावे द्विपंचेन्दुमित १५२ चलकेन्द्रांशैर्गतेः शून्यत्वं भवति । बुधस्यैतावन्मिते शीघ्रकेन्द्रे १४५ गतिः शून्य भवति । गुरोरेतावन्मिते[4] १२० केन्द्रे गतिः शून्यं भवति । शुक्रस्यैतावन्मिते[5] केन्द्रे

(घ) १. मध्यमगते for (मध्यगते)
२. ॥२४॥ for (१४)
३. '३६०' लुप्त
४. गुरोः १२० एतावन्मिते for (गुरोरेतावन्मिते १२०)
५. शुक्रस्य १६१ एतावन्मिते for (शुक्रस्यैतावन्मिते)




१६१ गतिः शून्यं भवति । शनेः १०६ एतावन्मिते केन्द्रे गतिः शून्यं भवतीति ।

अथ पूर्वमुक्ता अपि अर्द्धफलादि वासनाः प्रकारांतरतो रेखागणिते नोच्यंते । अत्राभीष्टचिह्नात्त्रिज्यामितकर्कटेन कक्षावृत्तं कार्यं, नीचोच्चरेखा कार्या उच्चान्मेषादिर्विलोमं देयः, मेषादेर्मध्यग्रह उच्चादग्रतो देयः । ग्रहशीघ्रोच्चं मध्यमग्रहग्रहमंदोच्चाभ्यां हीनं मंदमन्दोच्चं भवति । तन्मेषादेर्विलोमं देयं, तद्ग्रहमन्दमंदोच्चस्य चिह्नं भवति । तन्मंदोच्चयोरन्तरं मन्दमन्दकेन्द्रं भवति । मन्दोच्चाच्छीघ्रांत्यफलज्यार्द्धेन वृत्तं कार्यं, तत्राप्युच्चरेखा केन्द्राभिमुखी कार्या । तस्मिन्परिधावुच्चात्पश्चिमतो मन्दमन्दकेंद्रं दत्वा चिह्नं कार्यं, तत्केन्द्रदोर्ज्या कार्या, भूकेन्द्रात्तच्चिह्नपर्यंतं कर्णरेखा कार्या, सा कर्णरेखा कक्षावृत्ते यत्र लग्ना तत्र शीघ्र फलार्द्धं संस्कृतं मन्दोच्चं जातं । अत्र शीघ्रफलं मेवादावृणं[2] तुलादौ धनं ज्ञेयं । पुनर्मंदोच्चस्य शीघ्रोच्चं तु मध्यमग्रह एवास्ति । तत्स्पष्टमन्दोच्चांतरं मन्दोच्चस्य शीघ्रकेन्द्रं भवति । उक्तकर्णरेखा कक्षावृत्ते यत्र लग्ना तत्र केन्द्रं कृत्वा मान्दांत्यफलज्यार्द्धेन वृत्तं कार्यं, तत्र कर्णरेखैवोच्चरेखास्ति । तत्र परिधावुच्चात् पूर्वतः[3] शीघ्रकेन्द्रं दत्वा चिह्नं कार्यं, तत्केन्द्रस्य दोर्ज्यां कोटिज्यां कृत्वा भुजफलं कोटिफलं च विधाय कर्णः कार्यः, सा कर्णरेखा कक्षावृत्ते यत्र लग्ना तत्र फलद्वयं संस्कृतं मंदोच्चं जातं भूकेन्द्रात्स्पष्टोच्चगा रेखा नीचपर्यंतं कार्या । सा स्पष्टनीचोच्चरेखा भवति ।

---

(घ) १. '१६१ लुप्त'
२. मेषादौ ऋणं for (मेवादावृणं)
३. पूर्वतो for (पूर्वतः)



तस्यां केन्द्रादुच्चोन्मुखीं मांदांत्यफलज्यां दत्वा तत्र केन्द्रं कृत्वा त्रिज्यामितकर्कटेन मन्दप्रतिवृत्तं कार्यं, तस्मिनुच्चरेखा यत्र लग्ना तत्र स्पष्टोच्चं ज्ञेयं, स्पष्टोच्चमध्यमग्रहांतरं फलद्वयसंस्कृतं मन्दकेन्द्रं ज्ञेयं, अत्र शकलं।

अथ द्वितीयं शकलं[१] कखगघं कक्षावृत्तं कार्यं, घं भूकेन्द्रं चछथधं[२] मन्दप्रतिवृत्तं थश्व[३] च घ रेखा स्पष्टोच्चरेखा कक्षावृत्ते कं मेषादिः खं स्पष्टोच्चं प्रतिवृत्ते छं मेषादिः थं स्पष्टोच्चं धं मध्यमः थधं मन्दकेन्द्रं अयं थचधकोणः ज्ञातोस्ति। एतस्य ज्यागचघ त्रिभुजे गचघ कोणस्यापि जीवास्ति सा ज्ञातास्ति। गघ भुजस्त्रिज्यामितः एतौ जातौ[४] स्तः। गघेन गचछकोणज्या[५] लभ्यते, तदा च घेन किमिति लब्धं चगघ कोणज्या, अस्याश्चापं मंदफलं चगघकोणः, अनेन हीनः थचध कोणो नातः[६] थघककोणः खंगं मन्दफलसंस्कृतं मन्दकेन्द्रं कृत्वा पुनर्गकेन्द्रं कृत्वा भूजतं[७] शीघ्रनीचोच्चवृत्तं कार्यं। एतस्योच्चं मन्दप्रतिवृत्तकेन्द्रसन्मुखं भवति। स्पष्टोच्चं भूकेन्द्रसन्मुखं भवति। चगधगरेखे वर्द्धनीये। लघुवृत्तपालिपर्यंतं जचिह्नं मध्यमोच्चं भूचिह्नं[८] स्पष्टोच्चं त चिह्नं बिंबं जतं मध्यमशीघ्रकेन्द्रं इदं चगघ तुल्येन जगभ[९] कोणेन मन्दफलरूपेण विलोमं संस्कृतं तभूं[१०] स्पष्टकेन्द्रं भवति। अस्य भुजज्यातवं कोटिज्यावगं गतरेखायां षष्टिस्तन्मानेन यदि तगं शीघ्रांत्यफलज्या तदावतं भुजफलं वगं कोटिफलं इदं मकरादि केन्द्रत्वाद् घग त्रिज्यायां योजितं, जातं घवकोटिः, अस्य वर्गः वतवर्गयुतः जातो घतवर्गः। अस्य मूलं घतं जातः शीघ्रकर्णः कर्णाग्रे यदि वतं भुजफलं तदा घमत्रिज्याग्रे किमिति लब्धस्य चापं जातं मगं शीघ्रफलमिदं मेषादिकेन्द्रत्वाद्धनं इदं मन्द स्पष्टकेन्द्रे खगे योजितं। शीघ्रस्पष्टं मन्दकेन्द्रमिदं कखेन स्पष्टोच्चेन युतं जातः स्पष्टग्रहः, अनेन शकलेन

---

(घ) १. + शकलं +
२. चथधंमन्द for (चछथधंमन्द)
३. थखचघरेखा for (थश्वचघरेखा)
४. ज्ञातौ for (जातौ)
५. गचघकोण for (गचछकोण)
६. जातः for (नातः)
७. भ्रजतं for (भूजतं)
८. भ्रचिह्नं for (भूचिह्नं)
९. जगभ्रकोणेन for (जगभकोणेन)
१०. तभ्रं for (तभूं)

भौमादिपंचग्रहाणां मन्दकर्णाभावः सिध्यति। त्रिज्यायां कोटिफलं योज्यं शोध्य-मिदमपि संगच्छति रविचन्द्रयोस्त्वनया कल्पनया मन्दकर्णाभावः सिद्धचति। परन्तु बिंबयोर्न्यूनाधिक्यं न संभवति। बिंबयोर्न्यूनाधिक्यं तु प्रत्यक्षं दृश्यते, तेन मन्दकर्णो पेक्षितः [1]श्री रविणा न कृतः, स्वल्पांतरत्वात् अत्र पूर्वाचार्यैः स्वल्पांतरत्वान्मृदु-कर्मणीह कर्णः कृतो नेत्यादि सर्वग्रहसाधारण्येन मन्दकर्णाभाव उक्तः। स नादर-णीयः, कमलाकरदैवज्ञैः सिद्धांततत्त्वविवेके एतद्रूपपरिधिकल्पनं सूर्यसिद्धांते त्रुटितग्रन्थकल्पनां कृत्वा कृतं तदसत्, मन्दजनानां प्रतारणमात्रं तन्मतानु-सारिभिर्दादाभाईनामभिर्दैवज्ञैः सूर्यसिद्धांतटीकायां किरणावल्यामेकरूपपरिधि-कल्पनं कृतं, तदप्यसत्। अन्यदपि शीघ्रांत्यफलज्यायाः मन्दकर्णगुणनेन त्रिज्यया भजनेन स्पष्टत्वं कृत्वा फलसाधनं, कृतं तदप्यसत्। सौरोक्तफलस्य तत्कृतफलस्य चांतरं नवांशपरिमितं दृष्टमिदं गणितविरुद्धं[2] प्रत्यक्षविरुद्धं चेति।

अथ भौमादिपंचग्रहाणां शरसाधनमाह—

तत्रानुपयोगित्वाच्चंद्रादीनां परमशरकला उच्यन्ते—

खभानि २७० खांका ९० नखभूमयश्च,[3]
खांगानि ६० खांका[4] ९० खदिवाकराश्च १२०।
चन्द्रादिकानां परमाः खगानां
पुरातनैं र्बाणकला प्रदिष्टाः ॥२३॥

अथ शरसाधनं—

पातोनमन्दस्फुटस्वेदोर्ज्या निघ्नीपराभिः शरलिप्तिकाभिः।
चलांत्यकर्णेन हृताशरः स्यात्पातोनमन्दस्फुटगोलदिक्कः ॥२४॥[5]
हिमद्यु तेस्त्रिज्यकया त्रिभाजिता[6] भवेत्पृषत्कोपम[7] संस्कृतिक्षमः ॥२५॥
पाते अथवा मन्दफलं विलोमं दत्वा तदूनः खलु मध्यखेटः स्यात्।
पातकेन्द्रं च ततः तुरावत्साध्यः पृषत्को[8] गणकप्रवीणैः ॥२६॥[9]

(घ) १. 'श्री' लुप्त
२. विरु for (विरुद्धं)
३. + १२० +
४. खार्काः १२० for (खांकाः ९०)
५. ॥२४॥ for (२४)
६. विभाजिता for (त्रिभाजिता)
७. पृषत्कोऽपम for (पृषत्कोपम)
८. पृशक्तो for (पृषत्को)
९. ॥२६॥ for (२६).

अथ पातोनमन्दस्फुटेत्यस्यार्थः—पातास्तु चक्रशुद्धाः पूर्वं चक्रे लिखिताः संति। चन्द्रस्य चक्रशुद्धः पातो राहुरेव ग्रह स्वपातोनः पातकेंद्र भवति। तस्य दोर्ज्यापरमशरगुणा शीघ्रांत्यकर्णेन भक्ता फलस्य चापं शरकला भवंति। चन्द्रस्य त्रिज्या भक्ताः शरकला भवंति। पातकेन्द्रे मेषादिके शरकला उत्तरा तुलादिके दक्षिणा ज्ञेयाः। अत्रोपपत्तिः—प्रतिवृत्त[1]प्रकारेण भौमादिकानां शीघ्रप्रतिवृत्तेः मेषादेः सकाशाद् गणितागतः पातः अनुलोमं देयः, तत्र चिह्नं कृत्वा तत्रान्यत्त्रिज्या वृत्तस्य संपातः कार्यः। तस्मात्षड्भांतरे द्वितीयसंपातः कार्यः। पातात्त्रिभांतरे परमशरकला तुल्यांतरेणोत्तरतः सषड्भपातात्परमशरकला तुल्यांतरेण दक्षिणतो विश्लिष्टं कार्यं ग्रहस्तस्मिन्वृत्ते मंदस्पष्टगत्या भ्रमति। अस्माभिः स्वल्पांतरत्वात्फलसाधनार्थं प्रतिमंडलस्थ एव गृहीतः। तस्य पातेन यदंतरं तत्पातकेन्द्रं भवति। यतः पाततुल्ये ग्रहे शराभावोऽस्ति, पातात्त्रिभांतरे परमशरकला तुल्यमंतरं भवति। मध्येऽनुपातेन क्रान्तिवच्छर आनेयः। स यथा त्रिज्या तुल्यया पातकेन्द्रदोर्ज्यया परमशरकला तुल्यमंतरं लभ्यते। तदेष्टया किमिति अस्मिंस्त्रिभुजे कोटिः प्रतिवृत्ते शरोभुजः, द्वितीयवृत्ते कर्णः, पुनः कर्णाग्रे इदं तदा त्रिज्याग्रे किमित्यनुपातेन लब्धस्य चापं शरो भवति। कर्णस्त्वस्माभिः फलसाधनार्थं भूकेन्द्रात्प्रतिमंडलपर्यंतं साधितोऽस्ति, परंतु स्वल्पांतरत्वात्स एव गृहीतः। तेन गणितेन किंचिदंतरं पतति, चन्द्रस्य प्रतिमंडलाभावात्त्रिज्याग्र एव शर आयाति। तेन तदीयं चापं चन्द्रस्य शरो भवति। पूर्वानुपाते तुल्ययोस्त्रिज्ययोर्नाशे कृते मंदकेन्द्रदोर्ज्या परमशरगुणा शीघ्रकर्णभक्तेत्युपपन्नम्।

अथ नीचोच्चवृत्तप्रकारेण शरसाधनमाह—पातेथवा मंदफलमित्यादिना अस्यार्थः—

अथ पाते विलोमं मंदफलं दत्त्वा तदूनो मध्यखेटः कार्यः तत्पातकेन्द्रं स्यात्, तस्मात्पुरावद् गणकप्रवीणैर्बाणः साध्यः। अत्रोपपत्तिः—नीचोच्चवृत्ते मध्यमोच्चान्मेषादिः पूर्वतो देयः।। ततो[2] मंदस्पष्टपातं दत्त्वा चिह्नं कार्यं, ततो नीचोच्चवृत्तसदृशस्य द्वितीयवृत्तस्य संपातः कार्यः। तद्वृत्तं पातादुत्तरतः वृहद्वृत्तीय परमशरकलांतरेण सषड्भपाताद्दक्षिणतो विप्रकृष्टं यथा स्यात्तथा द्वितीयवृत्तं स्थापनीयं, शेषोपपत्तिः पूर्ववद् ज्ञेया।

इति नीचोच्चवृत्तप्रकारेण शरसाधनं संपूर्णं—

(अ) १. प्रतिवृत्तिक for (प्रतिवृत्त) २. तत्र for (ततो)

अथ रेखागणितं—

अथ यवनाचार्यमतेन वक्ष्यमाणग्रहाणां गणितं विवक्षुस्तदुपयोगिरेखागणितनिष्पत्यध्यायानुक्तं निष्पत्तिगणितमुच्यते।

अथ यत्र प्रमाणत्रयमस्ति तत्रैकं मध्यप्रमाणं कल्पितं[1]। शेषं प्रमाणद्वयं पार्श्वस्थं कल्पनीयं। तत्र प्रथमतृतीयप्रमाणयोर्निष्पत्तिः प्रथमद्वितीयप्रमाणनिष्पत्ति द्वितीयतृतीयप्रमाणनिष्पत्तिघाततुल्यास्ति। यथा—कखगं प्रमाणत्रयं कल्पितमस्ति। खप्रमाणं मध्ये कल्पांत[2] क प्रमाणं प्रथमं ग प्रमाणं तृतीयं कग निष्पत्तिः कख प्रमाणनिष्पत्ति खगप्रमाणनिष्पत्तिघाततुल्यास्ति। अत्रोपपत्तिः—कख निष्पत्तिः रूप हृ प्रमाणनिष्पत्तितुल्या कल्पिता।

{ रू १ हृ
रू १ भू[3]
रू १ व }

खग निष्पत्तिः रूपभू[4]प्रमाणनिष्पत्तितुल्या कल्पिता, एवं कग निष्पत्तिः रूप ब प्रमाणनिष्पत्तितुल्या कल्पिता। तस्मा[5]ह भूवं[6] निष्पत्तित्रयस्य प्रमाणं जातं हृप्रमाणरूप निष्पत्तिः खकनिष्पत्ति तुल्यास्ति। पुनः रूपब प्रमाण निष्पत्तिः कग निष्पत्तितुल्याऽस्ति। तस्मात् हृवनिष्पत्तिः खग निष्पत्तितुल्या नाता[8]। खग[9] निष्पत्तिः रूपभू[10] निष्पत्तितुल्यास्ति। तस्मात् रूपभूनिष्पत्तिः[11] हृव निष्पत्तितुल्या जाता। वरूपघातः वतुल्य एवास्ति, रूपगणनेनावि कृतत्वात् तस्मात्कगनिष्पत्तिः हृभू[13]घातेन समाना जाता। अयं हृभू[14]घातः कख खग निष्पत्तिघाततुल्योस्ति। तस्मात्कगनिष्पत्तिद्वयोर्निष्पत्योर्घाततुल्या जातेत्युपपन्नं। एवं या निष्पत्तिरुक्तनिष्पत्तितुल्यास्ति। सा

| | |
|---|---|
| हृ० रू० १ / ख० क० | रू० १ भू० / हृ० ब० |
| रू० १ व० / क० ग० | क० ग० / हृ० भू०[7] |
| हृ० ब० / ख० ग० | |
| [12] ख० ग० / रू० १ मू० | |

(घ) १. कल्पनीयं for (कल्पितं) २. कल्पितं for (कल्पांत)
३-४. भ्रू for (भू) ५. तस्मात् for (तस्मा)
६. हृभ्रूवं for (हृभूवं) ७. भ्रू for (भू)
८. जाता for (नाता) ९. कग for (खग)
१०. भ्रूनिष्पत्ति for (भूनिष्पत्ति) ११. भ्रूनिष्पत्ति for (भूनिष्पत्तिः)
१२. { क० ग / रू १ भ्रू } for { ख० ग० / रू० १ भू }
१३. हृभ्रू for (हृभू) १४. हृभ्रू for (हृभू)

तदितरौक्तनिष्पत्तिद्वयसमाननिष्पत्तिद्वयघातो भविष्यति । कुतः, समाननिष्पत्ति-प्रमाणानां न्यूनाधिक्याभावात् । इदमेवास्माकमिष्टम् ।

अथ यदि पूर्वोक्तं निष्पत्तिद्वयं तुल्यं स्यात्तदा प्रथम तृतीय { ग० य० / भू० य० } प्रमाणयोर्निष्पत्तिर्मध्यनिष्पत्तिवर्गतुल्या भवति ।

अथ यद्येतासां तिसृणां निष्पत्तीनां प्रमाणानि भिन्नानि भवंति । तदा षट्-प्रमाणानि भवन्ति । तत्र प्रमाणद्वयं घातनिष्पत्तेः प्रमाणचतुष्टयं घातरहित निष्प-त्योर्भवति । तत्र प्रथमप्रमाणं घातनिष्पत्तेः द्वितीयप्रमाणं द्वयं[1] घातरहितनिष्पत्त्यो-[2]र्यद्भवति । तदायामविस्तारपिंडसंज्ञं क्रमेण भवति । घातप्रमाणस्य द्वितीयमघा-तयोः प्रथमप्रमाणद्वयं यद्भवति । तदप्यपरं दैर्घ्यविस्तारपिंड संज्ञं भवति । दैर्घ्य-विस्तारपिंडघाते[3] यत्फलमुपपद्यते, तद्घनफलं भवति । उभयत्रोत्पन्नं घनफल समानं भवति । यथा कप्रमाण खप्रमाणनिष्पत्तिर्गप्रमाणघप्रमाणहप्रमाणं[4] प्रमाण निष्पत्तिघाततुल्या कल्पितास्ति । तत्र कघवप्रमाणानां घनफलं खगहप्रमाणघनफ-लेन तुल्यं भवति । अत्रोपपत्तिः—गप्रमाणहप्रमाणघातः भूप्रमाणतुल्यः[5] कल्पितः । घप्रमाणहप्रमाणघातः यप्रमाणतुल्यः कल्पितः । घप्रमाणवप्रमाणयोर्घातश्च[6] तप्रमा-णतुल्यः कल्पितः । [7]तस्मात् गप्रमाण घप्रमाणे हप्रमाणेन गुणिते भूप्रमाण[8] यप्रमाणे जाते तदा गप्रमाण घप्रमाणनिष्पत्तिः भूप्रमाण[9] यप्रमाण निष्पत्तिरिव तुल्या[10] भवि-ष्यति । पुनः घप्रमाणं हप्रमाणेन गुणितं पृथक् वप्रमाणेन गुणितं सत् यप्रमाणं त प्रमाणं चोत्पन्नं । तस्मात् हप्रमाणवप्रमाणनिष्पत्तिः यप्रमाणतप्रमाणनिष्प-त्तितुल्या भविष्यति । तस्मात् भूप्रमाण[11] तप्रमाणनिष्पत्तिः गप्रमाणघप्रमाण-

(घ) १. 'द्वयं' लुप्त
२. निष्पत्ते for (निष्पत्त्यो)
३. पिंड for (पिंड्व)
४. + व +
५. भ्र for (भू)
६-७. 'व प्रमाण — कल्पितः' लुप्त ।
८. भ्र for (भू)
९. भ्र for (भू)
१०. निष्पत्तितुल्या for (निष्पत्ति रिव)
११. भ्र प्रमाण for (भू प्रमाण)

निष्पत्तितुल्य [1]भूप्रमाण यप्रमाण निष्पत्ति {ह० व० / य० त०} हप्रमाण वप्रमाण-निष्पत्तितुल्य यप्रमाण तप्रमाण निष्पत्त्योर्घात तुल्यास्ति। तस्मात् [2]भूप्रमाण तप्रमाणयोर्निष्पत्तिः (भू०[3] त०) कप्रमाण वप्रमाण निष्पत्तितुल्या जाता। (क० व०) तस्मात् कतघातः कघवघाततुल्यः [4]वभूघातेन खगहघात तुल्येन समानो जात इत्युपपन्नं। अत्र [5]प्रथम[6]पंक्ति दैर्घ्यविस्तारपिंडेषु यत्किचित्प्रमाणस्य निष्पत्तिः द्वितीयपंक्ति[7]-दैर्घ्यविस्तारपिंडेषु तादृश यत्किञ्चित्प्रमाणेन यास्ति सा शेषचतुर्णां प्रमाणानां निष्पत्त्योर्घाततुल्या भवति। यथा घप्रमाण गप्रमाणयो-[8]र्निष्पत्तिः खप्रमाण कप्रमाणनिष्पत्ति हप्रमाण वप्रमाणा-निष्पत्योर्घाततुल्यास्ति। {क० ख० / ग० घ० / ह० व०} अत्रोपपत्तिः—यदि प्रथमघनफले दैर्घ्यविस्तारपिंड-संज्ञानां कघवप्रमाणानां घप्रमाणं पिंडः कल्प्यते, द्वितीय घनफले गप्रमाणं पिंडः कल्प्यते तदा कप्रमाण वप्रमाणयोर्घातः प्रथमघनफलस्य भूमिः स्यात्। खप्रमाणहप्रमाणयोर्घातः द्वितीयघनफलस्य भूमिः स्यात्। उभयत्र घनफल[9]-द्वयं च समानमस्ति। तस्मात्प्रथमपिंड[10]निष्पत्ति[11]र्द्वितीयपिंडेन तथा जाता, यथा द्वितीयभूमिक्षेत्रनिष्पत्तिः[12] प्रथमभूमिनिष्पत्तितुल्यास्ति[13]। इदं रेखागणिते घन-क्षेत्राध्याये मयैव निरूपितमस्ति। खप्रमाण हप्रमाणघातरूप क्षेत्र कप्रमाण वप्रमाणघातरूप क्षेत्रयोर्निष्पत्तिस्तद्भुज निष्पत्ति घातरूपास्ति। तद्भुजनिष्पत्तिस्तु खप्रमाणकप्रमाणनिष्पत्ति हप्रमाणवप्रमाणनिष्पत्तिरस्ति[14]। तस्मात् घप्रमाणगप्रमाण-

---

(घ) १. भ्र प्रमाण for (भू प्रमाण) २. भ्र प्रमाण for (भू प्रमाण)
३. भ्र० त० for (भू० त०) ४. वभ्रघातेन for (वभू घातेन)
५. 'प्रथम' लुप्त ६. 'पंक्ति' लुप्त
७. 'पंक्ति' लुप्त ८. वप्रमाण for for (वप्रमाणा)
९. फलं च for (फलद्वयं च) १०. 'निष्पत्तिर्' लुप्त
११. द्वितीयपिंड निष्पत्तिः for (द्वितीय पिंडेन तथा जाता यथा)
१२. 'क्षेत्र निष्पत्तिः' लुप्त १३. तुल्या जाता for (तुल्यास्ति)
१४. निष्पत्तिघाततुल्यास्ति for (निष्पत्तिरस्ति)

निष्पत्तिभू म्योर्निष्पत्तिघाततुल्यास्ति[1]। तदेवमुपपन्नं यथोक्तं पुनरपि घातक्षेत्रफ-[2] लयोर्निष्पत्तिर्यथा कख[3]निष्पत्ति हवनिष्पत्योर्घातरूपास्ति, तथा खवनिष्पत्ति हक-निष्पत्योर्घातोस्ति। तस्माद्या निष्पत्तिर्निष्पत्तिद्वयस्य घातरूपा भवेत्सैवान्यप्रमाण-जनितनिष्पत्योरपि घातरूपा भविष्यति, यदि प्रथमप्रमाणानि विलोमानि[4] क्रियंते।

अथ यदि दैर्घ्यविस्तारपिंडेन[5] युते पंक्तिद्वये घातं विना प्रमाणद्वयं समानं भवति। तदा शेषचत्वारि प्रमाणानि सजातीयानि सन्ति। कुतः, ययोर्घनक्षेत्रयोः पिंडौ समानौ स्यातां, तयोर्निष्पत्तिभू मिनिष्पत्तिसमाना स्यात्। तस्मात्समानं प्रमा-णद्वयं पिण्डः कल्प्यते। तदा समानपिण्डद्वयस्य घनफलं समानं जायते। अनयोर्भू-मिरपि समाना स्यात्, समकोण समान क्षेत्रयोर्भुजाः सजातीया भविष्यन्ति। तस्माच्चत्वारि शेषप्रमाणानि सजातीयानि स्युः, यथा कप्रमाणखप्रमाणे कघव-प्रमाणेषु प्रथमदैर्घ्यं विस्तारपिण्डेषु खगहप्रमाणेषु द्वितीयदैर्घ्यविस्तारपिंडेषु समाने कल्पिते। तदा घप्रमाण वप्रमाणघात क्षेत्रगप्रमाणहप्रमाणघातक्षेत्रे समाने भवतः। तदा घप्रमाणगप्रमाणनिष्पत्तिर्हप्रमाण वप्रमाणतुल्या भविष्यति।

[ग० च०
ह० व०] अथ चतुर्षु सजातीयप्रमाणेष्वेकमज्ञातमस्ति। तत्र ज्ञातप्रमाणत्रयेण शेषज्ञानं भवति। तथैव षट्प्रमाणेषु ज्ञातपंचप्रमाणैः शेषं ज्ञेयं, एकदैर्घ्य विस्तार-पिण्डघातः, द्वितीयदैर्घ्यविस्तारपिण्डज्ञातप्रमाणद्वयघातेन भक्तः सन् अज्ञात-राशिज्ञानं भवति। द्वितीयप्रकारे तु प्रमाणशब्देन राशिरुच्यते। प्रमाणानि पंक्तित्रये स्थाप्यानि, प्रत्येकपंक्तौ राशिद्वयं लेख्यं, तत्र प्रथमपंक्तौ घातनिष्पत्तेः राशिद्वयं स्थाप्यं, मध्येऽवकाशं यथा स्यात्तथा द्वितीयपंक्तौ घातरहितनिष्पत्ते-

---

(घ) १. भूमिनिष्पत्योर्घा for (भूम्यो र्निष्पत्तिघा)

२. क्षेत्रयो र्निष्पत्ति for (क्षेत्र फलयो र्निष्पत्ति)

३. खक for (कख)

४. भिन्नानि for (विलोमानि) ५. पिंडयुते for (पिंडेन युते)

रंत्यावकाशं यथा स्यात्तथा राशिद्वयं स्थाप्यं । तृतीयपंक्तौ घातरहिंतद्वितीय-निष्पत्तेराद्यावकाशं यथा स्यात्तथा राशिद्वयं स्थाप्यं[1]। अनया क्रियया यदि क प्रमाणमज्ञातं भवति । तदा कखमध्ये एको राशिस्तथा कल्पनीयो यस्य खराशिना निष्पत्तिर्हराशिवराश्योर्निष्पत्तिरिव स्यात् । असौ [2]भूः कल्पनीयः । तस्मात् कराशेर्निष्पत्तिर्भू[3]राशिना गराशिघराश्यो

| | | |
|---|---|---|
| क | | ख |
| ग | घ | |
| | ह | त्र |

निष्पत्तिरिव जाता, तदा कराशिरपि ज्ञातो भविष्यति । वागघांते तादृशो राशि-रूत्पाद्यः, घराशेर्निष्पत्तिस्तेन तथा भवति। यथा हराशेर्निष्पत्तिर्वराशि नास्ति, सराशिर्यः कल्पनीयः, तस्मात्कराशेर्निष्पत्तिः खराशिनागराशियराशिनिष्पत्तिरिव भवेत् । तदा कराशिरपि ज्ञातो भवति ।

अथवा हवराश्योराद्येऽवकाशे राशिस्तथा कल्प्यः, यथा तस्य राशेर्निष्पत्ति-र्हराशिना गघराश्योर्निष्पत्तिरिव भवेत् । सः तराशिः कल्प्यः, तदा कराशेर्निष्पत्तिः खराशिना तथा भविष्यति । यथा तराशेर्निष्पत्तिर्दराशिनास्ति तदा कराशिरपि ज्ञातो भविष्यति । अनेन प्रकारेण शेष राशीनां मध्ये योऽज्ञातोस्ति, तस्यानयनं कर्तव्यं ईदृक् क्षेत्रं[4]।

| | | |
|---|---|---|
| क | भू[5] | ख |
| ग | घ | य |
| त | ह | व |

इति घातनिष्पत्ति प्रकरणम् ।

**अथ कोणस्वरूपं तत्प्रमाणं चोच्यते—**

भुजद्वयोत्पन्ना सूची कोणशब्देनोच्यते, तद्भुजद्वयोपरिगतं चापं कोण प्रमाणं भवति । स कोणः केन्द्रगतो भवत्यथवा वृत्तपालिगतो भवति । यदि वृत्तांतरेकं त्रिभुजं क्रियते तदा तत्कोणत्रयेपि परिधिर्विभक्तो भवति । तस्माद्यच्चापप्रमाणं तदेव कोणप्रमाणं भवति । यदि कोणप्रमाणानि ज्ञातानि भविष्यंति, तदा कोणनिष्पत्तयोपि विदिता भवेयुः । तद्भुजनिष्पत्तयोपि ज्ञाता भवेयुः । पुनः

(घ) १. + तृतीयपंक्तौ घातरहितद्वितीयनिष्पत्तेराद्यावकाशं यथा स्यात्तथा राशिद्वयंस्थाप्यं +
२. भ्रू for (भूः)
३. भ्रूंराशि for (भूं राशि)
४. + भवति +
५. भ्रू for (भू)

समकोणप्रमाणं परिधौ भार्द्धांशमितमस्ति, यद्येते कोणाः केन्द्रसमीपस्थाः क्रियन्ते। तदैतत्प्रमाणानि पूर्वप्रमाणेभ्योऽर्द्धं मितानि स्युः। कुतः, कोणानां चापनिष्पत्तेरुत्पन्नत्वात्, पुनः केन्द्रकोणाः वृत्तपालिकोणेभ्यो द्विगुणा भवन्ति। यदि द्वयोश्चापे समाने भवतः, पुनर्वृत्तकोणानां चापानि केन्द्रकोणचापेभ्यो द्विगुणितानि भवन्ति, यदि द्वौ कोणौ समानौ भवतः।

इति कोणस्वरूपं सप्रमाणं निरूपितं।

अथ कोणसन्मुखभुजानां कोणजीवानां निष्पत्तिः समाना भवतीत्याह—

**कोणसन्मुखबाहूनां निष्पत्तिर्गदिता यदा।**
**तत्कोणजीवयोश्चापि निष्पत्तिर्विदिता भवेत् ॥१॥**[1]


सुगमार्थं।

**यथा कखस्य निष्पत्तिः कगेनास्ति तथा पुनः।**
**गकोणजीवा निष्पत्तिर्हकोणस्य च जीवया ॥२॥**[2]

सुगमार्थं।

अत्रोपपत्तिः-गकोणखकोणभुजौ वर्द्धनीयौ गदगह खवखतरेखाश्च समानाः कार्याः। पुनर्गकेन्द्रं कृत्वा खकेन्द्रं च कृत्वा समानरेखार्द्धव्यासेन दहचापं वतचापं च कार्यं, पुनर्हभूलंवतघलम्बौ[3] दवरेखायां कार्यौ, एतौ लम्बौ गकोण खकोणयोर्ज्ये भवतः। पुनः कललम्बः गखरेखायां कार्यः, तत्र कलगत्रिभुजं हभूगत्रिभुजं[4] सजातीयं भविष्यति। तत्र हभूकलरेखयोर्निष्पत्तिः[5] गहकगरेखयो निष्पत्या समाना भवति। पुनः कलखत्रिभुजं तघखत्रिभुजं च सजातीयमस्ति। तत्र कलत्रघरेखयोर्निष्पत्तिः[6] कखतखरेखयोर्निष्पत्या समाना भवति। अत्र कखरेखाया निष्पत्तिः गहरेखयाप्यस्ति, तखगहयोस्तुल्यत्वात्, तस्मात् हभूजीवा[7] या निष्पत्तिः तघजीवया

(घ) १. ॥१॥ for (१)
२. ॥२॥ for (२)
३. भलं for (भूलं)
४. हभग for (हभूग)
५. हभकल for (हभूकल)
६. कलतघ for (कलत्रघ)



७. हभ for (हभू)

तथास्ति यथा कखभुजनिष्पत्तिः कगभुजेन, अत्र हभूतघयोः[1] प्रमाणयोर्मध्ये कल-प्रमाणमस्ति । तस्मात् $\begin{bmatrix} \text{हभू०}[2] & \text{कल} \\ \text{गह०} & \text{कग} \end{bmatrix}$ हभूतघयोर्निष्पत्तिर्घातनिष्पत्तिर्जाता[3] $\begin{bmatrix} \text{कल०} & \text{तग०}[4] \\ \text{कख०} & \text{तख०} \end{bmatrix}$ कयोः हभूकलनिष्पत्तिसमानगहगकनिष्पत्ति कल तघनिष्पत्ति[5] समानकखतखनिष्पत्त्योर्घातोस्ति । अत्र षट्सु प्रमाणेषु गहतखप्रमाणे त्रिज्या । तुल्ये समाने एते उभयोर्घन फलयोः पिंडरूपे कल्पिते । अत्रावशिष्टं प्रमाणचतुष्टयं सजातीयं जातं, तस्मात् हभूतघयोर्निष्पत्तिः[6] कखकगनिष्पत्तितुल्या जाता । प्रथमं प्रमाणद्वयं गखकोणयोर्जीवे स्तः । अपरं प्रमाणद्वयं भुजौ स्तः । तद्वेवं कोणजीवानां कोण भुजानां च निष्पत्तिस्तुल्या भवतीत्युपपन्नं । $\frac{\text{हभू}[7]}{\text{गह}} \; \frac{\text{तघ}}{\text{कग}}$ । $\frac{}{\text{कख}} \; \frac{}{\text{तख}}$

अथ समकोणत्रिभुजे द्वौ भुजौ जातौ स्तः, वा समकोणातिरिक्तैकः कोणः ज्ञातो भवति । तदा शेषकोणाः शेषभुजाश्च ज्ञाता भविष्यन्ति । कुतः, समकोणः सदा ज्ञात एवास्ति । ज्ञातकोणस्य कोटिस्तृतीयकोणो भवति । भुजयोर्निष्पत्तिः कोणजीवयोर्निष्पत्तिरिवास्ति । सदा[8] समकोणातिरिक्तश्चैककोणो ज्ञातोस्ति । भुजः कोपि न ज्ञातोस्ति, तदा प्रोक्तप्रकारेण कोणाः सर्वे ज्ञाता भविष्यंति । भुजानां निष्पत्तयश्च ज्ञाता भविष्यन्ति । परन्तु भुजप्रमाणानि न ज्ञातानि भविष्यन्ति । यद्येको भुज एव ज्ञायते तदा न किमपि ज्ञातं भवति । यदि समकोणत्रिभुजं न स्यात् । तत्र यदा सर्वे भुजा[9] ज्ञाता अपेक्षिता भवंति, वा भुजद्वयमेकः कोणश्च ज्ञातो भवति । तदा शेषकोणा[10] भुजा अपि विदिताः स्युः । केन प्रकारेण तद्यथा—एककोणा-

---

(घ) १. हभ्क for (हभू)
२. हभ्क for (हभू)
३. हभ्कतकयो for (हभूतघयो)
४. तघ for (तग)
५. हभ्क for (हभू)
६. हभ्कतघयो for (हभूतघयो)
७. हभ्क for (हभू)
८. यदि for (सदा)
९. भुजाः for (भुजा)
१०. कोणाः for (कोणा)

तत्सम्मुखस्थो लम्बः कार्यः। अनेन त्रिभुजद्वयं समकोणं भविष्यति। ताभ्यां पूर्वोक्त-प्रकारेण भुजज्ञानं ज्याज्ञानं च भविष्यति। यदि चैको भुजः कोणद्वयं च ज्ञातं स्यात्, तदा शेषं लम्बनिष्काशनेन बिनैव ज्ञातं स्यात्। कुतः, कोणद्वययोगश्चे-द्भार्द्धांशेभ्यः १८० शोध्यते, शेषं तृतीयकोण एव भवति। भुजयोर्निष्पत्तिस्त-त्कोणज्ययोर्निष्पत्तिरेवास्ति। यदि कोणत्रयं ज्ञातं स्यात्, भुजः कोपि न ज्ञातः स्यात्। तदोक्तप्रकारेण भुजनिष्पत्तयो ज्ञाताः भविष्यन्ति, नतु भुजप्रमाणानि। यदि चैकः कोणो ज्ञातो वैको भुजो ज्ञातः स्यात्। वा एककोणभुजौ ज्ञातौ वा भुजद्वयमेव ज्ञातं न कोपि कोणस्तदा किमपि शेषं न ज्ञातं स्यात्।

इति भुजनिष्पत्ति जीवानिष्पत्ति समाना भवतीति निरूपितं।

इति द्वितीय भागः

---

(घ) १. निष्कासनेन for (निष्काशनेन)

—:०:—